भानुभास्करः

वला ८ अंक ४३६१

मै द भास्कर

श्रीगणेशाय नमः। श्रीगुरुमूर्त्तये नमः॥ श्रीकृष्णं प्रणतार्त्तिघ्नमापद्वारिधिं गुरुं। प्रणम्य जीवदेवेन निर्मि-
यते भाट्टभास्करः॥१॥ अस्कमसारितोवातास्सितस्त्वार्थदर्शिनः। विवेकयन्तु ग्रंथार्थमेतत्तेषु सतो-
ञ्जलिः। इह खलु सुखदुःखप्राप्तिनिवृत्त्यर्थिनां प्रेक्षावतां धर्माधर्मविषये प्रवृत्तिनिवृत्ती दृश्येते।
तत्कारस्येन धर्माधर्मनिर्णयार्थमयमारम्भः। धर्मो नाम वेदबोधितश्रेयःसाधनं यागादिः। अ-
धर्मोपि वेदबोधिताश्रेयःसाधनं ब्रह्महत्यादिः। तयोरन्यानि पर्यायाणि पुण्यपापादयः। धर्माधर्म-
शब्दवाच्यानि। धर्मं चर। धर्मान्न प्रमदितव्यमिति धर्मः क्षरति कीर्त्तनादिति चोभयत्रापि प्रयोगात्। अ-
त्र चोभयविचारान्तान्निष्कर्षः क्रियते। तथा हि। धर्माधर्मयोः प्रमाणतः स्वरूपतश्च निर्णीयेते। तयोः
प्रमाणानि वेदमन्वादिस्मृतिशिष्टाचाराः। तत्र वेदस्यापौरुषेयत्वात्स्वतः प्रामाण्यं। प्रत्यक्षादिप्र-
माणान्तरागम्ययागस्य यागादिसाध्यसाधनभावबोधकस्यानर्थक्याभावादर्थवादादिमयस्य चावश्यं
स्मर्त्तव्यः कर्त्ता ग्रन्थावर्त्तेवा नाम न्येरवनादिना तदस्मरणात् स्मातानीश्रयः। यत्तु योवृद्धः प्रजाप-
तानेऋग्वेदो वायोर्यजुर्वेदः आदित्यात्सामवेद इति वैदिकमर्थवादवाक्यं तदुद्धेकं याक्रियते उ-
पांशुयजुषोद्धैः साम्नेति विधिशेषत्वान्न स्वार्थे प्रमाणमिति वक्ष्यते। यदि चैते विधयः कर्त्रपेक्षाः
स्युस्ततः स्वर्गकामविध्यपेक्षितस्वर्गस्वरूपबोधकार्थवादवद्रात्रिसत्रविध्यपेक्षितप्रतिष्ठाफलबो-

नि

राम

२

धकार्थवादवज्जैदमर्थ्यविध्यपेक्षितकर्तृप्रतिपादकतयास्वार्थेऽप्रमाणं भवेत्॥ नचैवं। किंच काठकं
कालापकमित्यनन्यपरशाखाधिशेषसमाख्याभिः कठादय एव कर्तारो न वेयुः। नत्वन्यपरवे
दसामान्यकर्तृवचनादग्न्यादयः वसिष्ठस्यार्षं विश्वामित्रस्यार्षमिति प्रतिवाक्यं स्मरणाद्वसि
ष्ठादय एव कर्तारो नवेयुः। नचेष्टापत्तिः। कठादीनां शाखाकर्तृत्ववसिष्ठादीनां वाक्यकर्तृत्वमि
त्युभयासंभवादन्यतरस्य चाप्रामाण्यायोगात्। नचार्षस्मरणं ऋषिदर्शनादिति स्मरणात्स्व
ध्यादेतत्वाक्यदर्शनमात्रेणोपपन्नं न वसिष्ठादेः कर्तृत्वसाधकमिति वाच्यं। कठादिसमाख्या
पि तेन प्रवचनादित्युपपन्ना न कठादेः कर्तृत्वसाधिकेत्यपि वक्तुं शक्यत्वात्। नच समानवादिसमु
माख्यानां प्रवचननिमित्तत्वापत्त्या स्मृत्यादेरपि नित्यत्वापत्तिः। अघातनामनिरयन दृष्टेः रूपे
कर्तृस्मरणवशेन तासां कर्तृपरत्वात्। वेदे तु तन्नास्तीति प्रवचननिमित्ता एव सर्वाः समा
ख्याः। नन्वीश्वरकर्तृक एवास्तु वेदः। तस्य सर्वज्ञत्वेनातीन्द्रियधर्माद्यभिज्ञानसंभवेन कर्तृत्वसंभवात्।
यस्य निश्वसितं वेदाः इत्यादिश्रुतेश्चेति चेन्न। कल्पनाया असहत्वात्। किं यस्मिन्कस्मिंश्चित्कल्पे येऽस्मत्य्
तद्वतिकल्प्यं। नाद्यः। तदभाववति कल्पे वेदैकगम्यधर्माधर्मज्ञानाभावेन तदनुष्ठानाभावात्

ल्पांतरोत्पन्नप्राणिनां सुखदुःखोत्पत्तिर्न स्यात्। न द्वितीयः। एककल्पस्थितं वेदं कल्पांतरे सर्वज्ञत्वादु
पदिशतीत्येवं कल्पनालाघवे सति प्रतिकल्पं रचनकल्पनागौरवस्यान्याय्यत्वात्। तर्ह्येकस्मिन्स
मयेऽस्त्वाकल्पांतरेषु तमेवोपदिशतीति चेत्। न। अनादौ संसारे एककल्पे रचनं एककल्पे तस्यैवोप
देश इति नियंतुमशक्यत्वात्। वाक्यरचनस्य च जन्यज्ञानपूर्वकत्वदर्शनेनेश्वरे जन्यज्ञानकल्प
नाप्रसंगात्। नित्यज्ञानस्य च वेदप्रामाण्याधीनसिद्धिकत्वेनेतरेतराश्रयत्वात्। सति वेदप्रामा
ण्ये तद्बोधितनित्यज्ञानवत्त्वेनेश्वरस्य कर्तृत्वं तत्कर्तृत्वेन च वेदप्रामाण्यमिति। यस्य निश्वसि
तं वेदा इति तु निश्वासवदप्रयत्नसिद्धत्ववदन्यवत्कृत्स्नमेवाहनकर्तृत्वं। तस्मान्नेश्वरः कर्तेत्यलमत्र
विस्तरः। न च वर्णाः प्रवाहनित्याः स्युः। यथा नित्यार्थसंयोगात्सोऽपौरुषे×र्ह्य×यत्वं। नित्यवर्णध्यां दि परत्वे
नववरादिशब्दानां पृथाकं पंथि ह्यारव्यानात्। हपित्रीस्यादिवदाकाशनादिवन्नववरादीनां
कल्पना। वेदस्यापौरुषेयत्वादिवमेवानस्य रूपानादित्वं गगनादिवत्। सत्यानुपूर्वीविशेषविशिष्ट
वर्णात्मकः। तत्र वर्णानां स्वरूपनित्यत्वेऽपि आनुपूर्वीविशेषस्योच्चारणस्यागमजन्यत्वात् इति

नात्या

पिनिसलंका २

पेक्षिता

सता। सर्वकालत्वं च तज्जातीयानुपलब्धेः कदाचिदस्तीति कार्यरूपेणानादित्वं। नचैवं स्मृत्यादीनामपि प्रम
यत्नादिविधिसंयोगाद् ध्यादिवत्कार्यानादित्वापत्ते वेदतुल्यत्वापत्तिः। तेषां प्रमाणान्तरजन्यत्वानादि
वाक्यरचनात्मकस्मृतिजन्यत्वेन विशेषादित्यपौरुषेयो वेदः। स च विधिनिषेधार्थवादमन्त्रनामधेया
त्मा। तत्र विधीनां विधायकत्वेन धर्मे प्रामाण्यं। विधायकत्वं चाज्ञातज्ञापकत्वमनुष्ठापकत्वं च॥ वि
धयो हि लिङ् लोट् लेट् तव्यप्रत्ययात्मका भावनाज्ञापकास्तदनुष्ठापकाश्च। भावना च भावयितुर्भवितु
र्भवनानुकूलो व्यापारः। यजेत यज्ञेन यजतिर्यष्टव्यमित्यादौ हि यागानुकूलं व्यापारं कुर्यादित्यादि
रूपेण भावनायामज्ञातज्ञापनमनुष्ठापनं च पुरुषप्रवर्तनापर्यवसायित्वात्। तेन लिङादी
नां भावनाविधायकत्वे न मुख्यो विधित्वं। तत्र च स्वर्गकामो यजेतेत्यादिवाक्यान्यप्यज्ञातभाव
नांशत्रयज्ञापकत्वेन विशिष्टभावनानुष्ठापकत्वाच्च विधय इत्युच्यन्ते। तेषां विधिवाक्यानां मन्त्रार्थ
यविशिष्टभावनाविधायकत्वेन भावनारूपे धर्मे प्रामाण्यं। द्विविधा च भावना शाब्दी आर्थी च। शा
ब्दगतः शब्दाभिहितो वा पुरुषप्रवृत्त्यनुकूलो व्यापारः शाब्दी। लोके गामानयेत्यादि लिङ् लोड् तव्या
ख्यविधित्रयश्रवणे एतत्कामस्य प्रवृत्त्यनुकूलव्यापारवानिति बोधो जायते। तेन तत्राचार्योपाध्याया
द्यासिं लिङादिशब्दो भावकनिष्ठप्रवृत्त्यनुकूलव्यापारबोधकत्वेनोपयुज्यते। यत्तत्र प्राप्ते रूपा

३

श्वनकुराज्ञायविशेषाः प्रवृत्त्यनुकूलव्यापारत्वेनरूपेणलिङादिभिरभिधीयंते। तेशब्दाभिहितत्वाच्छा
ब्दीभावनेत्युच्यते। प्रवृत्त्यनुकूलत्वात्प्रवर्त्तनेति च। एवं वैदिकलिङादिश्रवणेपि प्रवृत्त्यनुकूल
व्यापारवानयं विधिरितिबोधोजायते। न त्वेतत्कर्तितद्नावाप्ता छंदसीत्यधिकृत्य लिङर्थे लेट्
इति विधानाल्लेटः श्रवणेपि तादृशबोधोजायते। तत्र वक्तुर्णां विधीनामचेतनत्वेन तादृशाशयासं
भवान्नत्वतः प्रेरणाशब्दाभिलप्यः शक्तिविशेषः प्रवृत्त्यनुकूलो व्यापारः कथ्यते। स च शब्दगत
त्वाच्छाब्दीभावना प्रवृत्त्यनुकूलत्वात्प्रवर्त्तनेति कथ्यत इति शाब्दिकाः। मिथ्या स्तु। यागादिगतस्ये
ष्टसाधनत्वस्य ज्ञातस्य प्रवृत्त्यनुकूलत्वात्तदेव प्रवृत्त्यनुकूलव्यापारत्वेनरूपेण विधिभिरभि
धीयते। तच्छब्दाभिहितत्वाच्छाब्दीभावना। न तु शब्दगतः शक्तिविशेषः प्रमाणाभावात्। अथवा यदे
तैराख्यातत्वांशेनार्थभावनाभिधानं क्रियते वक्ष्यमाणरीत्या स एव प्रवृत्त्यनुकूलष्टो व्या
पारः। नार्थभावनानभिधाने फलाभावाभावेन पुरुषप्रवृत्त्यसंभवात्। अतो भावनाभिधान
मेव प्रवृत्त्यनुकूलव्यापारत्वेनरूपेण विधिभिरभिधीयते। प्रवृत्त्यनुकूलव्यापारवानि
धिरितिप्रतीतिश्चेदानीमुपपन्ना। भावनाभिधानस्य विधिगतत्वात्। तदेव शब्दगतत्वा
च्छब्दाभिहितत्वाच्छाब्दीभावनेत्याहुः। आर्थी भावना तु पुरुषगतः फलानुकूलो व्यापा

...र्थ्यते फलं येनेत्यर्थः। पुरुषस्तत्कृतत्वात् तथा॥ अस्याश्च दशाख्यातवाच्यत्वात्तदन्तर्गतां विधिं च यमा
ख्यातत्वेन रूपेण तामभिधत्ते। लोके पचति पचेदित्याख्यातश्रवणे पाकानुकूलव्यापारस्य पुरुषग
तस्य प्रतीतेः। एवं वेदेऽपि यजति यजेदित्यादि श्रवणे पुरुषगतफलानुकूलव्यापारात्मकभावनाप्रती
तेराख्यातत्वांशेन विधिभिः साभिधीयते। तस्य तु विधेः लत्यत्वेनाख्यातस्य भावनार्थभावनावाचि
त्वात् पुंसो तु वाक्ये फलादिश्रवणे सति तदन्यथानुपपत्त्या साक्षिप्यते। तेन वा लक्ष्यते। सा चार्थी
भावना प्रयत्नात्मिकैवाख्यातानां करोतिना विवरणात्। पचतीति पाकं करोति। यजतीति यागं क
रोतीति। करोतेश्च प्रयत्नवाचित्वात्। अतः फलानुकूलव्यापारत्वेन रूपेणाख्यातैर्यत्नोऽभिधीयते।
न तु यत्नत्वेन। रथो गच्छतीत्यादावचेतनकर्तृकाख्यातप्रयोगे यत्नरूपाख्यातार्थस्यासंभवाद्रथादिनि
ष्ठो गमनाद्यनुकूलो व्यापारः पूर्वदेशसंयोगविभागोत्तरदेशसंयोगादिरूपो लक्षणयाख्यातार्थः।
बोद्धव्यादिगतः प्रयत्नो वा रथादावुपचारेण। न च लक्षणोपचारकल्पनं दोषः। बहुचेतन
कर्तृकाख्यातप्रयोगानुसारेण लाघवेन च यत्नस्य वाच्यत्वे निश्चिते त्वचेतनकर्तृकाख्या
तप्रयोगाणामनेकविधव्यापारेषु तत्कल्पनस्य न्याय्यत्वात्। तस्माद्यत्न एवार्थी भावनेति राणकः।
मिश्रास्तु। चेतनाचेतनकर्तृकाख्यातानां मुख्यत्वोपपत्तये फलानुकूलव्यापारमात्रं भावना न यत्नमा

ति

भा. ५

४

ग्रं पचति पाके व्याप्रियते रथो गच्छति गमने व्याप्रियते इति तुल्यबोधात्। करोतेरपि न यत्नमात्रवा
ची किंतु व्यापारसामान्यवाची। बीजमंकुरं करोतीत्यादिप्रयोगात्। नचास्य मुख्यत्वे सत्यौपचारिक
त्वं युक्तं। अतः करोतिना विवरणं व्यापारसामान्यवाचित्वमेवाख्यातानां गमयति। यत्तु लाघवाद्यत्न
वाचित्वमुक्तं तन्न। अनेकव्यापारव्यक्तिवाच्यत्वे च घटत्वव्यक्तीनामप्यनेकासां वाच्यत्वापत्तेः। फलानुकू
लव्यापारत्वस्य च वाच्यतावच्छेदकस्य यत्नत्वाद्धिनाप्यंगीकारात्। पैलत्वैस्य वाच्यतावच्छेदक
त्वेतां। किंच मतप्रवेशात्। यत्नत्वस्य त्वे सति सर्वप्रयोगाणाममुख्यत्वापत्तेः। फलानुकूलव्यापारसा
मान्यं भावनाख्यातार्थः इति संक्षेपः। एवं च भावनाक्रियात्वात् कर्तारं विनानुपपन्ना तमाक्षिप
ति। न त्वाख्यातानां कर्तरि शक्तिः। इति मान्त्रिहिकर्ता। एवं च धातूपात्ता भावना याः लाघवेन
वाच्यत्वे सति तत्र च कर्तुर्विनाभावेनाक्षेपसंभवे न वाच्यत्वं युक्तं। अनन्यलभ्यः शब्दार्थः इति न्या
यात्। आक्षिप्तस्य च कर्तुः परिच्छेदकसंख्याकांक्षायामाख्यातेरेकवचनाद्यंशेनैकत्वादिसं
ख्या तस्य परिच्छिद्यते। न चाशाब्दस्य कर्तुः कथं शाब्दसंख्यान्वयः। तस्य लक्षणया शाब्दत्वांगीका
रात्। यथा गवादिशब्दानां जातौ शक्तिमाश्रित्याविनाभावेन व्यक्तौ लक्षणा। अस्याधिकरणन्या
यसिद्धान्तया आख्यातानां कर्तौ शक्तिमाश्रित्य सन्तद्धति लक्षणेति शाणकः। धातूनामेवाक्रियारूपस्या

राम

४

याभिधायिनां कर्त्राक्षेपकत्वात्तत्तत्कर्तृकत्वमिति मिश्राः। पक्षद्वयेपि भावनाधात्वर्थान्प्रति गुणभूतस्य
कर्तुराक्षेपणात्तद्गतायाः संख्याया आख्यातेरुच्यमानायाः कर्तृप्रकारकः संख्याविशेषको बो
ध इति मिश्राः। राणकेतु धात्वर्थभावनयोरिव संख्याया अपि शाब्दत्वेनैककालत्वबोधाल्लाक्षणि
ककर्तृबोधः पश्चादुत्पद्यमानः प्रथममवगतसंख्याविशिष्टकर्तृविषय एवोत्पद्यते। एवं च स्वर्ग
कामो यजेतेत्यत्र श्रुतसंख्याविशिष्टस्य कर्तृत्वबोधेतादृशस्यैवाधिकारित्वबोधादन्यसंख्य
स्यानधिकारत्वं स्थितं। कर्तृबोधोत्तरं संख्यान्वये तु शुद्धस्यैव कर्तृत्वेनाधिकारित्वादेकस्या
शक्तावेकसंख्यामंगभूतामपि हापय बहूनामधिकारः स्यात्। तच्चानिष्टमिति वक्ष्यते। तस्मात्संख्या
विशिष्टकर्तृबोध इत्युक्तं। वार्तिककृद्भिरयमुक्तं। तस्माद्भावनाश्लिष्टकर्तृगतैकत्वादिसंख्या
ख्यातेरेकवचनाद्यंशेनोच्यत इति संक्षेपः। इत्थमेकत्वादिसंख्याकर्त्रन्विता भावना फल
विशेषमपेक्षते। फलानुकूलव्यापाररूपत्वात्। तच्च फलमिष्टत्वेनेष्टसाधनत्वेन वा ज्ञाता
मेव भावनया संबध्यते। भावनाप्येकविधेयपानत्वा शाब्दभावनारूपप्रवर्तनान्वितैव गम्य
ते। प्रवर्तनान्वयश्चास्यान्यपुरुषप्रवृत्तिविषयकत्वेनेति वक्ष्यते। इयं च तदैव पुरुषप्रवृत्तिवि
षया भवति। यदि पुरुषेष्टफलिका भवति। पुरुषस्य च साक्षादिष्टस्वर्गादि तत्साधनत्वेन

वाक्यात्मितितदेवभावनाभाव्यत्वेन संबध्यते। तत्र लोके पचेदित्यादौ यदि धात्वर्थस्येष्ट
साधनत्वे न प्रमाणांतरेण ज्ञातो भवति तदा स एवैकपदोपात्तत्वाद्भावनाभाव्यो भव
ति। पाकं कुर्यादिति। यदि तु तथा न ज्ञातः स्वयं नचेष्टस्तदान्यदेव भाव्यं भवति। पाकेनोदनं
कुर्यादिति। एवं च स्वर्गकामो यजेतेत्यादौ भावनायाः भाव्याकांक्षायां यद्यपि धात्वर्थ एवै
कपदोपात्तत्वाद्भाव्य इति प्रतीयते यागं कुर्यादिति तथापि तस्य द्रव्यव्ययायाससाध्यत्वेन
स्वयमनिष्टत्वात् प्रमाणांतरेण चेष्टसाधनत्वानवगमान्न भाव्यत्वं युक्तमित्यन्यदपेक्षते।
तत्तु स्वर्गकामपदोपात्तः स्वर्ग एव स्वर्गं कुर्यादिति संबध्यते। यद्यपि यत्नात्मिकभावना
या भाव्यो याग एव न तु स्वर्गः। यत्नेन हि याग एव साध्यते साधिते च यागे स्वर्गोऽभिवति। न त
त्सिध्ध्येय यत्नोंतरमस्ति तथापि नास्योपयत्नेन फलोद्देश्यः। अपुरुषार्थत्वात्। तेन यागानुकूल
यत्नात्मिकायामपि भावनायामुद्देश्यतौ रूपभाव्यत्वं स्वर्गस्यैव। यथा वेतनकामः पचतीति
लोके पाकानुकूलयत्नात्मिकायां भावनायामुद्देश्यत्वं वेतनस्य तद्वत्। न च स्वर्गकामपदं
पुरुषपरतां कर्तृत्वेन बोधयेत् न स्वर्गं तदुपसर्जनं भाव्यत्वेनेति वाच्यं। भावनाक्षेपाद्वक
र्तुरपगमाच्च बोधनवैयर्थ्यात्। न च स्वर्गकामनावान् कर्तेति कर्तृविशेषणतया कामनां

बोधयति। यागकर्त्रास्वर्गकामनाकर्तव्येत्यर्थः। यथाब्रह्हतिप्रस्तूयमानेसमुद्रंमनसाध्यायेदि
तिब्रह्मसामारंभकर्त्रासमुद्रंमनोध्यानंकर्तव्यंतद्वदितिवाच्यं। तथासतिकामनातोदृष्टंभावनाया
श्चभाव्यमितिद्वयंकल्प्येत तद्वरंकाम्यमानत्वेपिनोदनास्यस्वर्गस्यभाव्यत्वमेकंकल्पितं। ध
र्मिद्वयकल्पनातोहिवरमेकधर्मकल्पना। किंच। यथैवकर्तृभावनाक्षेपादेवप्राप्तेनेदंपदंतस
स्तथैवपूर्वापरांशस्वरसादेवस्वर्गकामनाप्राप्तेस्तामनूद्यतदुपबद्धःस्वर्गएवभावनया
पेक्षितोयोग्यःसंनिहितश्चभाव्यत्वेनसंबध्यते। एतेनस्वर्गकामनानिमित्तत्वेनकर्तृविशेष
णंयद्दिस्वर्गकामस्तदायज्येतेति। परस्त्रीकामःप्रायश्चित्तंकुर्यादितिवदितिप्रत्युक्तं। यदिशब्दा
द्युपबंधाद्यभावेनकामनायाःनिमित्तत्वाप्रतीतेश्च। परस्त्रीकामनायाःनिषिद्धत्ववत्स्वर्गकामना
यानिषिद्धत्वाभावान्नतद्वन्निमित्तत्वंनादिविहितस्ययागादेःप्रायश्चित्तसंज्ञायेननिमित्तभूत
स्वर्गकामनायानिषेधःकल्प्येत। तस्मान्नकामनायानिमित्तत्वं। नचकामनोपसर्जनस्यस्वर्गस्य
कथंभावनाभाव्यत्वेनान्वयइत्याशंक्यं। यतःकामनोपसर्जनत्वंभाव्यत्वान्वयस्यानुकूलमेव।
नह्यकाम्यमानंभावनाभाव्यंभवतीत्युक्तं।। निष्कृष्योपस्थितत्वानास्वर्गस्यभाव्यत्वान्वयः। ननुस्व
र्गशब्दश्चंदनस्वर्गद्विसादिलोकेप्रयोगात्प्रीतिसाधनद्रव्यवाची। यागश्चद्रव्यापेक्षइतितत्सा

न्योपसर्जनमन्यनान्वेतीतितन्यायेनतुकामनोपसर्जनेनफलातिरिक्तत्वेसतीतिसंगते

भा र.

६

१ पश्वादेन पश्वज पंसुस्वलस्य
तदलिभावः १

धनत्वेन स्वर्गशब्दं द्रव्यं विधीयते। साधनमपि चार्जितुं काम्यत एवेति कामनानुवादोप्युपपन्नः। ते
न स्वर्गं यः साधनत्वेन कामयते स यजेत स्वर्गेण यागं कुर्यादित्यर्थः। एवं च एकपदोपात्तत्वाद्या
ग एव भावनाया भाव्यः। पशुकामइत्यादौ तु पश्वादीनामसंदिग्धं द्रव्यवाचित्वं। अतो न फलत्व
मिति चेन्न। स्वर्गशब्दस्य द्रव्यवाचित्वाभावात्। प्रीतिमद्द्रव्ये प्रयोगात् प्रीतिरहिते च तस्मिन्न प्रयो
गाद् व्यभिचारात् प्रीतिर्वाच्या। न द्रव्यं। नागृहीतविशेषणा विशिष्टबुद्धिरिति न्यायाच्च। एवं चंदनादि
जन्या प्रीतिर्वाच्येति प्राप्ते उच्यते। योऽयमेवं स्वर्गकामो यजेतेति विधिवाक्यशेषोपपन्नं दुःखेन संभिन्नं न
च ग्रस्तमनंतरं। अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदं। अस्मात् दुःखासंभिन्नविच्छेदरहितास
र्वेष्टावारलौकिकी प्रीतिः स्वर्गशब्दवाच्येति गम्यते। सा च न साधनरूपा इति भाव्यत्वमस्याः प्रती
मः। कामना च फले मुख्या सती न साधने गौणी युक्ता। लौकिकेपि पश्वादिशब्दानां च सत्यपि प्रीतिम
द्द्रव्यवाचित्वे कामनोपबंधाद्भावनाभाव्यभाव्यापेक्षित्वाद्द्रव्यस्य च द्वारा स्वान्तरेण प्राप्तेर्भावि
परत्वमेव युक्तं। तस्मात् स्वर्गकामादिपदश्रवणे स्वर्गादिकमेव भावनाभाव्यमिति सिद्धं। यत्रा
पि फलपदं न श्रूयते यथा विश्वजिता यजेतेत्यादौ तत्राप्यध्याह्रियते। नतु तत्र यागस्य भाव्य
त्वमुक्तमयुक्तेः। तत्रोक्तपदमध्याहर्तव्यमित्यसार्थं कायां विधिस्वारस्यात् च गतासर्वपुरुषप्रवर्तक

लिप

राम

६

नचाभिष्टं भावनाभाव्यं भवतीत्युक्तं। तत्र नित्यहोमभावनाया अभियते स्वसंयोगो विरुद्धः। अर्थवा
द मंत्रयोः फलाश्रवणाद् ननु दर्शनादपि भाव्यकल्पनं। अत सर्वदा सर्वेषामिष्टः पापक्षय इति स
एव भाव्यं कल्प्यते। कामिनां मुमुक्षूणां च दुःखं द्वेष्यमिति तज्जनकपापस्यापि द्वेष्यत्वात् तत्क्षयः
सर्वेषामिष्टः। एवं निमित्तेष्वपि कर्मसु तन्नित्यत्वमुपपद्यते। किंचिन्नित्यकर्मार्थवादे मन्त्रे च पापक्षयः
श्रूयते। यथा प्रजापतिव्रते ध्वेतावता हैनसा पुण्यो भवतीत्यर्थवादे एतान्निषेधाधिकारे वक्ष्या
मः। संध्यावंदनेन यदह्ना पापमकार्षमित्यादिमंत्रो। एवं सर्वनित्यकर्मसु पापक्षयो भाव्यः। एव
नैमित्तिकेषु। यथाम्नातेष्टौ। वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते इत्यारभ्य यस्मिन् जात ए
तामिष्टिं निर्वपति पूत एव तेजस्व्यन्नाद इंद्रियावी पशुमान् भवतीति तेन वाक्येन विहितायाः
इष्टेः कालाद्युपलक्षितपुत्रजन्मनिमित्तो विहितत्वान्नैमित्तिकीत्युच्यते। अस्या भाव्याकांक्षायां निमि
त्तस्यान्यथानुपपत्त्या पापक्षयोऽर्थवादाद्वा पुत्रगतपूतत्वादिः समुच्चयं भाव्यत्वेन कल्प्यत
इति मिश्राः। शालिकनाथपुत्रगतपूतत्वाद्येव फलं तस्य तु फलं पापक्षयः पुत्रान्तस्य रक्षितान्कुपादि स्या
दिविधिकल्प्यः। तेनैव ज्ञातेष्टेरावश्यकतापुपपन्ना। ननु भाव्यद्वयमित्युक्तं। सर्वथाप्यासिद्धा वा

६

पक्षयोर्भाव्यः। एवमितरनैमित्तिकेष्वपि तस्मान्नित्यनैमित्तिकेषु पापक्षयो भाव्यः। प्रकरणे च प्रत्य-
वायो कुर्वन्विहितं कर्मेत्यादिवचनादिति मिथ्याः। रागप्राप्ते करणत्वमिति प्रत्यवायपरिहार ए-
व फलं न तु विकल्पासहत्वात्। सर्वपापक्षयस्य फलत्वे एकेनैव तत्सिद्धेरितरवैयर्थ्यं किंचित्सा
पक्षयस्य पापक्षयः फलत्वे किं यतांक्षयः किं पतां नैमित्तिकानां यामकाभावस्तथुक्तं। सर्वधानयाग-
स्य भाव्यत्वं। तस्मात्सर्वभावनानां भाव्याकांक्षायां धात्वर्थं विहायेष्टं भाव्यमन्वेति। ...
पत्रनु धात्वर्थ एव इष्टसाधनत्वेन ज्ञातो भवति तत्र स एव भाव्यत्वेनान्वेति। यथा व्रीहिभिर्य-
जेत दध्ना जुहोतीत्यादि गुणविधौ। व्रीहिनियागं कुर्यात् दध्ना होमं कुर्यादिति संक्षेपः। इत्थं

भावना ६

भाव्यविशेषान्विता करणमपेक्षते। केन कुर्यादिति। तत्रैकपदोपात्तत्वाद्धात्वर्थः करणत्वेन संबध्य-
ते। यद्यपि यागानुकूलयत्नाश्रितकाभावना नैव यागेन जन्यते प्रत्युत तया याग एव जन्यते। तथा-
पि इष्टे यागे स्वाफलोपहिता भवतीति फलोपहितायां तस्यां यागः करणमित्युच्यते। तदीयफल-
करणं याग इति यावत्। अत एव भावनाभाव्यनिर्वर्तकत्वं भावनाकरणत्वमिति सांप्रदायिकाः।
ननु स्वर्गकामो यजेतेत्यत्र संयागः करणं पत्रयाकृत्स्यपदश्रूयते सोमेन यजेतेत्यादौ तत्र द्रव्य-
मेव करणत्वेनान्वीयतां तत्र यागस्य करणत्वे ... यागस्य ... तेन सोमेनेष्टं भाव-

६

यदिति। यैवं। तत्राप्येकपदोपात्ततया यागः करणत्वेन सिद्धं प्रतीयते पदान्तरोपात्तत्वात् सोमो धिलंबेना
तृतीययानुयागगतमेव करणत्वमुच्यते। सोमप्रातिपदिकेन सोमवद्यागलक्षणया सोमविशिष्टोया
गः करणत्वेनाभिधीयते। अन्यथा यागस्य सोमांगत्वे सोमस्य संस्काररूपमदृष्टं कल्प्येत। यद्वा द्र
व्यं कल्प्यं नातः शक्यसंबन्धेन दृष्टरूपलक्षणा। सोमस्य तु यागार्थत्वं दृष्टद्वारेणेति मत्वर्थलक्षणा
यां सोमविशिष्टो यागः करणं। सोमवता यागेनेष्टं भावयेदिति। यत्तु तृतीयायैव करणत्वविशिष्टो
यागो लक्ष्यते सोमकरणकेनेति तद्धितचतुर्थ्यर्थतानुपपदेषु यागेन यो ह्याकृष्टः वसन्ताय कपिंज
लानालभेतेत्यादौ ग्रहणात् मत्वर्थलक्षणायां यागपार्थदेवतात्वादर्शनाच्च ये यागेन यः क्रा
मोतीति स चानुपपन्न इति तत्र द्रव्यदे मत्वर्थलक्षणा वाच्या अग्निदेवत्येन वसंतदेवत्येन या
गेनेति तथा सोमेनेत्यादावपीत्याहुः। तेषां लक्षणाद्वयं प्रसज्यते तृतीयाद्यभिहितां
करणादिकारकं क्रियैवान्वेति नान्येनाक्षरं तकरणादिपदाभिहितं तु क्रियान्येनान्वेति
नहि भवति दंडेन घट इति भवति तु दंडः करणं घटस्येति। एवं च सोमेनेति तृतीयोपा
त्तस्य करणकारकस्य क्रियान्वयपदोपस्थापितो यागान्वयपदोपस्थितो यः पश्चात् लक्षणया यागस्याकां
पुनश्चैतेन यागलक्षणेति। तच्चैतत्ताद्... यागाथितां न तु तृतीयान्ते स्वीकार्ये ... सैव म

१

भाव्य ५

10

त्वर्थलक्षणासंभवादिति संक्षेपः। तस्मादग्न्याद्युपपदश्रवणेऽपि धात्वर्थश्चेदृशाः सः स एव भा-
वनाकरणं। इत्यादि तु ब्रह्मतो प्रत्ययेवा धात्वर्थलक्षणया तद्विशेषणं। यत्र तु वाक्यांतरेण ज्ञातो
धात्वर्थस्तत्र तस्य भाव्यत्वाद् द्रव्याद्येव करणं। यथाह दध्ना जुहोतीत्यादावित्युक्तं। क्वचित्तु द्रव्यदेव-
तासंबंधलक्षितो यागः करणं न यथाश्रुतो धात्वर्थः। यथा सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इ-
त्यादौ। अत्र तु ब्रह्मवर्चसकर्मिकायां भावनायां न निर्वापः करणं तस्य द्रव्यदेवतान्वयासंभवात्
उत्पन्यमानद्रव्योद्देश्यादि देवतान्वयतो द्रव्यदेवतान्वयस्य यागरूपयागक्रिया गर्भो निर्वापादिक्रि-
यागर्भः। सास्य देवतेत्यधिकृत्य सत्त्वे हविषो सौर्येति देवतातद्धितानुशासनेन सद्देवतायाः प्रकाश-
नक्रियागर्भस्य हविर्देवतयोर्यागरूपक्रियायां गर्भस्य संबंधस्य चोक्तेः। अतः सौर्यपदेन द्रव्य-
देवतान्वयं बोधयता तदनुपपत्त्या यागो लक्ष्यते स भावनाकरणं। धात्वर्थस्तु चोदकप्राप्तनि-
र्वापानुवादः स एव वा धात्वर्थकरणत्व सिद्धान्तानुरोधेन यागांगिरूपस्वार्थसंबंधेन द्रव्यदेव-
ताश्लिष्टं यागं लक्षयति। एवं चोपपदेन धात्वर्थान्तरलक्षितो यागः करणं न तु निर्वाप इति। क्वचि-
त्तु फलकर्मिकायां भावनायां गुण एव करणं धात्वर्थस्तु तस्या आश्रय एवेति। यथाह दध्नेन्द्रियका- ना-
मस्य जुहुयादित्यादौ। अत्र हीन्द्रियकर्मिकायां भावनायां दधि करणं न तु होमः। तस्यानि होमो

नुहोतीति वाक्यविहितस्याग्निहोत्रेनुकृष्यार्थस्वर्गकामपदेति वाक्यविहितफलसंबंधस्य दध्नानुहोतीति
वाक्यविहितदधिसंबंधस्य यत्पुनरुत्पत्तिफलगुणसंबंधानाकांक्षणात्। फलांतरसंबंधे वा दध्नः प
क्षप्राप्तस्य नियमोपि विधेयः अन्यथा पयस्यादिष्वैकल्पितस्य दध्नः पक्षे प्राप्तस्य पाक्षिकानुवादत्
नर्थकं स्यात्। एवं च प्राप्ते होमे द्वयबोधने विध्यावृत्तेर्वाक्यभेदः होमेनेंद्रियं भावयेद्दध्नेव होममि
ति। यद्वियत्र होमो विधीयते ततः स एव भावनाकरणं स्यात् दधिमता होमेनेंद्रियं भावयेदिति। स तु
प्राप्तत्वान्नाविधीयते। कर्मांतरं तु सन्निहिते होमे तल्लक्षक शब्दांतरादि प्रमाणाभावान्नयुक्तं। त
स्माद्दध्नैव करणेन इंद्रियं कुर्यादिति। तस्य चासिद्धरूपस्य व्यापारेणाविष्टस्य करणत्वानुपपत्तेः प्र
करणाद्धोमरूपव्यापाराविष्टं करणमिति गम्यते। एवं होमस्याश्रयत्वेन संबंधेन दधि फलकर
णं भवति। यद्यपि व्यापारसंबद्धो गुणः फलाय विधीयते स व्यापारस्याश्रय उच्यते। एवं चानुहोतिः प्रक
रणात् आश्रयत्वेन प्राप्तं होमममनुवदति। न तु स्वयं समाश्रयत्वेन होमं समर्पयति। दध्नः फलसंबंधबो
धनम् आश्रयसंबंधबोधने वाचि [illegible] ततो वाक्यभेदः स्यात्। दध्नेंद्रियं कुर्यात् दध्ना होमं कुर्यादिति तेन सं
न्निधिनाम्नाश्रयसंबंधे प्राप्ते दधि फलभावनाकरणं विधीयत इति राणकः। मिश्रास्तु तृतीययो
दधिगतं करणकारकं फलभावनाकरणं। दधिगतेन करणत्वेनेंद्रियं कुर्यादिति। प्रत्यक्षमिति प्रत्ययोस
मार्थ्यात् तस्याः पोः प्रत्यक्षं [illegible] धान्ये ने [illegible] नीयायास्य च तस्य कारकांतरान्य

मायोग्यत्वेपि लक्षणया करणत्वान्वययोग्योपस्थितिर्भवति। कारकं च सर्वं क्रियानिरूपितमेवेति कर
णत्वं किं क्रियानिरूपितमित्याकांक्षायां प्रकरणाद्धोमक्रियानिरूपितमिति गम्यते। जुहोतिश्चानुवादः।
प्रत्ययसाधुत्वार्थं प्रयुज्यते। एवं च दध्निगतेन करणत्वेन होमनिरूपितेनेन्द्रियं भावयेदित्याद्यः। भाष्य
वार्त्तिकयोरपमुक्तं। तस्मात्सर्वभावनानां धात्वर्थः करणं विधुणोदितं धात्वर्थो नाव्यग्राभ्यपा
येति संक्षेपः। इदं च स्वर्गकामो यजेतेत्यत्र करणान्विता भावनेतिकर्तव्यतामपेक्ष्यते। यागेन स्वर्गं
यात्कथमितिकर्तव्यतायाः विशेष इतिकर्तव्यता। निश्चमतफलानुकूलव्यापारात्मिका भावकर्तृनि
तारूपेण्णा तस्य विशेषरूपमपेक्षते कथमिति कोसौ व्यापार इत्यर्थः। किमत्र प्रश्नस्य थमुःप्रकारे।
सामान्यस्य भेदको विशेषः प्रकारः। भावनारूपस्य व्यापारसामान्यस्यापरव्यातोक्तस्य परिच्छे
को विशेषः प्राकांक्ष्यमाणः प्रकार इत्युच्यते। यथा द्वेतपाकं कूपादि त्वकेकथं कः प्रकार इत्याका
क्षा भवति। तत्र प्रकृतकरणादिव्यापारविशेषो न्वेति तत्र यागेन स्वर्गं कुर्यात्कथं कः प्रकार स्य
तिव्यापारविशेषात्मकप्रकाराकांक्षा भवति सेयमितिकर्तव्यताकांक्षा। तस्यां च सन्निहितो
न्वाधानादिप्रोक्षणानन्तर्यातो व्यापारः दर्शपूर्णमासपौर्णमासीपाकूदवसानीयांतो ज्यो
तिष्टोमस्यैव स सव्यापारविशेषोन्वेति। स्वपमेसौ व्यापारो येनानुष्ठितेन यागेन स्वर्गोभिवृत्तो।

रणांकर्मतेयागानुकूलत्वत्।नास्तिकाभावनाकर्तव्यतारूपेणोक्तास्वकरणानुग्राहकंव्यापारविशे
षमपेक्षते।यागेनस्वर्गंकुर्यादित्यत्रकिंव्यापारानुगृहीतेनेति।नह्यनुग्राहकव्यापारंविनाकरणत्वंसं
भवति।यथाकुठारउद्यमननिपतनव्यापारानुगृहीतःछिदाकरणंभवति।यद्यपिसन्निधिमात्रेणाक
रणंयथाक्षियाद्यधिभागेबुद्धिविषयेव्यवहारेतत्राप्युक्तसन्निधेरेवानुग्राहकोव्यापारः।अन्यनुसन्ने
स्यकरणत्वासंभवस्य।उक्तंच।तेनजन्मैववषयेबुद्धेर्व्यापारइष्यतेइति॥तथाप्यनुग्राहकव्यापारा
कांक्षायांसन्निधानाम्नातमारादुपकारकंपदार्थजातमपेक्षते।नसन्निपत्योपकारकमित्ययमेवक्ष्यते
तस्मादस्तीतिकर्तव्यताकांक्षातस्यावसन्निध्युपदिष्टंदर्शपूर्णमासादेःप्रकृतिरूपेकर्माणिसं
बध्यते।विकृतिरूपेतुसौर्यादिकर्मणितद्विधिकल्पितेनातिदेशेनाङ्गजातंसंबध्यते।प्रकृति
विकृतिरूपेत्वग्नीषोमीयपशुयागादिकर्मणिउपदेशेनाति×वाक्येन×देशेनचप्रासंबध्यते।यत्रो
पदेशेनैवदृष्टादृष्टार्थयावदपेक्षितांगान्वयःसाप्रकृतिः।यथादर्शपूर्णमासौ।ज्योतिष्टोमःसर्वेवि
होमाः।यत्रातिदेशेनैवतादृशांगान्वयःसाविकृतिः।यथासौर्यादिः।यद्यपिविकृतिष्वपिकासुचिदुप
देशेनांगान्वयोभवति।यथानक्षत्रेष्टिषुपूर्णाहोमानांतथापितयोक्तांगान्वयःसतत्राप्यतिदेशेनैव।अ
ग्नीषोमीयपशुयागेतूपदेशेनपशुधर्माउपाकरणादयोतिदेशेनचदर्शपूर्णमासांतर्गतप

योयागधर्माः प्रयाजादयो दृष्टादृष्टार्थाः संबध्यन्त इति तस्य प्रकृतिविकृतिरूपत्वं। किंचित्तु उभयरू-
पं कर्म यथा गृहमेधीयादि। मरुद्भ्यो गृहमेधिभ्यः सर्वासां दुग्धे सायमोदनं निर्वपेदिति यामे-
ह्यदेवतासंबन्धकल्पितो यागः सायंकालविशिष्टो विधीयते सोयं गृहमेधीय इत्युच्यते। न
करणिकायां भावनायां भाव्यं चातुर्मास्यैः स्वर्गकामो यजेतेति वाक्योक्तस्वर्गः। एवं स्वर्गकामि-
कायाः यागकरणिकायाः भावनाया इति कर्तव्यताकांक्षायां सन्निधानादाज्यभागोपनीति
स्विष्टकृतं यजतीति विहितमाज्यभागादि संबध्यते। तत्रो दर्शपूर्णमासप्रयोविहितं कृत्स्नोप-
कारमन्त्रश्रुतं शृत्या कांक्षां निवर्तयतीति निवर्तनापोचतस्यां न दर्शपौर्णमासिकधर्माणामिष्ट-
त्वसामान्येनातिदेशः कल्प्यते सर्वत्र हि भावनोपकारकं व्यापारमपेक्षते न तु व्यापारमात्रं स्वा-
न्तसन्निहितएव लब्धव्य इति किमतिदेशकल्पनया। अत एव नक्षत्रेष्ट्यादिषु पह्नमाघपर्वा-
णपाठे पीष्टित्वसामान्यकल्पितातिदेशेन दार्शपौर्णमासिकधर्मा एवानावन्वीयन्ते पश्चात्त्व-
कृत्स्नोपचारोपहोमादिग्रहणं। प्रकृतिषु लगत्याव्यापाराग्रहीत्वा पश्चात्तत्तन्योपकारकल्प-
नां व्यन्यदीप कृत्स्नोपकारव्यापाराग्रहणासंभवात्। तेन गृहमेधीयो पूर्व इत्युच्यते। नास्तिप-
यो प्रकृतिर्यस्येत्यर्थः। एवं चातिदेशाभावान्नास्य विकृतित्वं। उपदेशेनापि न यावदपेक्षितांग

ग्नीषोमीयादीनां यागानां विधिः। नन्वाज्यभागाभ्यां गाईव्यदेवतासंस्काराणां दर्शपौर्णमासिकानां आग्नेयादीनां बर्हिःसंस्काराणां मन्त्रा
णां तिः। ग्नान्यभागादीनां गार्हपत्यदेवतासंस्काराणां दर्शपौर्णमासिकानामग्निवेदि बर्हिः संस्काराणामग्ना
धानस्य नवलवनादीनामनुष्ठानादीनां तस्मात् धनपर्णत्वादीनां संस्कारादीनां संस्काराणामंग
प्रधानसाधारणानां प्रधानेनीयमानेहि तत्रांगान्यपूर्वतीयनेनन्यायेनाज्यभागादिविधे
नेहानुष्ठेयत्वात् प्रधानद्रव्यसंपादकव्यापारस्य चाक्षेपलभ्यत्वात्। अतो न प्रसक्तिरभिस्यनु
भपरूपता। यदि वाज्यभागादिषु देवो नाक्षिप्तः सर्वमुपदिष्टमेवेति मत्वा प्रसक्ति लक्ष्यवक्रीयते। तत
त्रो। तर्हि यथा प्राप्तिरिति कर्तव्यता। अयः कांक्षायां यावद्दर्शाद्यभागाद्येयमिति सिद्धं। अंगभावनानांगि
तिकर्तव्यताकांक्षायां यावद्वनिकधर्माणां तत्संदेशपठित धर्मान्तराणां चान्वयः। यथा सन्निधौ प
नती स्यादिपंचवाक्यविहितानां दर्शपूर्णमासांगपंचप्रयाजानुभावनानां प्रधानोपकार भाव्यानां
णि ५ यागकृतिकानां मितिकर्तव्यताकांक्षायामतिदेशापेडोबर्हिः प्रतिसमानयतजुह्वा मौपभृतामिति
वाक्येनैरग्यत्तीयप्रयाजानंतरं बर्हिरासय्य चतुर्थप्रयाजं प्रतिजुह्वामौपभृतं तन्तनु गृहीतान
यनरूपोधर्मो विहितः। ततो भिक्रामंजुहोतीति वाक्येनाभिक्रमणरूपो धर्मो विहितः। ततो पावै
प्रयाजानामिथुनं वै देव्यादिनास्तुतिः स्तुतानत्रपदे वीचरधर्मपावधानिकं प्रयाजार्थत्वं मध्यपाठ
तस्य तु संदेशपाठेन। जुहोति नाप्रयाजहोमानेवानुघाभिक्रमणमाहवनीयप्रत्यासन्ने देश एकैक

१३

13

अथानंतरं पदप्रक्षेपरूपं विधीयते। अभिक्रम्याभिक्रम्येत्यभिक्रामे। आभीक्ष्ण्येन मुक्ते।
पांसुसंगाभावनासु वा वनिकाः संदर्शोपहिताश्च न संतिताः स्याच्च मन्वद्धशिखत्वादीनां स्मो
र्यधर्माणां सर्वकर्मांगानामन्वयः। आचमनादीनामपीतिकर्तव्यताकांक्षापां स्मार्ततद्धर्मा
णामन्वयः। तेषामप्याकांक्षापां स्वरूपसंपादनस्यान्वयः क्रियापाइ वनिभागो। एवं येन प्रा
न भूतादन्विहिमाम्प्रनु कैतिकर्तव्यताकांक्षेष्वपि स्वरूपसंपादनमितिकर्तव्यता। नवा तेषामति
देशः किं न स्यादिति वाच्यं। पागधर्माणां यागहोमयोः सादृश्याभावेनातिदेशायोगात्। हो
मेष्वपि च किंचिद्धर्मोपदेशेन कः अथ धर्मः को वापि धर्मातिदिश्यतीनिर्धारणात्। अलोपे पाव
दर्शपेतास्तोतपाकापूर्वः पेत्यनंगात्सोष्टकेतिकर्तव्यता। तस्मात्सर्वभावनानामितिकर्तव्य
ताकांक्षापां क्वचिदुपादिष्टानां क्वचिदतिदिष्टानां क्वचिदुभयेषां धर्माणां तस्मात्तेनां क्वचित्स्व
रूपसंपादनस्यान्वय इति संक्षेपः। एवं साध्यसाधनेतिकर्तव्यतांशत्रयविशिष्टभा
वनाविधायकत्वेन धर्मविधीनामप्राप्त्य। यद्यपि व्यंशः सर्वत्र भावनप्राप्तेरितरस्मात्समं
पर्कव्य आह्वनणादिपदं ष्ठ विष्णूपतेन पापि न स्वचतुर्धा शोभ्य वहीयते भावनानां विनापि अ
वनमात्रेषटो भवती पादानप्रेषणात्। अंशत्रयं तु भावने वाकांक्षपत इति तपाव्यवहारः।

२२

तत्राज्ञातस्य बोधको विधिरपूर्वविधिः। यथाग्निहोत्रं जुहोतीत्यादिः। स च त्रिविधः उत्पत्तिविधिर्विनियोगविधिरधिकारविधिः प्रयोगविधिरिति

स च विधिस्त्रिविधः। अपूर्वविधिर्नियमविधिः परिसंख्याविधिश्चेति। तत्र कर्मणउत्पत्तिं प्रथमं प्रकाशयति स प्रथमः। यथा ... एव स्वहीष्ट सामान्यक... मिको होमकरणिका भावना प्रथमं ... एतस्य विधेः सहकारीणि षट् प्रमाणानि। शब्दान्तराभ्याससंख्यासंज्ञागुणप्रकरणान्तराणि। एतत्सहकृतेनोत्पत्तिविधिना कर्मसिध्यते यथा तथाग्रे वक्ष्यामः। विनियोगमंगांगीभावसंबंधं बोधयति स विनियोगविधिः। यथा स एव होमफलयोर्भावनाद्वारकमंगांगीभावं बोधयति। भावना हि फलोपहिता येन भवति तत्करणमिति स्पष्टम्। यदि च तत्फलार्थं भवति तथा सति तदंशेन भावनायाः फलोपहिता भवतीति करणमुपफलार्थतां बोधयन् विनियोगविधिर्भवति। व्यापारभेदादेकस्य संज्ञोद्देशमात्ररूढः। श्रुतौ यस्तोमेन दध्ना जुहोतीति दधिहोमयोः लोके वाक्यान्तरप्राप्तत्वेनोत्पत्त्यनपेक्षत्वादंगांगिभावमात्रबोधकत्वात्। अस्यापि सहकारीणि षट् प्रमाणानि। श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्याख्यानि। एतत्सहकृतेन विनियोगविधिनांगत्वं बोध्यते। एकस्य वांगत्वेदरस्य वांगित्वमर्थात्सिध्यतीति न तु तद्विधिगम्यं। अंगत्वं च परोद्देशप्रवृत्तपुरुषकृतिसंबंधित्वं भवति हि तोदस्य फलोद्देशप्रवृत्तपुरुषकृतिसाध्यत्वात्फलांगत्वं फलस्य च स्वालोद्देशप्रवृत्तपुरुषप्रयत्नसाध्यत्वात्पुरुषार्थत्वं। पुरुषस्य च कर्मोद्देशप्रवृत्तौ

स्या। स्मर्त्तव्यार्थत्वात्कर्मार्थत्वं। तथाच कर्मफलार्थं फलं पुरुषार्थं पुरुषश्च कर्मार्थ इति वक्ष्यते।
द्रव्यगुणसंस्काराणामधिकृतो द्वितीयप्रश्नेऽतो पुरुषस्यापि तत्संबंधित्वात्कर्मार्थत्वं। ननु प
कारत्वमंगत्वं। माषिकार्थोऽपि म इत्यादावुपकारकेष्वंगत्वदर्शनात्। आमात्रेऽर्थ एतदीपस्य
शेषोपकारत्वेऽपि तदंगत्वाभावात्। नातोऽंगत्वस्य च ज्यादा आदिरूपकारकत्वकल्पनात् आ
वे संगत्वज्ञानात्स्वर्गादिकल्प्य नैव स्यात्। तस्मादुक्तविधपारार्थ्यमेवांगत्वं। तच्च श्रुत्यादिषड्
विधविनियोगगम्यमिति श्रुत्यादीनि निरूपयामः। तत्र लिंगादिरूपमात्रमंतरेणांगत्वबोधकः शब्दः
श्रुतिः। यथा दध्ना जुहोति। अत्र तृतीयया दध्नः करणत्वेन होमकर्मिकायां भावनायां बोधितत्वेन
होमकरणत्वे बुद्धे विधिर्होमार्थं दधीति बोध्यते सा च तौ वा श्रुत्यांगत्वबोधः। एवमरुणे
यैकहायन्या पिंगाक्ष्या सोमं क्रीणातीत्यत्र सोमक्रयकर्मिकायामुपकारिणिकायां भावनायां विधीयते तदुप
कारकत्वेनाग्निषोमीयपशुषु अधिकरणन्यायेन गुणमात्रवचनः। एकहायनीशब्द
सोमं भावयेदिति। अरुणाशब्दश्चाप्यत्यधिकरणन्यायेन गुणमात्रवचनः। एकहायनीशब्द
एकहायनसंबंधविशिष्टगोद्रव्यवाची। पिंगाक्षीशब्दोऽपि पिंगाक्षसंबंधविशिष्टे द्रव्ये वर्त्तते। नन्वेतावच
पिष्टाधस्त्यधिकरणन्यायेन संबंधमात्रेण वर्तते द्रव्येऽनुलक्ष्यतामिति वाच्यं। संबंधप्रतीतेः सं
बंधिद्वयप्रतीतिपूर्वकत्वेन द्रव्याभिधानं विना संबंधाभिधानासंभवात्। अतस्तस्यैकहायन्य

ऽीवद्व्यस्य येन वक्तुं व्रीहिणा वाऽवयोभिहितं तयोः संबन्धः संसर्गविधया एव भासते नाभिधानमिति इति
शक्तिप्रयोजनप्रतिपत्तिगुणपास्मि एवं प्रातीतयोऽ द्रव्यत्वस्य कृत्स्नं पुरुषमिति तावेवाध्यस्य पधिक
रणन्यायविषयोन संबन्धः। एवं सर्वयौगिकशब्दानां द्रव्यवाचित्वं उन्नेयं। सर्वत्र यौगिकेऽर्था
वेद्रव्यमेवाभिधीयते। नहि संबन्धवाच्यत्वं संभवति गोरवादेः इति। तथा चारुणगुणः पद
द्रव्याभिहितं द्रव्यवत् तृतीयाश्रुत्या करणत्वेन गम्यते। भावनायाश्चेक्रयप्रकरणिकायां नैतयो
रन्वयइति मत्वर्थलक्षणया क्रयान्वयो भवति। अरुणागुणकरणके नैकहायनीकरणके
नपिंगाक्षीकरणके नक्रयेण संबंधो भावयेदिति। नवामूर्त्तस्य गुणस्य कथं क्रयकरणत्वं
द्रव्यपरिच्छेदद्वारोपपत्तेः। अमूर्त्तस्यापि परिच्छेदद्वारा आकांक्षायां करणस्य गोद्रव्यस्य परि
च्छेदकगुणाकांक्षायां क्रयसाधनत्वेनार्थासिद्धस्य नियमः पाक्षिकान्वयपद्ध्यते। तेन तृतीयाश्रुत्या
क्रयकरणत्वे द्रव्यगुणयोर्बोधिते तादर्थ्यविधिबोधयतीति श्रोतांगत्वबोधः। पदानुषङ्गसा
मत्वर्थलक्ष्यते तृतीयाच मत्वर्थस्य क्रयस्य करणत्वं वदति। अरुणगुणवत्यैकहायनीवत्या
पिंगाक्षीवता क्रयेणेति तदापि मत्वर्थलक्षणातः प्रागरुणया क्रीणातीति श्रवणए वक्रयकरण
गुणद्रव्यापात बोधोत्पद्यते सततृतीयाश्रुतिस्ततः पश्चादपि न बाध्यते इत्यविहितः श्रोतांगत्वं

15

वहारः। न चैकस्य कर्तृणि कार्यभावनां बोधयन्नेकपेव द्रव्यगुणयोः करणत्वे नांगत्वं बोधयन्
विधिरावर्ततेति वाच्यं। द्रव्यगुणयोः कयांगत्वबोधकविध्यंतरांगीकारात्। सर्वेषु विशिष्ट
विधिषु सोमेन यजेतेत्यादिषु विशेषणविधिरर्थात्कल्प्यते गुणस्य धात्वर्थांगत्वबोधाये
ति न श्रुतिविध्यावृत्तिनिमित्तवाक्यभेदप्रसंगः। अथवा श्रुतस्यैवानेकत्र तात्पर्यकल्पनेपि
विशिष्टस्य वाक्यार्थस्यैक्यान्नावृत्तिप्रसंगः। तस्माद्विशिष्टविधिषु धात्वेव द्रव्यगुणयो
र्धात्वर्थांगत्वबोधः। एवं ग्रहं सम्मार्ष्टीत्यत्र द्वितीयाश्रुत्यास्य मार्गस्य ग्रहार्थत्वं। द्वितीया हि ग्र
हस्य कर्मत्वमाह। ग्रहेर्जुहोतीति वाक्येन ग्रहस्येष्टहेतुत्वावगतेः सम्मार्ष्टीति विध्युक्तभा
वनायाः ईप्सिततमकर्मत्वेन ग्रहो विधिना बोध्यते ग्रहं भावयेदिति। यत्रि इष्टहेतुत्वेनाज्ञातं द्रव्यं
तद्द्वितीयया कर्मत्वेनोक्तमपि विधिना नीप्सिततमकर्मत्वेन बोध्यते। यथा सक्तून् जुहोतीति
ज्योतिष्टोमप्रकरणाधीतवाक्ये सक्तूनां वाक्यांतरेण फलवत्त्वानवगमान्नेप्सिततमकर्मत्वं
सक्तुकर्मकेन होमेनेष्टं भावयेदिति। तेनेप्सितानीप्सितानुवादिकर्मत्वमात्रं द्वितीयार्थ
इति। मध्याः प्राणकेन्द्रेप्सिततमकर्मत्वमेव द्वितीयार्थः। अनीप्सिततमकर्मत्वे लक्षणेत्युक्तं।

16

तन्मते सम्रूपनामनीप्सितकर्मत्वं साधनत्वं वा लक्ष्यते। यद्यस्य त्वीप्सितकर्मत्वेनान्वयो हि ती
यया बोधिते संमार्गस्य करणत्वेनान्वयो भवति। संमार्गेण ग्रहं भावयेदिति। यद्यस्य नी
पाद्यत्व प्राप्यत्वविकार्यत्वरूपकर्मत्वासंभवात् संस्कार्यत्वरूपं संमार्गं प्रति कर्म
त्वं। ग्रहशब्दः सोमाधारोलूखलाकारपात्रवाची ग्रहे पुनः तस्मिन्निति सूचयाः। तन्मते दशा
पवित्रकरणकसंमार्गः पात्रसंस्कारः। राणकेनु ग्रहस्तत इति वृत्त्या वृत्त्यर्थेति ध्यायाः। सोमर
सवाची तस्य ग्रहणकाले बहिर्लग्नबिन्दुपुषां शोधनरूपः संस्कारः संमार्गेण भवतीत्यु
क्तं। एवं च संमार्गस्य संस्कारत्वेन तदङ्गत्वं विधिना बोध्यत इति श्रौतो विनियोगः। एवं च
यः संमार्ष्टि व्रीहीन्प्रोक्षतीत्यत्र द्वितीयाश्रुत्या संमार्गप्रोक्षणयोः स्रुग्व्रीह्यङ्गत्वं। एवं मैत्रा
वरुणाय दण्डं प्रयच्छतीत्यत्र चतुर्थीश्रुत्या दण्डकर्मकदानस्य मैत्रावरुणार्थत्वं। चतुर्थी मैत्रा
वरुणस्य संप्रदानत्वमाह। संप्रदाने चतुर्थीति स्मरणात्। तच्च कर्मणा यमभिप्रैति संतोषय
ति स संप्रदानमिति प्रसिद्धं तेन मैत्रावरुणस्य प्राधान्यं गम्यते। तस्य हि प्रयोजनवत्त्वात् पु
क्षोमितितादर्थ्ये दण्डदानस्य विधिर्बोधयति। यत्र संप्रदाने निष्प्रयोजनं तत्र न तादर्थ्यं किं पाद्याः

भा. र.
१६

वस्तुतस्तु गुणोपचयस्याप्रसंगत्वात्संभवः । मूलः प्राधान्यं तत्र लक्षणया च्यते न तत्संगमित्यत्र स्मद्गुदाहरणं तत्र भाति ॥ ३

यथा वेदविदे गां ददाति हिरण्यमात्रेयाय ददातीत्यादौ । अत्र तु मैत्रावरुणः प्रेष्यति चान्वाहे
ति वाक्येन मैत्रावरुणस्य प्रैषानुवचनरूपद्वयोजनवत्त्वावगते दंडी प्रैषानन्वाहेति वाक्या
द् दंडप्रदानस्य तादर्थ्येन पुरुषोद्देशेन विधिः । दधिसक्तुनी मिततकर्म दानेऽपि । एवं मगनेस्त्वलं ना
ददीनोतीत्यत्र पंचमीश्रुत्या गुणोपचयस्य प्राधान्यं परिमितं ह्यन्यपादानके नहि । गुणोपचये ना
ऽन एव हि पातः संस्कारो भवतीति तादर्थ्यं त गुणोपचयस्य विधिर्बोध्यते । यद्वा मध्यादवद्य
ति पूर्वार्द्धाद् द्वितीयं शोधा स्विष्टकृते समवद्यतीति तमादीविद् हव्यादि । आहवनीये जुहोती
त्यत्र सप्तमीश्रुत्या आहवनीयस्य होमांगत्वं । एवं कारकादिभक्तपदस्यार्थबोधकत्वात्तादर्थ्यबोध
विधेः सहायी भवतीति श्रुतपदस्य च्यते । षष्ठीतु संबंधसामान्यवाचिनी कचित्प्राधान्यं कविद्गु
णत्वं बोधयतीति श्रुतित्वेन व्यवह्रियते । पशुरेकामस्येति प्राधान्यमीपशुकामस्य । शुक्लानां
नाव्रीहीणां चरुमिति साधनत्वं व्रीहीणां षष्ठीश्रुत्यावगम्यते । प्रपदात् जातिपदिकार्थमात्र
परत्वान्नस्य तत्र श्रुतिः । एकस्य सर्पगतालिंगसंख्याभिधायिसाद्वाभिधात्री श्रुतिः । अभिधा
यकः सर्वः शब्दः स्वार्थं गुणत्वेनैनु प्रधानत्वेन वा बोधयतीति सभिधात्री श्रुतिरिति प्रतीयते
एवं विधायकोऽलिंगादिः कर्मफलपरस्य [illegible] भावं बोधयतीति विधात्री श्रु

राम
१६

तिरित्युच्यते। एवमेकपदे प्रत्ययार्थयोर्गुणप्रधानत्वावगतेः पदश्रुतिरित्युच्यते। एवमेवो
भयपदशब्दोपस्थापनयोर्गुणप्रधानत्वावगतेरेकाभिधानश्रुतिरित्युच्यते। देवस्य त्वेति मि
र्वपतीत्यादौ विधिकरणस्य श्रुतित्वमभिक्रामं जुहोतीत्यादौ तेन मुख्यप्रत्ययस्य श्रुतित्वमुक्तं राणा
कादिभिर्व्याख्यातम्। वाक्यीयोत्र विनियोगो न श्रौत इत्याहुः। लिंगं नाम अर्थगतं शब्दगतं वा सामर्थ्यं। त
च्छ्रुतिकल्पनेनांगत्वबोधकं। यथा स्रुवेणावद्यतीत्यस्य अवद्यतिनावद्यति हस्तेनावद्यतीति सनारभ्या
धीतेषु वाक्येषु स्रुवादीनां सामर्थ्यमालोच्य इदमेव मांसं कठिनमित्यभिधात्री श्रुतिः कल्प्यते। स्रु
वस्य द्रवावदानेस्यधिते मांसावदाने हस्तस्य कठिनावदाने अंगत्वं विधिबोधयति। एवं वेदाध्यय
नं सिद्धार्थज्ञानस्य प्रयोजनाकांक्षायां स्नानमंतरेणार्थानुष्ठानाशक्तेः सामर्थ्यमालोच्य स्वा
ध्यायमनुतिष्ठेदिति विधात्री श्रुतिः कल्प्यते। ततः कर्मानुष्ठानांगत्वं ज्ञायते। तेनाध्ययनसिद्ध
मेवार्थज्ञानं कर्मानुष्ठानांगं नान्यथेति सिद्धं। अध्ययनस्य वार्थज्ञानं फलमिति वक्ष्यते। एवम
वा
विनाशी अरे यमात्मेत्याद्युपनिषज्जन्यस्यानित्यसंसारिकर्तृभोक्तृभिन्नज्ञानस्य सांपरायिकफ
लककर्मानुष्ठानांगत्वं सामर्थ्याद्देवताद्दशात्मानं ज्ञात्वा कर्माणि कुर्यादिति श्रुतिकल्पने
नस्यापत्ते। ताद्दशात्मज्ञानं विना ताद्दशकर्मानुष्ठानासंभवात्। राणकेतु पदेव भट्टपादाकरोति

मयवोपनिषदातदेववीर्यवत्तरंभवतीतिछांदोग्योपनिषद्धृतेनवाक्येनविद्याशब्दोक्ता
ज्ञानस्योपनिषच्छब्देनवलक्षणयोक्तस्यतज्जन्यनित्यज्ञानस्यपृथग्वाक्यकर्मानुष्ठानां
गत्वंबोध्यतइत्यर्थः।तद्रूपानिषद्धृतवाक्येनतादृशोपासनादिकर्मांगविधानोविद्यासर्व
र्वकांडगतकर्मांगविधानाप्रतीतेःप्रतीतोवातरपाकर्मफलातिशयापर्ततावोधात्तदेवना
मेरनुष्ठानापत्तेरर्थज्ञानवतएवकर्माधिकारइतिसिद्धांतविशेषोधाप्ययुदापाप्याद्दष्टा
कर्मस्वेवांगत्वेनदृष्टापूर्वफलभ्युपगमात्तन्नुल्यनिर्देशादर्थज्ञानस्यापिसर्वकर्मा
गत्वाद्भिरुत्तरमीमांसायांसार्वत्रिकीश्रुत्रेणप्रकृतोक्तिःपविद्यादिपरपर्यंतस्तु
नसर्वविद्यादिपरपर्यायाभिधानान्नातीयपुरुकमितिसामर्थ्यादेवार्थज्ञानात्मज्ञानयोः
कर्मांगत्वंश्रुतिर्तिमथाः।अर्द्धापात्यर्थरूपाक्रतदर्शामिसाधारिस्मृतेःसकलकर्मा
गत्वं।दृष्टार्थवापानिपमाद्दृष्टसिद्धोतदुदयोगात्।शब्दगतंसामर्थ्यंयथा।वीहिदेव
सरनंदामीतिमंत्रस्यदुराकृष्णमासप्रकरणामातस्यप्रकरणात्कर्मसंबंधइत्यादे
कथमननेनोपकुर्यामितिपदेऽध्यायावहितिमेनप्रकाशनसामर्थ्यमात्।लवनुमने
नप्रकाशायेतिश्रुतिकल्पयिलाध्यनांगतंस्यापतोलवनस्वरूपेवमंत्रस्यवैय्यर्थ्य

प्रासेप्रकरणावगतक्रतुसंबंधबलादेवं स्मायते। क्रतुसंबंधिलवनं यदि मंत्रेणाक्रियते तदाकृ
त्य एवं भवतीति। विहितं च क्रतौ बर्हिर्लवनमिति तदंगमंत्रः। मत एव मंत्रगतं। लिंगं क्रतुसा
मान्यसंबंधबोधकं प्रमाणमुपेक्ष्य स्वयं विशेषसंबंधं बोधयति। तत्रेह प्रकरणमुपेक्षते।
क्वचित्तु समाख्या। यथा दार्शपौर्णमासिके यागानुमंत्रणसमाख्याते कांडे पूष्णोहं देवयज्य
यादिः(?) प्रयानुमंत्रणमंत्रः पठितस्तस्य कांडसमाख्यया यागसंबंधे ज्ञाते लिंगात्पूषदेवस्य
यागांगत्वं। तेन यत्र पूषदेवत्यो यागस्तत्रायं मंत्रो नीयते। क्वचित्तु क्रमः समाख्यां लिंगं चोपेक्ष्य लिंग
विनियोजकः। यथा काम्येष्टिकांडे ऐंद्राग्नमेकादशकपालं निर्वपेदित्यादिवाक्यैः काम्येष्टयो वि
हितास्तासां निधौ काम्ययाज्यानुवाक्याकांडे इंद्राग्न्यादिदेवत्यानि याज्यानुवाक्यायुगला
न्याम्नातानि। तानि समाख्यया काम्येष्ट्यंगं। क्रमेण प्रथमायाः प्रथमं द्वितीयस्याः द्वितीयमि
त्येवं ज्ञाते लिंगेन तद्देवताप्रकाशनार्थं लभ्यते। समाख्याभावे त्वाग्नेयमंत्रदृष्टस्याग्नेयेष्टिक्र
मपाठेनाग्नेयेष्ट्यंगत्वे वगते लिंगेनाग्निप्रकाशकत्वे च तदंगसामिधेनीषु विहिताधिकसं
ख्यापूरणार्थमिदं मंत्रद्वयं यागांगदेवताप्रकाशकत्वेन याज्यानुवाक्यारूपं वेति संदेहः स्या

समस्माख्यया वाप्यते । क्रमानपेक्ष्ये ऽग्निक्रमहृदयक्रमे पठितस्यैन्द्राग्नयाज्यानुवाक्यायुगलद्वयस्य स-
माख्यया याज्यानुवाक्यालिङ्गेन च देवताप्रकाशकत्वेन गते प्रथमस्य द्वितीये द्वितीयस्य प्रथमे
ऽपि विनियोगोऽपि स्यात् स क्रमेण वाप्यते । तेन च समसमाख्ययोर्विरोधे सा । एवं समत्रसमाख्यसंबन्धबोध-
कं किंचत्प्रमाणमपेक्ष्य लिङ्गविशेषाग्रत्वबोधकं । तत्र मुख्य एवार्थे विनियोजकं न गौणे । मुख्य-
मादृश्यासतीयमानोपेगौणः । तेन प्रथमोपस्थिते मुख्य एव मन्त्रविनियोगः । यथा दर्शपूर्ण-
मासयोः कुशलवने तु लूनपत्तृणलवने च विहितोऽपि बर्हिर्देवसदनं दामीति मन्त्रः कुशलवनाङ्गं कु-
शानां बर्हिःशब्दवाच्यत्वात् । नोलूपलवनाङ्गम् । याज्यानुवाक्यानां याज्यानुवाक्यानां चैकवाक्यता । नन्वलिङ्ग-
श्रुतिकल्पनेनान्यत्वबोधकः । तत्र याज्यानुवाक्यानामेकार्थप्रयोजनं विभागे च साकाङ्क्षत्वेन पदैक-
वाक्यता । तत्र चार्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्यादिति । यथार्थशब्दः प्रयोजनपरः । इ-
मध्याः । वाक्यस्यार्थपरत्वादीरणकालेन यागत्वम् । यथा चैवावदानमृगापते त्वादिवेदस्तावकमर्थवा-
दमुपक्रम्योद्धे ऽन्यान्निरूपतेऽस्यादयो वैश्वानरादिमन्त्रप्रयोगविश्वस्यादिवि पदः पठिताः सन्त्र क्रम-
दिशब्दार्थे द्यावपृथिव्यमन्त्र वचनाः । नन्वेवं च वचनाः । मन्त्रब्राह्मणयोर्वेदनामधेयमिति गौतम-
मस्मृतेः समहार्णवे दः । वेदमधीत्य स्नात्वा पादिस्येत छन्दस्यार्थस्य नैकदेशाध्ययने भयति ।

पत्न्या न वेदं शृणुयादित्यादावेकदेशेपि प्रयोगस्य काचित्कत्वात् लक्षणया नेयः। तस्मात्समूहे
नेदृः। ऋगादिशब्दस्यैवयवयवाचिनः। यत्रार्थवशेन पादव्यवस्था सा ऋक्। प्रश्लिष्टपठितं यजुः। तत्राप्य-
र्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्यात्। गानं साम एवं च वेदस्य तत्कार्यवादस्य ऋगादिधर्मो
बुद्धत्वादिविधीनां च भिन्नविषयत्वान्नैकवाक्यतोपपद्यते। भावितव्यं वतयेति वक्ष्यामः। नहि सिध्यपमा-
न्यतरवलक्षणाश्रयणीया। तत्रोपक्रमस्थार्थवादस्यासंजातविरोधित्वेनानुपपत्त्यभावादुपसं-
हारस्थविधीनामनुपपन्नेस्तु चैवमादिपदे वैदलक्षणा। ऋग्वेदेन पठ्यते तदुच्चैरिति। क्रियत इति प्र-
युज्यत इत्यर्थः। तेन यजुर्वेदान्तरोत्पन्ने म गवेदान्तरस्थप्रयोगविधिना प्रयुज्यते यथा सामवेदोत्पन्नो वा-
रवन्तीयस्तामयाज्ञुर्वैदिकेनाधानप्रयोगविधिनानुष्ठाप्यते तद्यजुर्वेदेन प्रयुज्यत इत्युपांशुकार्यं।
न तु सामवेदोत्पन्नत्वादुच्चैः प्रयोगेपि स्यादपेक्ष्यतेनासनो। एवं चानेविध्यपर्यवादपदैकवाक्यता
लक्षणेन वाक्येन न ऋग्वेदादिविहितेकर्मण्युच्चैस्त्वादिकं तु शाक्यमिति सामर्थ्यमालोच्योच्चैः कुर्या-
दिति श्रुतिकल्पनापि स्यादित्यत आह। धर्मो गत्यन्तरोध्यते। एवं प्रजापतिर्वरुणायाश्वमनयत्स स्वां दे-
वतामार्च्छदित्यादिकमश्वदातुर्दोषकीर्तकमर्थवादमपनयन्त्यया। यावतोश्वान्प्रतिगृह्णीयात्तावतो
वारुणांश्चतुष्कपालान्निर्वपेदिति प्रतिग्रहीतुर्वारुणीष्टिविधिः श्रुतः। तत्रोपक्रमस्थार्थवादस्य

भा० र

१९

त्यस्य सतः कर्तृत्वं। पालदर्शपापाप्रसङ्गः कर्तृत्वं स्यात्. तस्य पौनको हेतुश्च. पालदर्शपापास्य योनु आपधिनाल हेतु सतः स्यात्
कारात्म त्व सत्त्वं च ॥ ३

र्थवादस्यासंजातप्रतिपक्षत्वेनानुपपत्त्यभावात् तदनुरोधेनोपसंहारस्यैव विधोः प्रतिग्राहयेदिति कि
न्तर्थलक्षणया दानमिष्टं निमित्तं स्वीक्रियते। यतश्च दानं श्रियमिष्टं तस्य प्रतिग्रहं प्रति प्रयोज
कत्वेन कर्तृत्वात्। तं संयोज्य कोऽहेतुश्चेति स्मृतेः। ननु प्रतिग्रहे प्रयोजककर्तृत्वाद्दाननिमित्तत्वं नो
पपत्तिः) तथा दानं ज्योतिष्टोमपौण्डरीकादौ विहितमेवेष्टं निमित्तं न तु लौकिकं। तन्निमित्तेष्टेः फलक
ल्पनाप्रसङ्गात्। नैमित्तिके हि वैदिकत्वसामान्येन वैदिके हि निमित्तत्वेन) वैदिकाश्च दानस्य नि
मित्तस्य शीघ्रोपस्थितेश्चेति मन्त्राः। राणकेतु प्रतिग्रहोपादितां विधिना विहितत्वेन निमित्तभूत
दानं विशेष्यत इत्युक्तं। एवं चात्र विध्यर्थवादपदैकवाक्यतारूपवाक्येन विहिताश्च दानो निमित्ते
परूपिणी हि। ऋत्वं गत्वं लिंगं श्रुतिकल्पनेन न बाध्यते। वाक्यैकवाक्यता नाम स्वार्थबोधे समा
प्तानां वाक्यानां पुनराकांक्षावशेनैकवाक्यता। उक्तं च। स्वार्थबोधे समाप्तानामङ्गाङ्गित्वाद्यपेक्ष
या। वाक्यानामेकवाक्यत्वं पुनः संहत्य जायत इति। तथा गत्वं यथाहवनीये जुहोति गार्ह
पत्ये हविः श्रपयति दक्षिणाग्नावन्वाहार्यं पचतीत्यनारभ्याधीतवाक्यानां स्वर्गकामो ज्यो
तिष्टोमादिक्रतुविधीनां वैकवाक्यता पादिताग्नेरेन कर्तुः ऋत्वं गत्वं लिंगं श्रुतिकल्पनेन न स्थापतो वा
ष्टुमास्य प्रकरणपठितस्य द्वयोः प्रणयतीति वाक्यस्य रोगाखान्तरीवस्य वाहवनीयाद्ध्यपुष्टीति प्र

१९

स्थानान्तरे सहाग्नीप्रणयनमिति वाक्यैकवाक्यतया चातुर्मास्यान्तर्गतयोर्वरुणप्रघाससाकमेधसंज्ञ
योः पर्वणोरीदृशं प्रणयनमङ्गत्वेन ज्ञायते। द्वयोरिति तस्यैतत्पर्वद्वयविधयत्वं। तस्माद्द्वाभ्यामेति कृत्वा ए
तेयज्ञस्य यद्वरुणप्रघासाः साकमेधाश्चेति गतिसाधनत्वेन पर्वद्वयस्तावकोऽयोऽर्थवादस्तादेकवाक्य
तया ज्ञायते। तेन चातुर्मास्यिकेषु चातुर्मास्येषु प्रथमोत्तमयोः वैश्वदेवशुनासीरीयसंज्ञयोः पर्वणोर्दर्श
पौर्णमासिकं गार्हपत्यादाहवनीयप्रणयनमतिदिष्टं कार्यं मध्यमयोस्त्वतिदिष्टमप्याहवनीयादु
त्तरवेद्यां दक्षिणविहारे च प्रणयनान्तरं कार्यमिति वाक्यैकवाक्यतया ज्ञायत इति। साकाङ्क्षधर्मसन्निधौ
भावनायाः कथम्भावाकाङ्क्षा प्रकरणम्। सा च प्रधानभावनायाः महाप्रकरणमित्युच्यते। अङ्गभावना
यास्त्ववान्तरप्रकरणमिति। तच्च वाक्यलिङ्गश्रुतिकल्पनेन विनियोजकम्। तत्राद्यं यथा दर्शपूर्णमासाभ्यां
स्वर्गकामो यजेतेति वाक्ये स्वर्गविषयिकायाः दर्शपूर्णमासयागकरणिकायाः भावनायाः कथम्भावाकां
क्षित्वे। सन्निहितेषु निर्दिष्टफलेषु समिधो यजतीत्यादिवाक्येषु समिद्यागेनेष्टं भावयेदिति किमित्यफलि
फलविशेषाकाङ्क्षा। एवं साकाङ्क्षाणां समिदादिवाक्यानां दर्शपूर्णमासवाक्येनैकवाक्यतां कल्पयित्वा
समिदादियागानां प्रधानोपकारसामर्थ्यं च कल्पयित्वा तैः प्रधानोपकारं कुर्यादिति श्रुतिं कल्पयित्वा
समिदादीनां दर्शपूर्णमासयागाङ्गत्वं ज्ञायते। क्रियाया एव वेदे विनियोजकं न सिद्धस्य वस्तुनः।

यते व्यापारात्मकभावनायाः कथंभूतविशेषोपेक्ष्यते। स्वव्यापारात्मकत्वं च भवितुमर्हति तारणाक
मते फलात्मकभावनायाः स्वनुग्राहको व्यापार एवाकांक्ष्यते न सिद्धवस्तु। लोके व्यापारस्यैवानुग्राह
कत्वेनान्वयदर्शनात्। कुठारेणच्छिद्यात् कथंन्यपेक्षिते तदुहस्तो नोद्यम्यानिपात्येत्यन्वेति ननु हस्तादीनां
क्रियाद्वारेण तु सिद्धमपि गृह्यते उपयोगमनाद्विद्वारेण हस्तः। तेन द्रव्यदेवतादीनां यागसंपादना
दिक्रियाद्वारेण प्रकरणग्रहणादि इति कर्तव्यतात्वव्यवहारः। ननु यस्य तस्य इति कर्तव्यताकत्वे कर्तव्य
तायाः विशेष इति व्युत्पत्त्या केयं भावाकांक्षा यद्विशेषस्येति कर्तव्यतात्वात्। तेन क्रियायाएव यत् व्यापार ६
करणे न ग्रहणं। तत्रोव्यापाराद्युपकारिकायाएव प्रयाजादिरूपायाः। यस्याः श्रुतिलिंगवाक्येनन्यसं
योगः। सन्निपत्योपकारिकायास्त्ववघातादिरूपायाः इत्यादेवतार्थत्वेन श्रुतिलिंगवाक्यैर्विनियोगात्
प्रकरणग्रहणम्। इत्यादिस्वरूपेतु क्रियानर्थक्ये प्राप्ते इत्यादिपदेनापूर्वसाधनत्वं लक्षयित्वा तादृ
र्थ्ये न क्रिया विधीयते। अपूर्वसाधनं द्रव्यमवघातेन संस्कुर्यादिति तारणाके। निष्पाक्ष्यसर्वापिक्रि
याप्रकारेणगृह्यते। सन्निपत्योपकारिकायाः श्रुतिलिंगवाक्यैर्द्रव्याद्यर्थत्वेनावगतायाः श्री
तत्स्वरूपे वैयर्थ्यात् प्रकरणेन न कलंगतादृशापते। दर्शपूर्णमासाभ्यां स्वर्गं भावयेत् कथमित्याका
क्षायां प्रयाजादिभिरदृष्टोपकारकैरवघातादिभिर्द्रव्यदेवताभ्यां यागसंपादकैरन्वयः।।

मि
९०

द्रव्यैकत्वसंगतत्वेनावगतस्यावघातादेर्नव्रीह्यादिस्वरूपद्वारा कृत्यंगता किंत्वपूर्वसाधनस्वरूपद्वारे
तितदर्थलक्षणेत्याहुः। इदं च प्रकृतौ वैधधर्माणां विनियोजकं न विकृतिषु। सौर्यादिवाक्येषु
हि कथंभावाकांक्षायां सन्निधौ यस्मिन्नाम्नातात्साहचर्येन प्रकृतिवाक्यमुपमीयते। यथा सौर्यं च
रुमेकदेवतायोग्यौषधद्रव्ययोगितथा दर्शपूर्णमासयोराग्नेयवाक्यमिति उपमितेन च तेन वा
यदुपस्थाप्यतेऽयंशाभावना। तत्र सौर्यवाक्येऽपेक्षितं इतिकर्तव्यतांशो गृह्यते। सर्वोपकारप्र
ष्ठभावेन। कथमिति चेदुपकारकपदार्थानां मांकांक्षा। न पदार्थमात्रस्य। प्रकृतौ ह्युपकारक
पदार्थानां क्लृप्तत्वात्तदर्थानां गृहीत्वा पश्चादुपकाराः कल्प्यन्ते। सौर्यवाक्ये तु कथमि
त्याकांक्षायां यथाग्नेयेऽप्युपकृतं तथा सौर्येऽप्युपकर्तव्यमित्युपकारे बुद्धिस्थे तेषु तत्साधनत्वेन
पदार्थान्वयः। तेन चाग्नेयपुरोडाशयागस्यादिभिरुपकृतस्य यागेन फलं कुर्यादिति कल्पितात्तद्देशसा
तच्छ्रुतवाक्यार्थः। एवं सर्वविधिदृष्टापोतिदेशेन श्रोधितान्यपदार्थानेरदृष्टेति। यच्चाप्यपूर्वविधयः स
न्निधौ सतीति तेषु क्लृप्तोपकारत्वान्न पूर्वं गृह्यन्ते। प्राकृततया गृह्णीतारं तु तदाकांक्षया गृह्य
ते। तत्र प्राकृताः पदार्थाः प्रकृतौ निराकांक्षा एव विकृत्याकांक्षया संबध्यन्त इति न तेषां यथोक्तं
प्रकरणं विनियोजकं। अपूर्वधर्माणां तु साकांक्षत्वेऽपि विकृतेः प्राकृतधर्मनिराकांक्षत्वान्न

तद्धि नियोजकं ॥ नुप्राकृतांगस्थाने विकृतावंगं विधीयते तत्प्रकरणेन गृह्यते। यथा सोमापौ
ष्णं त्रैतमालभेत पशुकाम इति विहिते सोमापूषदेवत्ये त्रिवर्णपशुरूपके यागे प्रकृतेर
ग्नीषोमीयपशुयागाद्यूपसाधनत्वात् खादिरत्वादि प्राप्तौ तत्स्थाने औदुंबरो यूपो भवतीत्यौ
दुंबरत्वं विहितं तद्यूपोद्देशेन विहितमपि यूपस्वरूपे वैयर्थ्यात् साकांक्षं खादिरत्वं प्रति साकांक्षया वि
कृत्या तत्स्थाने पतितत्वादगृह्यत इति प्रकरणेन विनियुज्यते। यत्तु प्राकृतांगानुवादेन विधीयते
यथा पशौ पृषदाज्येनानूयाजान् यजतीत्यनुयाजानुवादेन पृषदाज्यं तदपि प्रकरणेन गृह्य
ते। अनुयाजसाधनाकांक्षत्वाद्धि कृते विहितस्य च पृषदाज्यस्य तदुपकाराकांक्षत्वादितरो
पके। मिश्रास्त्वनुयाजसाधनान्यप्राप्यावि कृतो निराकांक्षत्वात्पृषदाज्यगतः पृषता गुणो
दधिमिश्रत्वरूपो विधीयमानो न प्रकरणग्राह्य इत्याहुः। यदपि प्राकृतांगानुवादेन विहि
तयोरंगयोर्मध्ये विहितमपूर्वमंगं तदपि प्रकरणेन गृह्यते। यथा वैश्वदेवीं सांग्रहणीं निर्व
पेद्ग्रामकाम इत्यनेन विश्वेदेवदेवत्ये सज्जातसंग्रहरूपग्रामफलकत्वेन सांग्रहणीसंज्ञके या
गे विहिते तत्रैष्टिकधर्मातिदेशप्राप्तयाज्यानुवाक्यानुवादेन विहितयोर्धर्मयोरंतरामननम

स्यामनस्यदेवाइतिनिस्यग्राऽतीजेहोतीत्यामनहोमाधिहितास्तोसाकांक्षाः स्रुवेनिर घर्मगृ
णार्थमनुवर्तमानाकांक्षयाविहितत्यागद्यतेइति। अंगभावनायाः कथंभावाकांक्षावानस्
करणं। तद्वाचनिकानांतत्संदंशापठितानांचग्राहकं। तद्भावेस्मा। गचिमनादीनामिति प्रागुक्तं।
कृपित्वसंबंधिव्यवधानात्तद्व्यवछिद्यते। यथादर्शपूर्णमासयोः पंचदशसामिधेनीरनुब्रूया
दितिविधायतासांत्रिः प्रथमामन्वाह त्रिरुत्तमामिति गुणंविधाय देवेद्धोमन्विद्ध इत्यादयोनिवि
न्मंत्राः पठितास्तात एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्येतिकाम्यसामिधेनीकल्पान्विधायोपव्य
यतेदेवलक्ष्ममेवतत्कुरुतइतियज्ञोपवीतंविहितं। ततोतरानुव्यसदेवत्वायेतिसामिधेनीगुणो
विहितः। तत्रोपवीतस्यसामिधेनीगुणसंदंशपाठेपिनतद्वांतरप्रकरणेनग्रहणं। निविन्मंत्रैस्सा
व्यवछेदात्। तेहिसामिधेनि प्रकाशकाःसामिधेनीवद्दर्शपूर्णमासांगनसामिधेन्यंगं। उक्तंच
गुणानांचपरार्थत्वादसंबंधः समत्वात्स्यादिति। तेनोपवीतंमहाप्रकरणाद्दर्शपूर्णमासांगं। न
चसामिधेनीकल्पानांफलार्थानांकथंभावाकांक्षयोपवीतंगृह्यतामितिवाच्यं। तेषांक्रत्वुपक
रणत्वेनांगानिराकांक्षत्वात्। यत्रहिनसामिधेन्याश्रितेकविंशत्यादिसंख्याफलायविधीयते। निवि
न्मंत्रैदातस्प्रकरणात्तदाश्रयत्वोभावोयोगातावाक्येनाश्रयत्वेन [illegible] दात। किंतुसंख्याविशिष्टान्यनुवच

मांतराणि फलाय विधीयंते। तानि यथासंख्यापुरोनुवचनत्वसामान्यान्निरस्य सामिधेन्यनुवचनादि-
ष्वतिभरतानीति तदीयधर्मैर्निराकांक्षाणि नोपवीतं गृह्णंति। न चैवं कर्मांतराण्यनुवचनानि प्रसिद्ध-
तास्त्रयस्त्रिंशदङ्गानि बहिः प्रयोगमर्हन्ति स्युरिति वाच्यं। अनुशब्दार्थस्य न मः प्रवत्रे इति निगदाने-
तर्यस्य मिथोकस्याग्नये समिध्यमानायानुब्रूहीति प्रैषानंतस्य प्राणकोमस्य वाभिर्यानुवचना र्य
ऽऽदिकत्रामस्य बहिः प्रयोगमसंभवात्। निगदशेषयोर्दर्शपूर्णमासांगत्वेन सामिधेन्यनुवच-
नेन पृथक्त्वसंभवात् तेनैषामतः प्रयोगमनुष्ठानं। तेन निविन्मंत्रैः काम्यसामिधेनीकल्पेश्च विहितं
सामिधेनीनां प्रकरणाम्नातमहाप्रकरणेनोपवीतं दर्शपूर्णमासांग। इदंपूर्वा सोऽधिन्यासा-
त्मकमिति राणके त्रिवृन्नवतत्वैकयज्ञोपवीतमेवेति मिथ्याः। एवं चासंबोधनत्वं विधानाभा-
वेवांतरप्रकरणाद्विनियोजकमिति संक्षेपः। देशसामान्यं स्थानं द्वेधा तत्र पाठदेशसामा-
न्यमनुष्ठानदेशसामान्यं च। आद्यं द्वेधा यथासंख्यपाठरूपं सन्निधिपाठरूपं च। तत्र प-
यानां यथायाज्यानां समिधः समिधोऽग्न आज्यस्य व्यन्तु पाद्यः पंचमन्त्राः। यथासंख्यपा-
ठरूपदेशसामान्येन प्रथमस्य प्रथमो द्वितीयस्य द्वितीय इत्येवमंगांगिभावे इति काम्येष्ट्युदाहरण-
रूपं प्राह। अग्नयेऽभीकामाय पुरोडाशमष्टाकपालं निर्वपेदित्यादिवाक्यविहितासु नवसु इष्टि-

कुस्नोऽत्रानुहोत्यग्नये स्वाहा कृत्तिकाभ्यः स्वाहेत्यादिवाक्यविहितोपहोमानां सन्निधिपाठरूपदेशसामान्येन
नक्षत्रेष्टिगताः। ज्योतिष्टोमे चतुर्थेऽह्न्यौपवसथ्ये हि पशुधर्मा उपाकरणनियोजनादयः पठिताः। दी
क्षाकालत्यग्नीषोमीयपशुमालभेतेत्यग्नीषोमीयपशुयागो विहितः। स एष औपवसथ्येऽह्न्यालब्धव्य
इति वचनाच्चतुर्थेऽह्न्यनुष्ठीयते। तस्यागमनुष्ठानसादेश्यसामान्येन पशुधर्माः। अतश्चोपहोमादीनांप
लाकांक्षयाप्राप्तानामनिराकांक्षाणामपि विकृतीनां कथंभावाकांक्षारूपं प्रकरणं प्रकल्प्योपहोमादी
विधीनां विकृतिविध्येकवाक्यतारूपं वाक्यं प्रकल्प्य फलवदुपकारकत्वरूपसामर्थ्यं निष्कल्प्यानुपहोमादी
ना[illegible]येष्टिर्नक्षत्रेष्टिमुपकुर्यादिति श्रुतिं प्रकल्प्याङ्गत्वबोधात्प्रकरणादिवनुष्टपकल्प्यनेन स्थानं
विनियोजकं। समाख्या यौगिकः शब्दः। सा द्विधा। लौकिकी वैदिकी च। लौकिक्याध्वर्यवादिसमाख्या।
स्ववाच्यपदार्थानामध्वर्योश्च सन्निधिं प्रकल्प्य पंक्तौ सन्निहितयोश्च परस्पराकांक्षयैकवाक्यत्वं प्र
कल्प्य सामर्थ्यं च। अतोऽध्वर्युरिमा कुर्यादिति श्रुतिकल्पनेनाध्वर्योस्तत्पदार्थाङ्गत्वं बोधयति।
एवं होत्रादिसमाख्यापि। वैदिकी च होतृचमसादिसमाख्या चमसपदवाच्यपात्रस्थसोमरसभक्षणां
गत्वं होत्रादेः स्थानादिकल्पनद्वारा बोधयति। इयं च न सर्वबाधिनी किंतु विशेषबाधिनी[illegible]प्राक्
एषां च श्रुत्यादीनां पूर्वं परस्माद्बलीयः। यथैन्द्र्या गार्हपत्यमुपतिष्ठत इत्यत्र निवेशनः संगमनो वसू

नोभिक्तिभाब्योक्तायाः कदाचनस्तरीरसीतिवार्त्तिकोक्तायाश्चेऽप्रकाशकसामर्थ्याद्दर्शपूर्णमास
प्रकरणगतेऽभिधानांगत्वे प्राप्ते सत्तीपाश्रुत्यागार्हपत्याभिधानांगत्वं लिंगस्य श्रुतिकल्पनद्वा
राविनियोजकत्वेन दौर्बल्यात्तस्योनेते सदनं कृणोमि घृतस्य धारया सुशेवं कल्पयामि तस्मिन्सी
दामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान इति दर्शपूर्णमासप्रकरणपठितस्य मंत्रस्य पदै
कवाक्यतारूपवाक्येन पुरोडाशसदनसादनांगत्वे प्राप्ते लिंगेन पूर्वभागः सदनांगमुत्तरः साद
नांगमिति विभज्य विनियोगः। वाक्यस्य लिंगश्रुतिकल्पनद्वाराविनियोजकत्वेन श्रुतिमात्रकल्प्य
लिंगाद्दौर्बल्यात्। एवं हविष्कृदेहीति त्रिरवघ्नन्नाह्वयतीति दर्शपूर्णमासस्थवाक्ये हविष्कृदेहीति
मंत्रस्य वाक्यादवघातांगत्वे लैंगिकेनाह्वानांगत्वेन बाध्यते। आह्वयतीति लिंगप्राप्तानुवा
दोऽवघातसंबंधित्रिरभ्यासमात्रपरत्वाद्वाक्यस्य। पेषांत्विति करणाः श्रुतिस्तेषामपि नतो
तमवघातांगत्वं। त्रिरभ्यासं परे वाक्ये तस्याविधेर्वाक्यभेदात्। लैंगिकाह्वानसंबंधानुवादे
नीतु श्रुतिरिति। दर्शपूर्णमा॥ विधि॥ सूक्तवाकनिगदइंद्राग्नीइदंहविरजुषेतामवीवृधे
तां महो ज्यायोऽक्रातामिति मंत्रेऽइंद्राग्नीपदस्य लिंगात्सामर्थ्ये सति तदेकवाक्यतारूपवाक्ये

नेदं हविरित्यादीनामपि प्रदर्शार्गत्वं । ननु प्रकरणात् पूर्णमासांगत्वमपि । प्रकरणस्य वाक्यादित्रयकल्प
न द्वारा विनियोजकत्वेन दौर्बल्यात् । अस्ति राजसूयो नाम इष्टिपशुसोमयागसमूहः । अनुमत्याद्य
ष्टयः सप्तदश पशवः पवित्राद्याः सोमयागाः । स च राजसूयेन स्वाराज्यकामो यजेतेति फलाय विधी
यते तत्प्रकरणे चाभिषेचनीयाख्यसोमयागसन्निधौ विदेवनादयो धर्मा विहिताः । अक्षैर्दीव्यति राजन्यं
[illegible] जिनाति शौनःशेपमाख्यापयति अभिषिच्यत इति ते सन्निधिपाठरूपात् स्थानान्नाभिषेचनी
यांगं किन्तु प्रकरणाद्राजसूयांगं । स्थानस्य प्रकरणादिचतुष्टय प्रकल्प्य विनियोजकत्वेन दौर्बल्यात् ।
न च राजसूयस्य न प्रकरणमस्तीति इष्टीनां दर्शपूर्णमासविकृतित्वेन पशूनामग्नीषोमीयविकृतित्वे
न सोमानां ज्योतिष्टोमविकृतित्वेन कृतोपकारत्वात्तेषामितराकांक्षत्वादिति वाच्यं । राजसूयपदेन
रूपेणानिकाचितानिकान्यंगानि विहितानि स्वराजसूयापदवेनाऽसनातीत्यादीनि तत्र हणाल्पोद्दूतयः
कांक्षयातन्मध्यपातिनां विदेवनादीनामपि ग्रहणात् । दर्शपूर्णमासयोः पौरोडाशिके कांडे सान्ना
य्यपात्रे शुंधध्वं दैव्याय कर्मण इति मन्त्रः समाम्नातस्तस्य क्रमात्सान्नाय्यपात्रप्रोक्षणां
गत्वं न तु पौरोडाशिकसमाख्यया पुरोडाशपात्रप्रोक्षणांगत्वं । तस्याः स्थानादिकल्पनेन दौर्बल्यात् ।
एवं श्रुत्यादिभिर्लिंगवाक्यादिबाधः [illegible] लिंग x पंचक x वाक्याभ्यामेक ह

यन्यंगत्वं श्रौतेन क्रत्वंगत्वेन बाध्यते। ज्योतिष्टोमे तिस्रः साह्नस्योपसदो द्वादशाहीनस्येति श्रुतं तत्रा
ह्नासमोप्यमानत्वात्साह्नो ज्योतिष्टोमस्तस्य तिस्र उपसदो गं। अहीनशब्दरूढस्तस्य समूह इत्यादि अह्
ह्नः खः क्रतावित्यनुशासनादनुशिष्टोऽहर्गणवाची। स च द्विरात्रादिर्द्वादशाहान्तः। तत्र द्वादशोपसत्त्व
स्य लिंगप्रकरणाभ्यां ज्योतिष्टोमांगत्वमभिधाय श्रुतिसहितषष्ठीश्रुत्यवगतेन द्वादशाहांगत्वेन बाध्य
ते। यदा तु द्वादशाहप्रकरणाभिहितस्य द्वादशोपसत्त्वस्यायमनुवादस्त्र्युपसत्त्वस्यार्थ इष्यते तदान्यदु
दाहरणं। तत्रैव पुरोहितः स्वर्चेर्षतीति हि पौर्यजमानयोः प्रतिपदं रूपाद्दिति श्रुतं। ज्योतिष्टोमिके ह्ययज
मानप्रयोगे प्रकरणेन स्तोत्रार्थाकर्मांगयमंग प्रतीयते। ज्योतिष्टोमे च कर्तुरेकत्वाद्यजमानप्रयोगा
भावाद्विस्तावे तेन राजपुरोहितौ सायुज्यकामौ यजेयातामिति कृत्वा पाठ्ये यत्ने श्रूयमाणा प्रकरणं बाधित्वा
गं। तत्रैवाग्नीषोमीयपशुयागसन्निधौ यूपपरिव्ययणार्थरशनातच्छमाश्चिदर्भमयीत्वादयः श्रुता
स्तत्स्थानादग्नीषोमीयांगरशनया यूपं परिव्ययते इति द्वितीयाश्रुत्या तु रशनया यूपार्थत्वात्तच्छमाग्नी
षोमीयपश्वर्थत्वाद्यूपस्य च दीक्षासु यूपं छिनत्तीति दीक्षाकालेऽग्नीषोमीयप्रयोगाद्बहिरुत्पन्नत्वेन ज्योति
ष्टोमांगाग्नीषोमीयसवनीयानूबंध्याख्यपशुयागत्रयसाधारणत्वाद्रशनातद्धर्माणां प्रकृतिस्तु प्रकरणात्। द
र्शपूर्णमासयोः पौरोडाशिके काण्डे इषे त्वेति मंत्रः श्रुतः। तस्य समाख्यया पौरोडाशयागांगत्वं इषे त्वेति शाखां

छिन्नत्तीति द्वितीया अस्यानुसान्नाय्यांगत्वासस्यार्थत्वावगमाद्बाध्यते। लिंगेन प्रकरणं बाधितं सक्तपदानुमं
त्रणमंत्रस्य प्रकरणाद्दर्शपूर्णमासांगत्वे लिंगात्तु हृदयांगगता। उपहूतउपहूयस्वेति ज्योतिष्टोमे अनूतयो
मंत्रयोः क्रमात्प्रथमस्यानुज्ञापनार्थता द्वितीयास्यानुज्ञार्थता प्रतीयते लिंगात्तु द्वितीयोनुज्ञापनार्थ प्रथम
स्त्वनुज्ञानार्थ इति लिंगेन स्थानबाधः। तत्रैव भक्षेहि मादिशेत्यादिर्मधुमतउपहूतस्योपहूतो भक्षयामी
त्यतो भक्षानुवाकः श्रुतः स लिंगसमाख्याभ्यां सोमभक्षणांगं। तत्र प्राग्निनोस्त्वा वाकूभ्यां सख्या संभि
तिग्रहणाभिधायिवदयवः। मृपक्षाग्नेर्वदस्य घभिस्वेक्षणाभिधायी। हिन्वमे गात्राहरिव इत्यादि मनिना
ह्यग्निर्भाग इत्येतः सम्यक्जरणाभिधायी। तत्र ग्रहणादीनां मंत्रप्रकाशत्वासंभवात्समा
ख्यया ग्रहणादिप्रकाशनपरा भक्षणांगमेवायं प्रतीयते लिंगात्तु तदर्थता। सत्यपि ग्रहणादीनामभि
धाने भक्षणार्थापि स्याग्रहणावेक्षयोः प्राप्तिः। नहि ग्रहणावेक्षणाभ्यां विना भक्षयितुं शक्यं
भक्षणस्य च सम्यग्जरणापलब्धस्येव तेषां सिद्धस्य सोमप्रतिपत्यर्थत्वे न विधानात्सम्यक्जरणस्या
प्यस्येव प्राप्तिः। प्रतीभक्षणादिधर्मं वैतानिगोचरयति। पदार्थापत्तिकल्पितविध्यन्तरस्वीकारे तो ता
न्निविधीयते। नच सम्यक्जरणं मस्य साध्यं यदभिधेयं। तस्यासनादिविशिष्टस्य साध्यत्वात् प्राप्तेरेव
यावत्तु पाणामोमस्यन वल्लिलयवयलोन मि प्रकाशनापत्तिस्यात्। सत्य साध्यत्वेनाविधेयत्वात् मंत्र

प्रकाशनमर्हत्वात् । किंतु तस्य लक्षणाप्रकाशनार्थः । ग्रहणादीनामेतदङ्गतानुपपत्त्या । लिङ्गेन समा
ख्याबाधः । वाक्येन स्थानबाधस्य त्वाह एवं स्वरूपसाधनत्वेनावगतस्य सन्निधिनोसाधुनीभूता
नेकद्रव्येषु प्रसक्तौ वाक्यादेकहायन्यां निवेशः । वाक्येन समाख्याबाधस्य पञ्चमानस्य याज्यैवेथा
क्या पञ्चमानेन याज्याया प्यातेन होत्रसमाख्यायाः बाधः । प्रकरणेन समाख्याबाधस्य पौरोडाशिक
काण्डसमाम्नातानां पात्राणां समाख्यया पुरोडाशपात्रत्वे प्रसक्ते प्रकरणात् षड्पात्राङ्गत्वं । क्व
चिद्देशमानेर्थक्यप्रतिहतानां विपरीतबलाबलमवगन्तव्यम् तच्च वक्ष्याम इति संक्षेपः । विनियोगवि
धौ यदुद्देश्यं तद्विशेषणमविवक्षितं । यथा ग्रहं संमार्ष्टीति प्रागुक्ते विधौ ग्रहगतमेकत्वं तद्विवक्षाया
वाक्यभेदात् । ग्रहं संमृज्यादेवैकमिति ग्रहस्य सम्मार्गं संबध्येयाविध्यावृत्तेः । प्रकरणोपनिपातितसंख्या
नां ग्रहाणामिहानुवादादनपेक्षितसंख्यत्वेन तद्व्यपोहात् । सर्वथैवोद्देश्यस्य यथाप्राप्तस्यानुवादाद
नपेक्षितं विशेषणमतएवाविवक्षितं विध्यनन्वयिकर्मधिकृतमिह भासमानं घटते । यतिग्रहमेकत्वस्याविधाना
न सोऽयं पशुविधेयमुद्देश्यविशेषणं तद्विवक्षितमेव । यथाष्टवर्षं ब्राह्मणमुपनयीतेत्यत्र ब्राह्मणस्योपनयप
नयार्थीप्सितीयाश्रुत्यास्वकार्यत्वेनोद्देश्यत्वात् तद्विशेषणमष्टवर्षत्वमुपस्थापयत्वाद्विवक्षितमेवेति राणकः ।
विधायकं तदप्युद्देश्यदशायामविवक्षितं । यदा तु तमध्यापयीतेत्यादिमनुवाक्ये ध्यापनस्य स्वार्थत्वेन प्राप्तस्या
विधेयस्यासाधीयीत इत्येवं प्राप्तं ब्राह्मणकर्तृकाध्यापनविधिपरे ब्राह्मणस्योपादेयत्वेन तद्विवक्षितं गम्ये

त्रिपेवता

९ स्यात्‌। आर्त्तिमात्रस्य निमित्तत्वे न निमित्तत्वायोगात्‌ अप्याहृतविषयादिविशेषणं तावतानुनिमित्तबुद्धिपर्यवसानात्‌ ओमपत्येष वसिते ४

देवी

वर्षः पुमानुपनीतो ब्राह्मण एव तत्र वद्महि ह्याध्ययने कर्ता उपनयनं चाध्ययनांगं कर्तृविशेषणं न तयोः। तत्राधिस
एवकर्ता इत्याद्युः। एवं चैव पशोभयं हविहि आर्त्तिमाच्छेदे द्व चपशरावमोदनं निर्वपेदिति मान्नायहविर्दिर्या नैमि
निमित्ते प्रायश्चित्तं विधीयते। तत्रोभयार्त्तितद्विशेषणमुभयत्वम्‌ विवक्षितं। तेनैक हविरार्त्तावपि प्रायश्चित्त
भवति। न चैवमार्त्तिमात्रं निमित्तं हविस्तु विशेषणत्वादविवक्षितं। वक्तं तत्स्यात्‌ सायं दोहा गौ आत दोहा गौ व पु
थक्‌ प्रायश्चित्तं विधायस्थ तौ स्मिन्नेकोदुभयोर्नित्युद्देश्य प्रायश्चित्तं विधीयते। हविरार्त्तिस्तु प्राधिकारे प्रमान
पतेते न विवक्षितमेवोभयत्वं। एवमन्ना प्रायश्चित्त विध्यभावं मत्वा नु भयस्या विवक्षोच्यते। इति तत्र रहनो। ध्रुव
गे निमित्तरूपो देश्य विशेषणमपि नैमित्तिकरूपपर्यायोबनया विवक्षितं भवति। यथा यस्योभावग्नी
अनुगता वभि निम्रोचेद्वाभ्युदियाद्वा पुनराधेयं तस्य प्रायश्चित्तिरिति वा कयोगाह यस्याहवनीयरूपाग्निद्वय
नुगमोपलक्षितस्य यस्योदयनिमित्तकपुनराधेयादिविधि परे निमित्तविशेषणोभयत्वादि वक्षायां आलापां
नैमित्तिकस्याधानस्य सतेहितोभयज्जनकत्वाद् उभयाग्निनाश एव निमित्तं यतीयते तेन विनियोगविधाव
प पदोपात्तं भिन्नपदोपात्तं वोद्देश्य विशेषणम्‌ विवक्षितं। उपादेयविशेषणं तु विवक्षितं। यथाग्नीषो
मीयं पशुमालभेतेति ज्योतिष्टोमप्रकरणस्थे वाक्ये एकत्वादिकं विवक्षितं हि इत्यदेवतासंबंधवत्‌ लिंगतो
यागोविधीयते। अग्नीषोमीयेन पशुना यजेतेति। आलंभस्य पशोत्र यागसाधनत्वे न च पशो

रूपादेयत्वात्तद्गतासंख्या विवक्षिता। तद्विधौ वाक्यभेदाभावात्। अत्र प्रातिपदिकार्थः पशुः पुरुषश्च त्या। द्वि
तीयैकवचनार्थः संख्या नादेशार्थः पुंस्त्वं वैकाभिधानश्च स्वाकरणकारकेण संबध्यते। विशिष्टस्य का
रकं यागांगत्वेन विधीयते। कारकद्वारा च यागांगयोः पुंस्त्वैकत्वयोः परिच्छेद्यपरिच्छेदकाकांक्षायां
मेकक्रियान्वये पादन्योन्यनियमो भवतीति न वाक्यभेदः। उद्देश्यताविशेषणयोस्त्वेकक्रियान्वयेति गुणत्वाभावा
न्नतत्रान्योन्यनियमः संभवी। प्रकृते ताभ्यां गुणभूतक्रियायां नेतरत्वात् वशीकाराक्रियायां
मितिनिमित्तो वाक्यभेद इति वैलक्षण्यं। उपादेयस्य विशेषणानां तु प्राप्तत्वात् विनियोगविशेषणत्वेनैतदाकांक्ष
त्वाच्च तद्विशिष्टस्यैव क्रियया वशीकाराद्वाक्यभेदः। एवमनुग्राह्योपुनर्नोतिविद्धिलेव संतापकोपित्वालनोल
भेतेति बहुत्वं विवक्षितं बहुत्वं वा स्वगतिपत्रभूतादि साधकमानांतरं चैत्यत्र वपर्यवस्यति। उपादानलाघव
न्यायात्। चीनमनुपादायकलुरादीनामुपादानासंभवात्। चित्रमेव ता यथा द्विधियोगो चरयति। संख्यावल्लिंग
मप्युपादेयविशेषणं विवक्षितं यथाग्नीषोमीयपशोः तस्य पशुत्वं तरी यथा वेष्य पुल्लिंगं। सारस्वती मेषीति स्त्री
त्वं। एवं सर्वं भावादेयविशेषणं विवक्षितमिति संक्षेपः। उसन्तस्येष्टसामान्येविनियोगः स्वकर्मणा फ
लेविशेषसंबंधबोधनेन पुंसः फलभोक्तृत्वरूपमधिकारः। पोबोधयति सोधिकारविधिः। यथा
उपधिः करणं कारः। भावे घञ्। कर्माभिरूपकरणकर्मजन्यफलभोक्तृत्वं। यथा सोमेन यजेत स्वर्गकामस्यागस्य
ज्योतिष्टोमेन स्वर्गकामो यजेतेत्युत्पन्नस्य यागस्य फलविशेषसंबंधः क्रियते स्वर्गकामस्य चाधिकारो बोध्यते। एवं

कस्यैवाग्न्याधेयफलस्य तत्तत्कामावाप्तिर्यंते सर्वेभ्यः कामेभ्योऽग्न्याधेयमिति श्रोमइत्यनेनैव सर्वफलसंबंधः। किंच प
ति। एतेनैव स्वर्गस्य संबंधसंभवेऽपि गोबलीवर्दन्यायेन भिन्नाधिकरणत्वकल्पनेनोभयोरर्थविचारः स्वर्ग
कामस्य विधेनैव स्वर्गसाधनत्वेन लाभात् स्वर्गजनकपृतीति निपमकं न्यानाथ्या। एवमाग्नेयादिषाङ्योल
ानां षण्णां यागानां दर्शपूर्णमासाभ्यां स्वर्गकामो यजेतेति। एकैकस्यैवान्याद्दृष्टपः कामानापा
यंते सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ। इत्येताभ्यां वाक्याभ्यां फलसंबंधः। सर्वफलार्थयोश्च दर्शपूर्णमासौ
भ्योऽग्निहोत्रमपरे कस्मिन्प्रयोग एकं फलं भावयतो उद्देश्यानां फलानां साहित्यस्याविवक्षितत्वात्। निरपेक्षा नैकफ
लजनकस्य वस्तुन एकप्रयोग एकफलजनकत्वं यथा लोके दृष्टत्वात्। न हि मसिरेकप्रयोगे पटौस्य जन
ति। वैदिकमपि कर्मैकमेव फलं समस्तप्रयोगे जनयति। अन्यथा एकप्रयोगे सार्वदिष्टफलं लभ्येत
ति न काम्यकर्म पुनरावर्तेत। कामनवशात्तु फलनियमः। फलानि हि त्रिविधानि ऐहिकामुष्मिकोभयरू
पाणि। तत्राचम्नाद्यन्नस्य शोषकारीर्या यजेत वृष्टिकामः इति चितापाः कारीर्याः फलमैहिकमेव।
नातेष्टिजन्यं पुत्रेगतपूतत्वादिति वा। श्येनाद्भिन्न्योऽभिचारश्च या पैव काम्यनामदत्याः। स्वर्गस्त्वामुष्मि
क एव। तादृशस्य स्वर्गस्येह भोगासंभवात्। पुत्रपश्वादिकं त्वैहिकामुष्मिकं च। न हि तद्देशान्तरमेव योग्य ऐहि
मैथुनादिकारणान्वयत्वात्। पुत्रकामेष्ट्यादौ क्षते प्रतिबंधकपापनिवृत्तावि होस्यन्तिः। सति प्रतिबंधके का
लान्तर इति। तच्च मतिवैचित्र्यालोके किंचिदेव काम्यते। काम्यमानं च फलं लेन संबध्यते। नाकाम्यमानमिति।

मान

२७

ता४

नसर्वेषांयोगपद्यं। येषांतुकस्यचिज्ज्ञातातेषामपिनयुगपदुत्पत्तिः। पूर्वोक्तकर्मस्वाभाव्यादितिमिश्राः।
राणकेतुविरुद्धानांकामानांयुगपदनुपपत्तिरविरुद्धानांपुत्रपश्वादीनांकाम्यमानानांयुगपदुत्पत्तिरे
वेत्युक्तं। अतस्तत्फलकामस्याधिकारः। एवंसर्वफलार्थगंगास्नानादिष्वपिबोध्यं। जातेष्ट्यादौतुसंहितपू
तत्वादिकामस्याधिकारः। अर्थवादोपस्थितानांतेषांसहितानामेवफलत्वकल्पनात्। एवंमग्निहोत्रेहोम
स्याग्निहोत्रंजुहुयात्स्वर्गकामइत्यनेनफलसंबंधेस्वर्गकामस्याधिकारः। एषुसर्वकर्मसुमनुष्याणामम
धिकारोनान्येषांसामर्थ्याभावात्। तिरश्चांतावद्धर्मज्ञानाभावात्कालांतरीयफलज्ञानाभावाच्चनाधि
कारः। देवतानांदेवतोद्देशासंभवात्। नहीन्द्रोद्देशेनत्यक्तुंशक्यतेतदानीमिंद्रांतरासंभवाद्ब्रह्म
नीतस्यचेंद्रत्वाभावात्स्वोद्देशेनचस्वस्यत्यागासंभवाच्च। महाभावाद्व्रतेषांतिपादकानांमंत्रार्थवा
दानांचवक्ष्यमाणन्यायेनस्वरूपार्थतात्पर्याभावात्। ऋषीणामार्षेयवरणाभावादनधिकारइ
तिभाष्यवार्त्तिककृतौ। तेनासंस्कारेषुग्वादेः पूर्वपूर्वभृग्वादिवरणासंभवाद्दत्वेवाधिकारइ
तिसिद्धं। मनुष्येष्वपिनांधपंग्वादीनां। अंधस्याज्यावेक्षणासंभवात्। पंगोर्विष्णुक्रमणासं
भवात्। बधिरस्यवाचनासंभवात्। मूकस्यमंत्रोच्चारणासंभवात्। काणस्यत्वधिकारः। के
चित्तुचक्षुर्वैव्यासत्याहतेत्याहितस्योत्पन्नचक्षुःकाणस्यनाधिकारइत्याहुः। ननुयथाधि

कारमंगविनियोगात्स्वर्गकामशब्दाच्च सर्वाधिकारप्रतीतेर्यस्य यत्राशक्तिस्तत्तं प्रत्यविहितमेवा न
स्मादुह्यितः क्रतुः फलजनक इति। मैवं। यदि कुरूपार्थतया गोपदेशः स्यात्तदा यथापुरुषाधिकारमंग
विनियोगः कल्प्येत श्रुत्यादिभिः क्रत्वर्थतया गोपदेशात्सर्वांगयुक्तस्य क्रतोः फलार्थत्वावगतेस्ता
दृगनुष्ठानसमर्थमेवाधिकारिणं स्वर्गकामशब्दोवलंबते। तथा स्वर्गकामशब्दोपपदो नित्य
वच्छुतानामंगवाक्यानां पाक्षिकत्वमन्याय्यं। तेन यथाविनियोगमधिकार इति सर्वांगोसमर्थ
स्याधिकारः। नित्ये नैमित्तिके च फलनिमित्तश्रुतिविरोधाद्यथाशक्ति प्रयोगेप्यधिका ×पसंहार× रः।
यावज्जीवमग्निहोत्रं जुहुयात्। यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्यत्र मुख्यश्रुत्या निमित्त
त्वेनानुक्तेः। वसंते वसंते ज्योतिष्टोमेन यजेतेत्यत्र सकलस्याव संतस्य निमित्तत्वं। अत एव वीप्सानुवादः संग
च्छते। तत्र प्रतिनिमित्तं नैमित्तिकमवश्यं कार्यं सर्वांगयुक्तं च कार्यमिति परवाक्यार्थविधिप्रसंगात्। यथा
शक्तिस्तूपपद्यत इति वक्ष्यामः। एवं महदल्पस्याप्यधिकारः। जीवनार्थमर्जनस्यावश्यकत्वेन तन्मेव क्र
त्वनुष्ठानसंभवात्। न चैवं द्रव्यार्जनं क्रत्वर्थं तत्र श्रुत्यादिप्रमाणाभावात्। प्रत्यक्षेण पुरुषार्थ
समर्थत्वाच्च। ब्राह्मणस्य प्रतिग्रहादिना राजन्यस्य जयादिना वैश्यस्य कृष्यादिनेति नियमा मुद्र

यार्जनाश्रितादृष्टं कल्प्यते। भोजनाश्रितादिव प्राचुर्यत्वादिनियमात्। पुरुषार्थेन तु द्रव्यार्जनेन य
था पुरुषकार्यं भोजनादि निर्वर्त्यते तथा क्रतुरपि। एवं चाढ्यस्य पुरुषार्थार्जनावश्यंभावात् तेनैव क्र
तावप्यधिकारः। एवमङ्गहीनस्यापि तत्प्रतिसमाधानेनाधिकारः। यस्य त्वप्रतिसमाधेयत्वं मङ्गवैक
ल्यं तस्य काम्येष्वनधिकारः। नित्येष्वाहिताग्निः श्रुत्यधिक्रियते त्वाधानस्य त्वन्यार्थतया काम्यत्वाभावे
नाधिकारः। यस्य नाहिताग्नेः प्रायश्चित्तं च स्मर्यते तद्व्यतिरिक्तनित्यफलकरणानिमित्तं न त्वाधानाकर
णनिमित्तमिति मिश्राः। यस्तु त्वाधानस्यापि फलतो नित्यत्वादन्यैवाधिकारः। एवं त्र्यार्षेयवरण
समर्थस्यैवाधिकारः। दर्शपूर्णमासयोरार्षेयं वृणीत इति विधाय एकं वृणीते द्वौ वृणीते त्रीन् वृणी
ते न चतुरो वृणीते न पञ्चाति प्रवृणीत इति वाक्यान्निषिध्यते सर्वेषां त्रैविध्यात् कल्प्यमानो विधिर्वि
कल्पत्वसिद्ध्यै त्रीन् वृणीत इत्यस्यैव कल्प्यते। तथा चैकत्वद्वित्वयोरपि पुंसानुवादः सिध्यति।
विषमेकत्वद्वित्वयोः प्रसक्त्यात्। निषेधो तु नित्यानुवादो वित्येव धार्यत्वं। तेन एकद्व्यार्षेययोरनधिकार एव।
चतुरार्षेयादीनां तु त्र्यार्षेयवरणं नैवोक्तम्। एवमध्ययनसिद्धार्थज्ञानवत एवाधिकारः। अग्नीनामा
धेयेषु वाधानसिद्धानि मूर्तये वाक्यविधययोः लिङ्ग्यर्थज्ञानापेक्षात्वयापि विध्यन्तरसिद्धत्वं ग्रहणेन
लोकाधानस्य यते प्रकुर्वते। यत एव त्रैवर्णिकानामेवाध्ययनाधानविधानादधिकारो न शूद्रस्य।

अध्ययनं च यो निर्दिष्टः किं तर्हि प्रस्तुतानुपनीतान्त्रैवर्णिकान्कर्तृत्वेन गच्छतीति । आधानं तु त्रैवर्णि
कानामेव विहितं । वसन्ते ब्राह्मणोऽग्नीनादधीत ग्रीष्मे राजन्यः शरदि वैश्य इति । ननु वर्षासु र
थकारोऽग्नीनादधीतेति रथकारस्य सौधन्वनापरपर्यायजातिविशेषस्याप्याधानं विधीय
ते । न वरथं करोतीति व्युत्पत्त्या त्रैवर्णिकानामेव रथकरणे निमित्ते नित्यवसन्तादिकालबाध
नवर्षाविधानार्थमिति वाच्यं । योगाद्रूढिर्बलीयसी रूढ्या रथकारशब्देन जातिविशेषस्य
प्रतीतेः । आप्यायां वैश्यां तु जायते वैश्यापासुप न्वाधार्य एव च । रूपभर्थद्विजन्मा व मैत्रसा
त्यत एव चैति स्मृति प्रसिद्धा ब्राह्मवैश्योत्पन्नजातिविशेषस्यैवात्र ग्रहणात् । यत्त
माहिष्येण करण्यां तु रथकारः प्रजायते । माहिष्यो गौड प्रजा पेतो विदू श्रुद्रागनयोनृपात्
श्रद्वायां करणो वैश्यादित्युक्तेर् रथकारस्यानुलोमत्वेनाधानादिसद्भावात्सौधन्वनादिपर्या
पर्याभावाद्गुनान ग्रहणमिति निमथा । कल्पतरौ तु विधाधाने मंत्राम्नाना सौधन्वना
क्रभव इति वेदस्य पुनाधिकरण्यात्सौधन्वन भृगु पपापिस्येहाधिकारः । वचनाबलतदुप
पिकार्थस्नानाय शेषः । अतः कथं त्रैवर्णिकानामेवाधिकार इति । सत्यं । उत्तरकल्पमुपवचनाभावे

२९

नतस्यानधिकारात्। किंतु विश्वजिन्न्याये न स्वर्गः फलं विधीयते। अग्नीनां त्वनीप्सितकर्मत्वं। अनस्तन्नो
तरक्रत्वधिकारप्रसंजकमिति त्रैवर्णिकानामेव तादृशाविधानात्सिध्यत्यधिकारः। नन्वेवं स्त्रि
या नाधिकारः स्यात्। अध्ययनस्योपनीतपुमधिकारत्वेन तस्मिन्नर्थज्ञानाभावात्। आधानस्य
च पुंकर्तृत्वेन श्रवणात्तस्मिन्नप्यग्न्यभावाच्चेति चेत्। मैवं। एवं पत्न्या नास्त्येवाधिकारः। मन्त्रैः सह हवि
ष्यतोः स्वस्व द्रव्यत्वादुभयोरप्यत्यागसंभवात्। केवलपिकर्मसु पृथक्कर्तृत्वाभावात्। न भर्त्रादि
भर्त्रादिति विभागप्रतिषेधात्। श्रीनिदत्तादि स्त्रीधनं सत्येपि। भार्या दासश्च पुत्रश्च त्रय एते ह्यध
नाः स्मृताः इति स्वातंत्र्यनिषेधात्। पाणिग्रहणाद्धि सहत्वं कर्मसु परिग्रहेषु चेति स्मृतेश्च। यज
मानस्याप्यन्यमवेक्षते पत्न्याप्यन्यमवेक्षत इत्युभयकर्तृकत्वश्रवणाच्च। न चार्त्विग्वत्परिक्रयेण यज
मानः पत्नी सा च तस्य स्वप्रयोगे संपादयिष्यत इति वाच्यं। स्वामित्वं च न त्वा पत्नीयजमानशब्दयोः प
रिक्रयासंभवात्। पत्युर्नो यज्ञसंयोगे इत्यनुशासनात् च इत्स्वामिनी पत्नीशब्दो वदति। यजमानशब्दो
पि यजेर्णिचि प्रायेण क्रियाफलं विहितश्चानन्तरं फलभोक्तारं स्वामिनमेव बोधयति। तस्मादुभयोः सहाधि
कारः। तथा वाध्यानेक्षौमेवसानौ जायापती अग्निमादधीयातामित्युभयोः क्षौमवसनं नियमविधा

नेमं गच्छते। न चात्रौकाराभिहितं पुंद्वयं माधानांगत्वेन विधीयते येन दंपत्योः क्षौमविधानमिति वाच्यं। क्षौ
मशब्दस्यानर्थक्यापातात्। यं सन्तादिवाक्यप्राप्तेष्वाधाने क्षौमं पुंद्वयविधौ वाक्यभेदात्। अतः पा
क्षिकत्वात् क्षौमविधिः। औकारस्यापि पुंद्वयवत् स्त्रीपुंद्वयेपि प्रयुज्यते। कुक्कुटाविति। न चास्ति प्रमाणां
तरे पुंद्वयमभिधत्ते। अपि तु प्रमाणं स्त्रीपुंद्वयाभिधाने सहत्वबोधकं वाक्यं। अत एव क्षौमविधा
यकत्वाद्वाक्यस्य आवसानाविति प्रकरणप्राप्तस्त्रीपुंद्वयानुवाद इत्युभयोः क्षौमवसनविधानात् स
धिकारः। एवं चाविदुषा यजमानेन कृतकर्मोभयोः फलं ददातीति नापि धात्या स्त्रीव्यावृत्तिः। तस्या
त्पावदुक्तमाशीः ब्रह्मचर्यं चोभयवर्तीपावदुक्तमास्त्यावेक्षणादि। आशीः शब्देन फलाभिधायिना
तु प्रति [illegible] यह्योऽपेताऽजनकाः संस्काराः विवक्षिताः। तीर्थस्नानाभ्यंजनादयस्तोफलित्वादुभयो
र्भवंति। वपने तु पुंस एव। केशश्मश्रु वपत इति श्मश्रुपदस्यानाधिकरण्यात्। अथ हि स्त्र्यपि के
शश्मश्रुणोर्द्वितीयपद्याभिदेशे [illegible] तभाव्यनुपपत्तिकत्वेन संस्कार्यत्वायोगात्। तत्कर्म केवपनं प
त्नीतरपुरुषसंस्कारत्वेन विधीयते। किंच केशश्मश्रुणोः नीत्यितकर्मत्वे नोपादेयपोर्वचक्षिता
साहित्यत्वासुं [illegible] xx वक्ष्य यानश्च मोगिति। ब्रह्मचर्यं च मत्स्यादिवर्जीतपुरुषार्थब्रह्मचर्यमि

३ः

धोक्तत्वं च गतयापुनर्विहितं तदप्युभयोः। इदं च फलिसंस्काररूपमपि गोबलीवर्दन्यायेन पुनरुपात्तमिति
बोध्यं। यद्वा येन कर्मफलानि विवक्षितानि तान्युभयोर्भवन्तीति व्याख्याद्वयं तन्त्ररत्ने। वस्तुतस्त्वाशीः
शब्देन फलानि ब्रह्मवर्चपदेन सर्वफलिसंस्कारोपलक्षणमिति युक्तं। इतोन्यत्तु याजमानसमाख्याता
द्विद्वान्यजमान एव करिष्यतीति सिद्धः स्याधिकारः। मृतभार्यस्य तु भार्यायाः पूर्वं मरणे दत्वाग्नीन्नेतस्य क
र्मणो ल्येतस्य भावत्वं वै गन्यभावादनधिकारः। यद्वा लग्नमप्संमितं तदा वचनादग्निहोत्रेऽधिकारः। तदाङ्करप
त्नीकोप्यग्निहोत्रमाहरेदिति। ननु दर्शपूर्णमासादौ। तथात्ववहाराभावादिति तन्त्ररत्ने। कृषिशूद्रस्याप्य
धिकारः। यथा रौद्रं वास्तुमयं चरुं निर्वपेदेतया निषादस्थपतिं याजयेदिति वाक्यान्निषादस्य॥
अत्र हि याज्ञस्तवत्समर्थत्वेन प्राप्तत्वाद्यागाभिधोकर्मधारयसमासेन निषादाभिन्नः स्थपतिः स्वा
मी विधीयते। न च षष्ठीतत्पुरुषाश्रयणेन निषादस्वामी त्रैवर्णिक एव विद्वानग्निमत्वाभ्यामविधीयतां
मिति वाच्यं। तत्पुरुषे पूर्वपदे स्वपदार्थस्य लक्षणादलेन कर्मधारयाद्दौर्बल्यात्। कर्मधारये हि द्वौ
पदार्थावभेदसम्बन्धेना भासेते इति न काचिल्लक्षणा। तेन कर्मधारयबलीयस्त्वान्निषाद एव वचना
तावदर्थज्ञानं संपाद्य लौकिकाग्नावेष्टिं करिष्यतीति शूद्राधिकारः। साक्षाद्वचनाभावे तु त्रैवर्णिका

३०

३ः

नाग्नेवं विद्वान्नाग्निमन्ताभ्यामिति सिद्धं। तत्राग्निहोत्रादावेकस्यैव सस्त्रीकस्याधिकारो न द्वयोर्ब
हूनां वा सह। अधिकारिसमर्पकस्वर्गकामादिपदेषु प्रधानपुरुषगतत्वेन लिंगवत्संख्याया
अविवक्षितत्वेपि जुहुयादित्यादिकर्तृगतैकत्वस्य विवक्षितत्वात्। न चैवं स्त्रियाग्निप्रतिनिवृत्तिः। द
पत्योर्व्यासज्यवृत्तिकर्तृत्वादाख्यातेन च कर्तृत्वगतसंख्याभिधानात्। द्वित्वं च कर्तृत्वाधिष्ठान
गतसंख्याभिधानं तु लक्षणया। यथा क्षौमे वसानावग्निमादधीयातामित्यादौ। द्वयोस्तु द्वयोः पु
रुषयोरधिकारः। यथा कुलाययज्ञे तत्र एतेन राजपुरोहितौ सायुज्यकामौ यजेयातामिति द्वयोपान
योः राजपुरोहितयोराख्यातेन कर्तृत्वद्वित्वाभिधानात्। ननु भिन्नकल्पयोः राजपुरोहितयोः कथं
सहाधिकारः। तथा हि राज्ञो नाराशंस एव द्वितीयः प्रयाजः पुरोहितस्य तु ब्राह्मणस्य वासिष्ठशुनका
त्रिवध्र्यश्वगोत्रस्य स एव। अन्यगोत्रस्य तु तनूनपाद्वितीयः। तथा राज्ञः फलचमसो विहितः स यदि रा
जन्यं वैश्यं वा याजयेत्स यदि सोमं बिभक्षयिषेन्न्यग्रोधस्तिभीराहृत्य ताः संपिष्य दधन्युन्मृज्य
तमस्मै भक्षं प्रयच्छेन्न सोममिति। ४।५।। यद्यपि स्तिभिनीपदेन न्यग्रोधे स्तंबमानरूपाकारवत्फलं
गृह्यते। तथा वाक्यान्तरे न्यग्रोधोदुंबरफलसंपर्कस्य विहितत्वात्फलचमसशब्दः फलपरो ब्राह्मण

स्यतुल्यो भवच समासः। तथा बार्हद्गिरं ब्राह्मणस्य ब्रह्मसाम कुर्यात्पार्थुरश्मं राजन्यस्येत्यादि। तत्रान्यतर
कल्पानुष्ठाने नेतरस्य फलं सिध्येत् वैगुण्यात्। न चोभयं कर्तुं शक्यं। पंच प्रयाजा इत्यादिवदनुवादविरोधा
त्। तेन समानकल्पयोरेकराजसंबंधिनोः पुरोहितयोरेवाधिकारः। पुरोहिताविति ह्येकशेषस्य रा
जपदेन षष्ठीसमासः। अत तत्पुरुषस्य वैकशेषाद्भिन्नराजसंबंधिनोर्द्वयोः। अत कर्मधारयस्य वा एक
शेषाद्राज्ञोः पुरोहितयोः। उच्यते। षष्ठीसमासे पूर्वपदे लक्षणा स्यात्। कर्मधारये तु न काचिल्लक्षणेति बलवत्त्वात्तदा
श्रयणं। न चैकस्य राज्ञः पुरोहितद्वयमस्ति। पुरोहितं वृणीत इत्येकस्य वरणविधानात्। वरणकर्मीभूत
तस्यापि च पुरोहितस्य मानान्तरेणोपयोगाज्ञानात्। तेन पुरोहितेन इष्टं भावयेदिति वाक्यार्थकल्पनानु
पादेयस्य विवक्षितमेकत्वं। तत्पुरुषो वा परमेकशेषपक्षस्तु राजपदवैयर्थ्यादिना न न्याय्यः। राज्ञ एव पु
रोहितवरणविधानात्। कर्मधारयो हि राज्ञः पौरोहित्यविध्यभावात्। यद्यपि ब्राह्मणस्य तन्निषेध
केरपदत्वेऽप्यनुष्ठानादयुक्तः। तेन वचनाद्भिन्नकल्पयोरपि सहाधिकारः। क्वचिदनूनां सहाधिकारः।
यथा द्वादशाहादिसत्त्रेषु। चतुर्विंशतिपरमाः सप्तदशावराः सत्त्रमासीरन्निति द्वादशाहे श्रवणात्।
तात्र्यक्षतिस्तावद्गवामयनादीनां। य आसीरन्नुपेयुरिति चोदनात्सत्त्रं। यजतिचोदनात्सोऽहीन इस

हर्गणस्य द्वौ भेदौ। द्वादशाहस्य द्वादशाहमहर्द्विका माउदे पुण्ड्रद्वादशाहेन यजेत प्रजाकामं याजयेदिति विधिद्व
यात्र्द्विविधः सत्रसंज्ञोऽहीनसंज्ञश्च। तत्र सत्रात्मकद्वादशाहस्मृतौ त्रियोदशरात्रादीनि सत्राणि। अ
हीनात्मकद्वादशाहविकृतयश्च द्विरात्राहप्रभृत्येकादशरात्रपर्यन्ता अहीनाः। सत्रेषु बहुकर्तृत्वमेवोक्त्वा
क्याल् अहीनेषु एको द्वौ बहवो वा कर्त्तारः। कर्तॄणां चाधिकार इति बहूनामधिकारः। अत्र च समानकल्पा
नामेवाधिकारः। वासिष्ठानां नाराशंसः इत्यादिश्रुतिः यदि वासिष्ठादयः कर्तृत्वेन विधीयेरन् ततो वासिष्ठा वासिष्ठैः
क्रियमाणो नराशंसो वासिष्ठकर्तृको जात एवेति वैगुण्यात्सर्वदा फलं सिद्धमिति। यद्यपि श्रुतौ वासिष्ठानां
प्राधान्यावगतेस्तादर्थ्येन नाराशंसादयो विधीयन्ते। तादर्थ्यं च वासिष्ठाभिहितफलजनकीभूतत्वरूपधा
रणेति प्रकरणेनावगमान्न स्वतन्त्राद्दृष्टकल्पनाप्रसंगः। एवं च नाराशंसकरणे नैव वासिष्ठादीनां
तु फलसिद्धिः। ततो नपालोकरणेन वैगुण्यमिति नियमादेकपक्षाश्रयणे इतरेषां फलासिद्धेरुभा
योश्च संख्यादिविरोधे करणासंभवात्समानकल्पानामेवाधिकारः। तत्र च सत्रेषु ब्राह्मणानामेवाधि
कारः। ते हि यजमाना ऋत्विज इति ऋत्विक्शब्दलक्षितार्त्विज्यपदे यजमाना विधीयन्ते। प्रकृतौ च
ऋत्विज्ये यजमानभिन्नकर्तृकत्वं ब्राह्मणकर्तृकत्वं चार्त्विज्यस्यावगतं यद्यपि न ब्राह्मणानां विधि स

थाऽपि सर्वत्र ब्राह्मणानामेवार्त्विज्येऽधिकारः। एषां तु कर्मणा मस्यत्रीणि कर्माणि जीविका। याजन
नाध्यापने चैव विशुद्धाच्च प्रतिग्रह इति स्मृतेः। ब्राह्मणानामिदं हविः सोम्यानां सोमपीथिना
मित्याद्यैर्वैदिकलिंगात् परेषां शेषभक्षणप्रतिषेधाच्च। एवं ज्योतिष्टोमाद्येषु सत्रेषु तथैवा
तिदेशेनार्त्विज्ये ब्राह्मवचनेन भिन्नकर्तृकत्वे बोधितेऽपि ब्राह्मणकर्तृकत्वे बाधमानाभा
वाद्ब्राह्मणा एव यजमानाः स्युरिति तेषामेवाधिकारः। तत्रापि वैश्वामित्राणां तत्समान
कल्पानां चाधिकारः। वैश्वामित्रो होतेति वचनात्। यद्यपि वासिष्ठो ब्रह्मेत्यपि तत्र वचनं त
थापि य एव कश्चित् स्तोमभागानधीयीत स एव वासिष्ठ इति वाक्यान्तरेण वसिष्ठगोत्रत्वाना
दरकथनान्न तद्गोत्राणामधिकारः। तत्राप्याहिताग्नीनामेवाधिकारः। आधानविधिगता
त्मनेपदाद्धाधातुरेवाधानसाध्याग्निसाध्यक्रतुसाध्यानि फलानि भवन्तीति गम्यते। त
न सर्वेषामग्निषु संसृष्टेषु सत्तां सत्रं सर्वेषां फलदं भवतीति। अपत वा गृहपतेरेवाग्निषु
निर्मथ्यानि वपेरन्निति। तेन सत्रेषु ब्राह्मणानां वैश्वामित्रतत्समानकल्पानामाहिताग्नीनाम
धिकारः। ननु वैश्यस्य स्त्र्यादयनं सत्तके सत्रे नायं नियमः संभवति। एवं हि ताद्धिधिः। पंचपद्यारा

ताः स्त्रिवृताः संवत्सराः पंच पंचाशतः पंचदशाः पंच पंचाशतः सप्तदशाः पंच पंचाशत एकविंशा इति त्र
यस्त्रिवृत्स्तोमकानां संवत्सराणां पंचाशतः पंचेत्यर्थः । तेनेदं सार्धशतद्वयं । एवमुत्तरत्रापि । तेन स
हस्रसंवत्सरसाध्यमेतत्सत्रं न मनुष्याधिकारं भवति । तेषां शतायुर्वै पुरुष इति नियमात् । येन
ये पातावरायुः पुराणादिसिद्धगंधर्वादीनां तेषामेवात्राधिकारः । यदि तेषामपि निविप्राभावान्नाधिकारः
स्तदा रसायनसंपादितं तावदायुर्जामस्तां । पत्रापितत्पुत्रादिकुलं परंपरया समापनीयं । यद्वै तस्याचार
आदेवतावदायुर्भवतीति कल्पनीयं । नैतत्सक्षत्रयंयुक्तं । नहि रसायनस्यायुर्वृद्धिहेतुत्वं दृष्टं श्रुतं वा । कु
लकल्पे नैकस्यापि फलं सिध्येत् । यो ह्यारभ्य समापयति तस्य फलं । समाप्तिरेव हि शास्त्रार्थः । आरंभस्त
दर्थः पत्यैवाक्षेपस्य तद्इति न शास्त्रार्थो गौरवात् । यदि समाप्तेरारंभविनानुपपत्तेः पूर्वोपस्थितारंभ
स्य शास्त्रार्थता तदा भयोरपि सांगीकार्या । आरब्धास्समाप्तो हि प्राक्रमिकोयं कापुरुष इति शिष्टाधि
गर्हितः । तेषु प्रायश्चित्ते च श्रूयते । देवताभ्यो वा एव आवृश्च्यते यो यज्ञस्य संकल्प न यजते त्रैधातवीये
ष्टेवा फले ऽवश्यं समापनीयं । शिष्टाधिगर्हणार्थापत्ति कल्पितश्च समाप्यपक्षयोर्द्वयोर्न तत्समाप्तिविधानात् ।

लौकिकं तु गृहरथादिस्वारब्धं तन्नियोगेन समापनीयम्। शिष्टविगर्हणाभावात्। तेनारंभस
नार्थ्योः शास्त्रार्थत्वात्कुलकल्प्येऽप्युभयासंभवान्न कुलकल्प्यः। तृतीयस्तु निःप्रमाणत्वादे
वायुक्तः। तर्हि न पंचसहस्रसंख्या संवत्सराणां किंतु यजमानानां पंचपंचाशत्संख्या यजमाना:
स्त्रिवृत्स्तोमकं संवत्सरं कुर्युरित्यर्थः। एवमुत्तरत्रापि। तेन चतुःसंवत्सरमिदं सत्रं सहस्रयजमा
नसाध्यमिति। मैवं। संवत्सरसामानाधिकरण्येन श्रुतायाः संख्यायाः यजमानविशेषणत्वा
योगात्। चतुर्विंशतिपरमाः सप्तदशावराः इति श्रुतसंख्याबाधापत्तेश्च। तर्हि संवत्सरशब्दो ज
घन्यवृत्त्या दिनेषु कल्प्यतां। तत्र पौषे मासः संवत्सर इति कश्चिन्मासे संवत्सरशब्दप्रयोगात्तद्वचनापि त
त्पर एवास्तु। तत्रापि तु मनुष्याणामशक्तिरस्त्येव। न ह्युपनीतस्य कृताध्ययनस्य कृतविवाहस्य
कृताधानस्य पुनः सहस्रमासं जीवनं संभवति। तर्हि संवत्सरश्रुतिर्माघे द्वादशरात्रपरा इति क्वचित्प्र
योगाद्द्वादशरात्रिपरोऽस्तु। तदपि संवत्सरशब्दस्य द्वादशरात्रिषु प्रयोगाभावादसत्। तत्स्वेति मात्रेण भेद
संकीर्तनादयुक्तः। तस्मादस्मिन्सहस्रसंवत्सरसत्रेषु मनुष्याधिकारासंभवाद्गत्या गंधर्वादीनामेवा
धिकार एष्टव्य इति न पूर्वोक्तनियमोपपत्तिरिति। उच्यते। मनुष्याधिकारशास्त्रत्वात्पठितस्यास्य

तत्र
यो

शास्त्रस्य न गंधर्वाद्यधिकारकल्पनमुचितं। अग्निविद्याहीनत्वात्तेषां न सामर्थ्यमप्यस्ति। तेनायं सं
हृत्य संवत्सरशब्द एव त्रिवृद्द्वादशाब्दसामानाधिकरण्याद्दिवसेषु गौणः कल्प्यते। द्वादशाहे
त्रिवृद्द्वादशाब्दास्तास्तोमकदिवसवाचित्वेन दृष्टाः इहापि तत्सामानाधिकरण्यात्संवत्सरशब्दो
दिवसपरः कल्प्यते। तेनाविहितो मनुष्याधिकार इति ब्राह्मणाधिकारकाणि सत्राणि। अधुना क्षत्रि
यस्यैवाधिकारः। यथा राजा राजसूयेन स्वाराज्यकामो यजेतेति विहिते राजसूये राजपदं च रूढ्या क्ष
त्रियत्वजातिवाचि देशविशेषे प्रसिद्धं। तस्येदं कर्मेति च प्रजापालनादि राज्यपदेनोच्यते। वर्णा इह स
विहस्य पर्यंतपुरोहितादिभ्यो यागान्तिस्मरणाद्राज्यपदस्य तच्च पातात्। नन्वार्यावर्त्तदेशे राज्यपदं प्र
जापालनादिषु तत्रत्यैस्त्रैवर्णिकै राज्यपदं च प्रयुज्यते। न क्षत्रिय एव। अतस्तदनुरोधेन देशांतरप्रसिद्धि
र्नादर्त्तव्या। स्मृतिरपि साधुत्वानुशासनमात्रार्थेति राज्यपदरूढमेव गोशब्दवत्। लक्षणीति च प्रवर्त्तमानं न
राज्यपदमस्ति। राजसूये त्रैवर्णिकानामधिकारः श्रूयते। यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुति
माहुतिं हुत्वा तमभिघारये यदि राजन्य ऐन्द्रं यदि वैश्यो वैश्वदेवमिति तस्मात्त्रैवर्णिकानामधिकारो राज

स्यइति। उच्यते। न राज्यकर्तरि राजशब्दः राजानमभिषेचयेदिति हि न्यायाभिषेकात्प्रागेव स प्रयुज्यते। न च तदा
राज्यकर्तृत्वमस्ति। यदि राजेदं न प्रसिद्धार्थं स्यात्तदाभिषेकेन राजानं भावयेदिति भूपादिवद्वाक्यार्थ
विपर्ययोऽपि कल्प्येत तत्तु न्याय्यं यत्र जातेऽप्यदृष्टादिदेशे अप्रसिद्धं तामेवाभिषेकेण संबध्नाति। एवं स्मृतिरप्यनु
गृहीता। यस्त्वापवित्रे देशे ब्राह्मणादौ प्रयोगः स राज्यकर्तृत्वसामान्याद्दोषपरिहारकः। ननु तावता श्रुतिस्व
रूपोऽनन्यथाकरणं युज्यते। तेन राजसूये क्षत्रियस्यैवाधिकारः। एवं चावेष्टौ ब्राह्मणादिश्रवणं तद्व्याख्य
र्थं। यदि शब्दस्वरूपव्याहारादिनाप्रयोज्यः। यदि रोचेत ब्राह्मणो यजेतेति ब्राह्मणकर्तृकप्रयोगान्तर
राजसूयबहिर्भूतमवेष्टेर्विधीयते। एवं वैश्यकर्तृकमपि। तस्य फलमेतयान्नाद्यकामं याजयेदिति वाक्येनाभि
धीयते। तस्माद्राजसूये क्षत्रियाधिकारः। वैश्यस्तोमे वैश्याधिकारः। वैश्यो वैश्यस्तोमेनेति वचनात्। इत्य
तिविशेषवचनेऽपि त्रैवर्णिकानामेव वैदिककर्मस्विति संक्षेपः। एवमुत्पन्नस्य विनियुक्तस्य फलाभिसं
बन्धवत्स्य च कर्मणः सांगस्य प्रयोगं बोधयन् प्रयोगविधिः। यथा पूर्वोक्ताधिकारविधिरेव भावनायाः फ
लविशेषसंबन्धोत्तरं कथंभावाकांक्षायामंगवाक्यैकवाक्यतामापन्नः सांगप्रधानप्रयोगमनुष्ठापयति। तदि
सांगप्रधानकृपादिनेन चमेयास्मिन्काले देशे एते कर्तारः यावता कालेन विना न भवति तावता कालेन कृपनन्नाप्ये
नव्यवदध्याविति। तत्र प्रधानं विद्युस्मिन् याक्यप्राप्तमेवानुष्ठाप्यते। यथाग्निहोत्रादौ। कचित्तेनैव प्राप्यते प्र

नुष्ठाप्यते च। यथोद्भिदा यजेत पशुकाम इत्यादौ। अत्र हि उत्पत्तिविनियोगाधिकारप्रयोगबोधनाच्चातुर्विध्यमप्यस्ति।
अंगानि तु तत्र हि विधिप्राप्तान्येवानुष्ठाप्यन्ते। तेनांगविधीनामनुष्ठापनरूपं फलं लुप्यते। अंगविधयश्च प्रकृतिकर्मप्र
योगविधिपुरुषार्थतया एवैकवाक्यतां भजन्ते। विकृतिकर्मप्रयोगविधिषु तु केचिदुक्ताः कथं चेदतिदेशेनोपस्थिताः।
अतिदेशो नामांगानामन्यत्र कीर्तितानामतिदेशनं। स च प्राकृतात्कर्मणो यस्मात्तत्समानेषु कर्मसु धर्म
प्रदेशो येन स्यात् सोऽतिदेश इति सूत्रे। इति स द्विविधः। वचनातिदेशो नामातिदेशश्चोदनालिंगातिदे
शश्चेति। आद्यो यथा। इषुणाभिचरन् यजेतेति इषुसंज्ञं यागं विधायेषुं विकृतिं करोति सप्तदशा हस्ता भवन्
त्यादीनि वा अंगानि विधाय पश्चात्समानमितरच्छ्येनेनेति। श्येनेऽस्मिन्नेन यान्यंगानि विशेषतो विहितानि तदंगानि कंट
कवितोदनादीनि तानि विधायावशिष्टान्यतिदिश्यन्ते। तथा [illegible] पर्वणि ग्रहणेनाद्यन् पंच यागान्विधाय। अहूणश्च यासस
र्वहुतीये पर्वणि तान्येवाग्निप्रायश्चितं। एतद्ब्राह्मणानि पंच हवींषि यद्ब्राह्मणानीतराणीति। अनेन ब्राह्मणा
भिः ऐकादशकानि एवं पंच हवींषि संबंधीनि अंगवाक्यानि ग्रन्थोपधाने वाक्यानि वातिदिश्यन्ते। तथा हि द्वितीये पर्वणि
ऐन्द्राग्न एकादशकपालः कार्य एककपालश्च श्रुतः। लोकमेधसंज्ञके तृतीयपर्वण्यैन्द्राग्न एकादशकपालो वैश्वा
कर्मण एककपालो विहितस्तत्र श्रूयते। एतद्ब्राह्मण ऐन्द्राग्न एतद्ब्राह्मण एककपालो यद्ब्राह्मण इतरश्चेति। अत्र प्राग्व
तः। द्वितीयो यथा कौण्डपायिनामयने मासमग्निहोत्रं जुहोतीति मासं दर्शपूर्णमासाभ्यां

यजेतेत्यादि। अत्र होमादीनि नित्यान्निहोत्राप्रत्येक्षयाकर्मांतराणीति वक्ष्यामः। तेषामग्निहोत्रादिशब्दो नन
मात्रेऽन्यायश्चानेकार्थत्वमिति न्यायात्। अत्र तु निमित्तभूतास्त्यादियोगात् तन्नाम्नो। किंतु नित्याग्निहोत्रधर्म
तिदेशार्थं। एवं वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेतेत्यत्र यः पुरोधाकामः स्यात् स बृहस्पतिसवेन
यजेतेत्येतद्वाक्यविहिता बृहस्पतिसवाख्यकर्मांतरं वाजपेयांगविधीयते। तत्र बृहस्पतिशब्दः पौरो
हित्यार्थबृहस्पतिसवधर्मातिदेशार्थः। यत्तु यौगिकं नाम न तदतिदेशकं। यथा द्वादशाहे प्रायणी
यसंतमाग्रयणः। गवामयने पितत्समेवाप्यतत्र प्रायणीयशब्दो न द्वादशाहिकप्रायणीयधर्मा
तिदेशार्थः। प्रयत्यारभंतेऽनेनेति यथायोगेन प्रवृत्तस्तथा गवामयनिकेप्यायौगिके यौगेनैव प्रवृत्त्यु
पपत्तेः। तत्रापि प्रवृत्तिरितिदेशश्चोदनागतेन लिंगेन ल॰॰॰ दर्थगतेन वा सामान्येन क्रव्यादमानः सोपि पूर्वो
मुक्तः। तत्राग्निनिर्वपतिश्चोदनागतलिंगं। आग्नेयं चतुरश्चतुरो मुष्टीन्निर्वपतीति श्रवणात्। एक
देवत्यसंबन्धाधिष्ठ्यकल्पविधार्थगतालिंगं। एवं ऐंद्रदैवत्येषु आग्नावैष्णवमेकादशकपालं निर्वपे
त्यादिषु अग्नीषोमीयधर्मातिदेशः। चोदनागतान्निर्वपतिसामान्यादर्थगताद्धि देवत्यलोपधद्व्य
क्तसामान्यात्। ऐंद्राग्नमेकादशकपालं निर्वपेदित्यादिषु ऐंद्राग्नधर्मातिदेशः। इंद्राग्निदेवत्य

लेनाधिकसादृश्यात्। सरस्वतीमाज्यस्यपजेत्साद्यादिषु ग्राज्यद्रव्यकेषुउपांशुधर्मातिदेशः।
आज्यद्रव्यकत्वसादृश्यात्। दधिमधुघृतपयोधानाउदकेतंडुलानां संसृष्टमाज्यादसंमि
तिवाक्यविहितयागद्रव्येदधिनिवेद्य दधिधर्मातिदेशः। दधिद्रव्यकत्वसामान्यात्। मधुदके घृते
घृतपांशुयाजेधर्मातिदेशः। द्रव्यगतद्रवत्वसामान्याद्धिक्यात्। पयस्येद्रपयोधर्माणामतिदेशः
पयोद्रव्यकत्वसामान्यात्। धानातंडुलेषु ग्राग्नेयधर्मातिदेशः। ग्रोषधद्रव्यकत्वसामान्यात्। दे
वतासामान्याद्द्रव्यसामान्यबलीयः। देवताहिशब्दद्वारेणाकर्मणिसमवैति नस्वरूपेण द्रव्यं तु
स्वरूपेणेवेत्यंतरंगत्वात्तत्सामान्यस्य शीघ्रोपस्थितेः। यथाग्नेयपयस्य संत्रैद्रपयोधर्माणामति दे
शोनाग्नेयधर्माणां। एवं च दर्शपूर्णमासास्वष्टड्वागधर्माणां स्ववाक्यविहितेषु चोदनालिंगसामा
न्येनातिदेशोद्रष्टव्यः। यास्तु दर्शपौर्णमासिकीगितु नश्रुतिरन्यार्थास्तितासु नातिदेशः। क्लृप्तोप
कारकांगविधिनैवनैराकांक्ष्यात्। यथापूर्वोक्तिगृहमेधीये। आग्नेयः श्रापणीयः। पयसि चरु
रितिविहितायां श्रापणीयायां शंघेता श्रापणीयासंतिष्ठत इति शंघ तागरीतिपुनः श्रवणात्। आ
तिथ्यायामिडांताप्राप्तिथ्यासंतिष्ठतइतीडांतागरीतिपुनश्श्रवणात्। उपसत्सुस्रुवेणाघारमाघा
रयतीतिआघारपुनश्श्रवणात्। प्रयाजप्रभृतयसु मंत्रावाज्यभागौ यजतीसाज्यभागपुनश्श्रव

णात्। न चात्राप्रसमवायगुणार्थत्वादन्यार्थत्वं। तस्य पाठप्राप्तमंत्रलिंगादेव प्राप्तेः। तेनैतान्यपू
र्वाङ्गृह्यः। एवमग्नीषोमीयपशुयागे दर्शितं गतपदो यागधर्मातिदेशः। साक्षात्पशुप्रभव
उव्यक्तत्वसामान्यात्। एकादशप्रयाजान्यजतीत्यादिभिः प्रयाजानुवादेन गुणविधानाद्व
विशिष्टविधौ च गौरवात्। अग्नीषोमीयपशुयागधर्माणां सवनीयादिसर्वपशुयागेष्वतिदे
शः। पशुद्रव्यकत्वसामान्यात्। अथैकादशिन्यां च सवनीयधर्माणां। द्वैरश्यसामान्यात्। द्वैरश
ने यूपमत्तत इति हृभयत्रश्रवणात्। अथ त्याकालत्वसामान्याद्वा। पश्वैकादशिनीधर्माणां च सर्वपशु
गणेषु प्राजापत्यादिषु पशुगणत्वसामान्यात्। पयस्तु पाशुकागणपुनःश्रुतिरनन्यार्थत्वात्पूर्ववत्। यथा
त्वाष्ट्रं पात्नीवतमालभेतेति विधाय पर्यग्निकृतं पात्नीवतमुत्सृजतीति श्रुतं। तत्र पर्यग्निक
रणांगरीति पुनः श्रवणान्नोत्तरांगातिदेशः। तेन विशसनाद्यभावादुत्सर्गस्यार्थप्राप्तेरनुवा

ना

दः। पत्नीत्वेन शेषसंस्थापयतीति श्रुतं। तत्राज्यद्रव्यककर्मांतरविधौ पतेपशुयागांगत्वे नापा
त्नीवतपदानुषंगेणाज्यस्य याग एव। आज्येन पात्नीवतं करोतीत्यर्थः। तस्यां तेनुष्ठानाच्छेषसंस्थापनोप
चारः। एवमीशानाय परस्वत आलभेतेति विधाय पर्यग्निकृतानारण्यानुत्सृजतीति श्रुते न चापि प्रा

त्वत्।सर्वसोमयागेषु च ज्योतिष्टोमधर्माणां। अव्यक्तत्वसामान्यात्। अव्यक्तत्वं स्वार्थचोदि-
तदेवतारहितत्वं। ऐन्द्रवायवं गृह्णातीत्यादिवाक्यैर्ग्रहणाङ्गत्वेन विहिता देवताः स्वसंबंधिनं
यागमपेक्षन्ते। सोमेन यजेतेति विहितो यागो देवतामपेक्षते। तयोर्नष्टाश्वदग्धरथवत्संबं-
धो भवति। न तु यागान्तरेण देवताविधानमस्तीत्यव्यक्तो ज्योतिष्टोमः। तथा विकृत्यन्तर्द्वादशादयोपि
तत्सामान्यात्। द्वादशाहेऽपि ज्योतिष्टोमधर्माः। तत्सामान्यात्। द्वादशाहधर्माश्चेतरेष्वहर्गणेषु।
अहर्गणत्वसामान्यात्। तत्रापि सत्रात्मकद्वादशाहधर्माः सत्रेषु त्रयोदशरात्रादिषु गवामयनान्तेषु। दि
षु। अहीनात्मकद्वादशाहधर्माश्चाहीनेषु द्विरात्रादिष्वेकादशरात्रपर्यन्तेषु न्यधिकसामान्यात्। गवामय-
नधर्माश्च संवत्सरसाध्येषु सत्रेषु। संवत्सरसत्रत्वसामान्यात्। एवमयं चोदनालिंगातिदेशः। ए-
वंविधेनातिदेशेन प्रथमप्रवृत्ताङ्गजन्योपकाराः प्राप्यन्ते। विकृतेस्तदाकांक्षत्वात्। तस्य च ना-
नेन च तत्साधनान्यङ्गान्यतिदिश्यन्ते। तस्य च नावन वतद्विधायकानि शास्त्राणीत्येवमतिदेशो-
पस्थापितांगविध्येकवाक्यतापन्नो विकृतिप्रयोगविधिस्तदुपस्थापितान्यंगान्यनुष्ठापयति।
तदुक्तं भाष्ये। चोदक उत्पादयति प्रापयति च प्रापितानभिसमीक्ष्य प्रयोगवचन उपसंहरतीति।

प्राकृतोपकारपृष्ठभावेनचूह्यास्यान्यगान्यनुष्ठापयत्यथा ज्ञाहंतोपकारार्थतामवतितथानुष्ठा
पयति न स्वप्राकृतकार्यार्पितया । तल्लिङ्गयेन क्वचिदूहं बोधयति । ऊहो नाम कार्यवशेनान्यथा
भावः । तदुक्तं प्राकृतस्य स्थाने पठितं पदार्थान्तरं कार्यतः । ऊहः प्रयोगविधिकृत ऊहः प्रमानतयोदित
इति । स त्रिविधः । मंत्रोहः सामोहः संस्कारोहश्चेति । आद्यो यथा । यथाग्नये जुष्टं निर्वपा
मीति मंत्रः सौर्ये तिदेशेन पृथ्वीयदेवताप्रकाशनरूपोपकारार्थतया प्राप्तः । तत्र चापूर्वीय
देवता सूर्यः स च नाग्निपदेन प्रकाशयितुं शक्यत इत्यग्निपदे निवृत्ते विधिगतसूर्यपदप्रक्षेपे
णा सूर्याय जुष्टमित्यन्यथाभावं प्रयोगविधिरनुष्ठापयति । द्वितीयोहः प्रकृतौ मुख्यार्थाना
दृष्टार्थानां स्वार्थनिष्ठानां समवेतार्थानां यजुर्मन्त्राणां कार्यमुखेन विकृतिं गतानां कार्यान्य
थाभावेन कल्प्यते । इयं गोस्त्वापाक्षीणामितस्ये श्रुतमित्यादौ सोमक्रयार्थैकहायनीप्रका
शकमन्त्रे पठितानां श्रुतादिशब्दानां सोऽस्त्विव सः सोमक्रयणी इति विकृतौ विहितसां
डेनोहः । प्रकृतावेकहायन्यवस्थायां मुच्यमानस्य क्षीरादेर्मुख्यत्वाभावाद्गौणत्वेनोपचारिक

37

पत्नी

स्य क्षीरादि संबंधस्य सांडो स्याद् यथा दृष्य माणधेनुद्वारेण सांडे प्युपत्तेः॥ पत्नीसन्नह्येति
पत्नीसन्नहनं शेषमंत्रे पत्नीमित्येकवचनस्याद्विबहुपत्नीकाविकृतिप्रयोगे नोहः॥
म फलो द्विबाहुकं चैकत्वेन पत्नीशब्दस्यापूर्वसंबंधि पत्नी व्यक्ति परत्वात् सामान्यसंख्या
प्रकाशनस्याविधीयमानत्वेन मुख्यार्थत्वेपि दृष्टार्थत्वाभावाद् दृष्टार्थत्वात् ऐन्द्राग्नमासग्ये
प्रकाशनस्यापि पशुपतीनिति श्रूयते ये अग्नाद यद्दं यज्ञं
रिडानि गदेउपहूतामनुष्या यद्दं यज्ञमुवान्ये च यज्ञपतिवर्द्धानिति
रक्षितवंतो यच्च यज्ञपतिं फलदानेन वर्द्धितवंतस्ताइडा यामुपहूताइत्यर्थः यज्ञपतिशब्दस्य
सन्नेषु नोहः॥ प्रस्तौ यजमानस्य मुख्यार्थत्वेपि तस्योत्साहनार्थत्वेपि न दृष्टार्थत्वे पीडास्तु स्यर्थत्वद्वि
शेषणतया स्वाधनिष्ठत्वाभावेन परार्थत्वात् एक यज्ञपति संबंधित्वद्वि प्रकाशने पीडास्तु स्युपप
तेः॥ इडागाद्धहरिवत्यागछेति सुब्रह्मण्यामन्त्रे हरिवपदादि पदानामग्निष्टुत्यागे नैमीसुब्रह्मण्या भवती
तिविहिते सत्यप्यगन्यागछेत्यूहे रोहिताभ्यादि पदैर्नोहः अकृतौ तेषां हरिवत्वादि गुणो मुख्यत्वेपित
स्य च गुणस्येंद्राय हरिवते धानाइत्यादिषु देवत्यांतगति दृष्टार्थत्वेपि पक्ष्यमाणोन्द्र प्रकाशनाश्च

तं

स्वार्थत्वेपीड्हविर्वत्साद्यस्समवायासमवेतार्थत्वाभावात्। अविद्यमानगुणसंबोधनेनेड्स्यवाग्ने
रपिप्रकाशनोपपत्तेः॥ अत्राणांतुनिषेधान्नोहः। एयतिवाएतद्यज्ञोक्षरंयदेनदूहतितस्मादेवंनो
हिरीति। अतएवक्कचिद्याज्यानुवाक्ययोरनुपदेशेगायत्र्यादिलक्षणेनानुवाक्याकल्पनात्रिष्टुवा
दिलक्षणेनयाज्याकल्पनंताभ्यांलक्षणयोश्चासंभवेऽममाष्टणुधीहवंस्तीर्णंबर्हिरानुषंगासा
देतदिसयनप्रोक्तचोरागनमुपदिशंति। अस्तिवोदाहृतमंत्रगतस्याग्निपदस्ययागीयदेवताप्रकाशा
लान्मुख्यार्थाद्दीतिततयागीयदेवताप्रकाशनरूपकार्यमुखेनसौर्यप्राप्तः। तत्रसूर्यस्याग्निकार्यापि
तेस्तत्प्रकाशनायोग्यतोकार्यापत्तिश्चपंचभिःप्रमाणैर्ज्ञायते। यथाहुः। प्रत्यक्षविधिनाभावैर्विधा
नेनविकारतः। स्वशब्दात्प्रनिषेधानुवादात्तत्कार्यकारितेति। नैवारश्चरुरितिश्रुतेनविकारतद्धितेन
नीवाराणांचरुप्रकृतित्वाभिधानात्प्रदेयप्रकृतितस्वरूपव्रीहिकार्यापत्तिः प्रत्यक्षविधिनाप्रतीयते।
सत्स्थितेषडहेमध्याशयेहुतंवीतमचुघृताशनयोः षडहाभावेविधानाद्भावैर्विधानेनषडहकार्या
पत्तिस्तयोरितिभाष्ये। तन्नज्योतिष्टोमावाताहिविकामनुतियाहिष्ठ्यः षडहः संतिष्ठतेनान्यन्नुयाद्दसायधर्म
वादाक्तोचनयाषडहऽन्यथाकेमिश्रमानिवस्तुर्थत्वावगमात्तयोर्नातीवपुनर्मितिवार्त्तिककारैः स्व
यागः पविमध्यजितायजेतिसत्राभावविमध्यजितोविधानात्तत्रकार्यापत्तिरित्युदाहृतं। नैवारश्चरुर्नस्वा

वघ्नतानामितिवैलुण्यरूपविकारफलकनिर्वचनापरपर्यायावपनांगत्वेननखानांविधानात्फ
लकावघातार्थोलूखलमुसलयोःकार्यापत्तिर्विकारेपफलेनेसंभवः। परिधौपशुंनियुंजीतेति
परिधौनियोजनेविधानाद्यूपकार्यापत्तिः स्वरशब्दात्कार्यावाविशब्दश्रवणादि संभवः। नन्वगिरा
रेतिअनुवादेरंहस्त्वोहृयमितीरापदविध्येकवाक्यत्वायगिरापदविध्येकवाक्यत्वायगिरापदनिषे
धस्यानुवादत्वावगतेरश्वरसाम्येनचगिरापदकार्यापत्तिसंभावनायांनिषेधानुवादेनेरापदस्य
गिरापदकार्यापत्तिर्निश्चीयते। प्रकृतेतुसौर्यामिंद्रदेवतातत्कृतेनसूर्यस्ययागीयदेवतात्वरूपाग्नि
कार्यापत्तिः प्रत्यक्षविधिनैवाग्निदेवस्यापांतुविहितानतस्योहः। यथाआग्नेयमष्टाकपालंनि
र्वपेदुक्कामइति। प्रकृतावपिचनोहः। यथाव्रीहीणांमेधस्सुमनस्यमानइतिमंत्रस्ययुवप्रयोगे। किंतु
प्रयोगएवातत्रपदार्थान्वयपूर्वकोपकारकल्पनात्। विकृतौतूपकारान्वयपूर्वकपदार्थान्वया
दुपकारान्यथाभावेसिध्यत्यूहः। सर्वथैतदुक्तंवार्त्तिके। मुख्यदृष्टार्थतास्वार्थसमवेतार्थतादिभिः।
अपुनःप्रकृतौमंत्रागताःकार्यातिदेशतः। विकारेष्वनिषिद्धोहःकार्यापत्तेषुप्रबंधाग्यथार्थतये
धपूर्वाधिकारेयोग्यवृत्तिःनइति। एवंव्रीहीणांमेधस्सुमनस्यमानइतिमंत्रेहःधिः प्रत्यातिदृष्ट

हं

वा वि

वाचिनो व्रीहिपदस्यैव वारश्शरा इत्यादिविस्तरतायूहः। एवं दर्भैः स्तृणीत हरितैस्सुपर्णैरित्यादि दर्भस्तरण
मन्त्रे चरुः समो ऽग्ने चरुं निर्वपेद्बिल्वे पुंश्रीकाम इति विहितायां विकृतौ पौंडरीकाणि बर्हींषि भवन्तीति द
र्भकार्यापन्नेषु पुंडरीकेषूह्यः। तत्र दर्भपदस्थाने पुंडरीकपदप्रयोगोऽन्यं हरितपदस्थाने रक्तपदप्रयो
गः पुंडरीकं सितांभोजमित्यमरोक्तिस्तथापि तस्य यथा कप्यासं पुंडरीकमेवमक्षिणी इत्यादिश्रुतौ
रक्तगुणेऽपि प्रयोगादेवमूहोऽभ्यासादावुक्तः। तदेवं मन्त्रगतानां देवद्रव्यगुणवाचिनां पदानामूहो वा क
विशेषणयुक्तानामूहः प्रदर्शितः। किंचित्तु शब्दस्यासमवेतार्थत्वाभावेऽपि लक्षणया प्रकृतोऽसमवेतार्थ
संबद्धकृतार्थपूहःस्यात्। यथा धान्यमसीत्यादिमंत्रे तंडुलपेषणार्थे धान्यपदस्य तुषवाचि तंडुलेषु प्रयु
ज्यमानं लक्षणया तान्प्रकाशयति। अतएव तस्य ध्यानयामपनेसचेतर समया पुरोडाशा भवन्तीति
मांसमयेषु पुरोडाशेषु विहितेषु मांसपेषणार्थेऽस्मिन्मन्त्रे ऊहितव्यः। तत्र मांसमसीत्यूहो न तु प्र
कृतिवन्मन्त्रगपदेन लक्षणया तस्य इति कं मांसं प्रकाशयितुमगोऽसीति। प्रकृते तथा पाठात् कृष्ण
प्राश्रयणानि हन्तुस्वाधीने पदप्रक्षेपे किमिति लक्षणाश्रियते। यथोक्तं श्लोके स्यात्प्रत्नेशब्दप्रयोगो हि
मित्यवाचकं प्रयोऽस्यामहइति। किंचित्तु पचारेणासमवेतार्थसंबद्धकृतार्थपूहःस्यात्। यथाग्नीषोमीये

मंत्रो० १

पशोः पाशमोचनार्थोऽग्निरदितिः पाशान्प्रमुमोक्त्वेतानित्येकः। अदितिः पाशं प्रमुमोक्त्वेतानित्य
न्यः। तत्रैकपाशमोचनप्रकाशकः समवेतार्थः। बहुपाशमोचनप्रकाशकोऽपि न पशुगणउत्सृष्ट
व्यः। गुणभूतबहुत्वसंख्यामात्रानुरोधेन प्रधानभूतानेकार्थोत्कर्षप्रयोगात्। बहुवचनएवबहु
त्वादस्य तन्निमित्तकमवयववाभिप्रायेणोपचारिकत्वं युक्तमाश्रयितुं। तथाहि सूत्रं। गुणोल्लन्या
व्यकल्पनेति तेन प्रकृतावेवास्य निवेश इत्युभयोर्मन्त्रयोर्विकल्पः। तत्र मैत्रश्वेतमालभेतवार
णं कृष्णमित्याद्विपशुकविकृतावेकवचनांतबहुवचनांतस्याप्यूहेन प्रवृत्तिः। प्रकृतावुप
चारेण समवेतार्थत्वोपविकृतौ स्यादपूर्ते शब्दप्रयोग इति न्यायेनोपचारप्रयोगात्। द्विबहु
वचनस्योपचारेणापि लोके प्रयोगादर्शनाच्च। तदेवं संक्षेपेण मन्त्रोऽह्नो निरूपितः। अपदं च मन्त्रम
ध्यस्थोऽपि न मन्त्रसंज्ञां लभते मन्त्रसमाम्नाये पाठाभावात्। एवं प्रवरपदेषु यजमानादिनाम स्वच
मन्त्रमध्यस्थेऽपि न मन्त्रसंज्ञा। आर्षेयं प्रवृणीते मानवसावित्यस्यादिरूप नामनीइत्येवं सामा
न्यरूपेण पाठे प्रवरणीयविशेषरूपापाठात्। तदुक्तं मनाम्नातेष्वमन्त्रत्वमिति। तेनैषां प्रयोगेन मन्त्र
लोपप्रायश्चित्तं किंतु गलोपप्रायश्चित्तं। सामोहरूपोऽप्यपठितस्य साम्नउत्तरयोर्गानातिदेशे सति तत

नादृशैन्यथाभावः। तथा हि। ऋग्भिः साक्षरनोनुमदत्स्याम् अभिवस्त्यां ऋचि रथन्तरं साम पठितं। तेनेयं योनि
रुच्यते। तद्रथन्तरं पृष्ठं भवतीति वाक्येन पृष्ठस्तोत्रार्थतया विहितं। एकं साम तृचे क्रियते स्तोत्रीयमिति
वाक्येन च स्तोत्रार्थस्य साम्नस्तृचे प्रयोगो विहितः। तत्र तृचापेक्षायां यद्योन्यां गायति तदुत्तरयोर्गा
यतीति वाक्यादुत्तराग्रन्थपठितयोर्द्वयोरेतस्य धृते तत्र योनावुपधमानं तदक्षराणामाईभावादिरू
पाणामभिव्यक्तिं कुर्वत्संस्कारकं दृष्टं। कार्यं [illegible] भानस्यातिदेशात्सक्षरसंस्कारकारीयोत्तरयो
र्दृष्टं। तयोश्चाक्षराण्यन्यथाभावात्संस्कार्यानुरोधेन संस्कारकं सामान्यथा भवति। एवं कव
तीषु रथन्तरं गायतीति वचनात्कयानश्चित्र आभुवदित्यादिकवतीषु रथन्तरस्यातिदेशे स्तुति
दक्षरसंस्काराणानुरोधेनोहः। एवं बृहदादिसामस्वप्यूह्यं [illegible] ऊह्यः। संस्कारोहस्त्वेवं तावत्कालिम
दृष्टानुष्ठितानां संस्काराणां विशेषतो [illegible] रूपपवमानान्यतरमानेन तत्कार्यापत्तेरन्यस्मिन्करणा
दन्यथाभावः। यथा व्रीहिषु कृतानामवघातादीनां नैवारश्चरुरिति प्रत्यक्षविधिना नीवारेषु व्री
हिकार्यापत्तिं नेष्यत्क्रियमाणानामवघातादिरूपोन्यथाभावो येन तुष्यादिकार्यवशेनेति संक्षेपः।
तदेवं प्रयोगविधिरतिदिष्टानां पदार्थानां प्राकृतकार्यवशेनोहबोधयिता। [illegible] तेषां बाधमपि

बोधपती। त्रेधा च बाधः। अत्याम्नानादर्थलोपात्समुच्चयात्तत्राद्यो नीवारैर्व्रीहि बाधः। अर्थलोपादिति
यावता कुशमयं बर्हिर्भवतीति प्रकृतौ विहितानां कुशानां शरमयं बर्हिर्भवतीति विकृतौ विहितैः
शरैर्बाधः। द्वितीयस्तु। प्राजापत्येषु तेषु चरुषु नखैर्वितुष्य कृष्णलं मा पुष्टाम् इति विहितायाधिव्रताव
दिदिष्टस्यावघातस्य वैतुष्यरूपार्थलोपात्। तृतीयोपवाचः इष्ट्यन्त इति स्यणमियं इष्टके इत्यात्तीपरा।
८५ पित्र्येष्टौ नु होतारं वृणीते इति पर्युदासातिदिष्टस्य होतृवरणस्य तृप्तिर्विभूतिसाधवरतो
बाधः उदाहृयते। नित्यं नैमित्तिकं काम्याभ्यां बाध्यते। यथा दर्शपूर्णमासयोर्नित्ययोः साभिघेनीपाठ
दशपनैमित्तिकेन साहस्रदर्शपेन सहस्रशवेश्य। स्येति विहितेनैकविंशतिमनुब्रूयात् इति छाकामस्येति
विहितेन च काम्येनैकविंशत्यनुवचनेन बाध्यते। नैमित्तिकं च काम्येन यथा साहस्रदर्शपमेकविंशत्यनु
वचनेन। अत्यर्थं पुरुषार्थेन। यथा चमसो गोदोहनेस्य न। सामान्यं विशेषेण। यथा हवनीयः पदे नात्य
वकाशो निरवकाशेन। यथा यत्किंचित्प्राचीनमग्नीषोमीयात्तेनोपांशु चरन्ती सग्नीषोमीयप्राणा
निपदार्थेषु विहितमुपांशुत्वं यावत्या वाचा कामयीत तावत्या दीक्षणीयायामनुब्रूयान्मंद्रं प्राय
णीयायाम् इतरस्मिन् इति धाप्यामित्यादिभिर्विहितस्वरैर्निरवकाशैर्बाध्यते। दीक्षणीयां प्रधानमात्रे वेदे

स्वरादिविधीयंते। उपांशुत्वं तु तदंगेष्वितरपदार्थेषु चरितार्थं स्यात्। एवं परेण। यथा वैहि पवमानार्थं स
र्पि सघसर्पतामन्योन्यकच्छधारणे। विहितोपघुर्ज्ञातापात्रिं छाददक्षिणापसंसमाप्यपुनरुपसृत्य तत
उत्तरहघाघसर्वस्मिन्नदास्यन्त्यादिति। ज्ञातुपच्छेदे प्रायश्चित्तं विहितं यदि प्रतिहर्त्तापछिद्येतासर्व
वेदसं दद्यादिति प्रतिहर्त्रपच्छेदे। तत्र युगपदुभयोरपच्छेदे प्रायश्चित्तयोर्विरोधाद्विकल्पः। पौर्वा
पर्ये परं कार्यं तस्य पूर्वनिरपेक्ष्येण प्रवृत्त्युपमर्दे नैवात्मलाभात्। पञ्चतु पूर्वस्यापेक्षः परस्यात्मलाभः
तत्र पूर्वबललीयः। यथा प्रागुक्तवाक्योदाहरणे। एवं सरवलीयस्त्वं तत्रनाम भवतीयता। अन्योन्य
निरपेक्षाणां यत्रान्यस्य माध्यंयोगाभवेदिति। अंगं प्रधानेनाय यथा दर्शपूर्णमासयोरग्निहोत्रहवण्या
हवींषि निर्वपति। निर्वपाहि तानि निर्वापः पवमानेष्टिष्विति दिष्टः। तत्र भाष्यकारमते पवमानेष्टिप्र
धानयोः समप्राधान्येनाग्न्यर्थत्वात् वार्त्तिककारमते पवमानेष्टिगुणकाधानस्याग्न्यर्थत्वात्
पवमानेष्टिकाले आहवनीयाद्यभावेनाग्निहोत्राग्रव्रतेरग्निहोत्रहवण्यभावेऽपि निर्वा
पो नु छेयस्तस्य प्रधानत्वेनांगबाध्यकत्वात्। नतु तदनुरोधेनागनिर्वापबाधः। अंगगुणांगं प्रधा
नांगेनाप यथा पदृष्ट्या पशुनासोमेन यजेत। सोमाधास्याद्यांपोऽमासस्याधायजेतेति वाक्येन

लड्डुकं ६

ष्ट्यादीनां पर्वकालसंबंधे सोमांगपर्वकालेन दीक्षणीयाद्यंगपर्वकालबाधः। सांगसोमस्य
पंचाहसाध्यत्वेनोभयानुग्रहायोगात्। एवमन्योऽपि बाधास्त्वागत तन्नक्षत्रेष्टौ सत्यं। क्व
चित्तु प्राकृतवैकृतानां समुच्चयं बोधयति ग्रहयोगविधिः। यथा नक्षत्रेष्टिषु पूर्वेद्युः ष्टानामुपहो
मानां मध्ये दृष्टानां च नारिष्ठहोमानां। प्रकृतौ हि नारिष्ठहोमानां प्रधानोत्तरकालमनुष्ठाना
दुपहोमानां चान्ते प्रधानविध्युत्तरपाठे तेन तत्रैवानुष्ठानादेकस्थानत्वेप्यदृष्टार्थत्वेन प्रसा
ङ्गानामभावान्न बाधः। किंतु प्राकृतोत्तरं तु वैकृतानामागतानामनुष्ठानं। त्र्यंतु बाद
रायण इति न्यायात्। एवं साग्रहप्यप्सुषोमामनहोमेष्वंत्यपाशोनांत्रिसत्रसामान्येन बाधः।
सर्वव किंत्वदृष्टार्थत्वात् समुच्चयः। एवं बृहस्पतिसवादौ बार्हस्पत्यसंग्रहं गृह्णीतीत्यादि पूर्वदृष्टग्रह
णामैन्द्रवायवादिप्राकृतग्रहैः समुच्चयः। ग्रहीतस्यापि सोमस्य यागार्थत्वसंभवेन ग्र
हणमदृष्टार्थत्वात्। न बाधः। लोके वा प्राकृतग्रहानुवादेन देवतामात्रविधानमिति वाच्यं। प्रा न
कृतग्रहानुवादेन देवताविधौ तेषां बहुत्वादेकग्रहाभावतीति वत्र बहुत्वे वचनापत्तेः। ए

यमन्यत्राप्रत्यक्षो बाधाभ्युच्चयाभ्यां पत्न्यायावधारितानां पदार्थानामनेकप्रधानसन्निपाते तदर्थतया कृ
तं तंत्रेण प्रयोगमनुष्ठापयति क्वचिदावृत्त्या कृत्स्नप्रयुक्तमेव स्वस्य प्रयुक्तिरशक्तौ स्वसामप्युपजीवति क्व
चित्स्वार्थमेवोपजीवन्नप्रयोजक एव। यथा दर्शप्रयोगविधिस्त्रयाणामर्थेन प्रयाजादीन् गृह्यमाणा
शेषत्वात्सकृदनुष्ठापयति। न ह्ययं विशेषेण गृह्यते सकृत्कृताः प्रयाजादयः आग्नेयपार्थाएवेति सान्नाय्यार्था
एवेति तेन त्रयाणामनतिविप्रकृष्टे तेषां त्रयाणामप्युपकुर्वन्ति। एवं वरुणप्रघासपर्वण्योत्तरवेदिकाणां प्र
धानानां तंत्रं प्रयाजादयः। यत्र देशकालकर्त्रादिभेदाद्विशेषेण गृह्यते तत्रावृत्तिः। यथा दर्शपूर्णमासे च काल
भेदादुत्तरदक्षिणविहारयोश्च देशकृतभेदात् प्रयाजाद्यावृत्तिः। यत्र त्वेकस्य तंत्रे प्रतते मध्येऽन्यो विधीयते यथा
ग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पुरोडाशमनुनिर्वपतीति अग्नीषोमीयपशुयागतंत्रे प्रतते पु
रोडाशयागः स यद्यपि विदेवत्यत्वादग्नीषोमीयविकारस्तथाप्यतिदिष्टानंगभूतान् प्रयाजादीन्नानुष्ठा
पयति। उपकारार्था हि पदार्थानुष्ठानं। स च सवनीयपश्वपर्ममनुष्ठितैरेव जनितो लब्ध इति किं प्रयाजानुष्ठापनेन।
यथा पशुधर्ममेकादशसंख्याः प्रयाजानुयाजाः कृपं तु पृषदाज्यवद्व्यकाश्चानुयाजा इत्यादि बहु यथा
प्रकृतौ पुरोडाशस्य तु यथाप्रकृत्युपेक्षितास्तथाप्युपकारस्याविष्कृतत्वात्सदार्थ्यै लक्ष्यणयेति तदनाद
रेणोपकारमात्रमपेक्षितात् केवलं पुरोडाशमपेक्ष्य योगविधिर्न पदार्थानुष्ठापयति सोपप्रसंगः। यथाज्यामा

त्र

ण५

पिष्ठ लेसति

न

त्रर्थं स्तुतो दीपः शिष्यस्योपकरोतीति तद्वत् । यजुः पशुर्नास्याप्रेक्षितं नानुघ्रापितं तत्स्वयमनुघ्रापयति । यथा
नैतोपशोकरोतीति निषेधात् पशावाज्यभागविकल्पे पदानाज्यभागौ क्रियेते तदायमनुघ्रापय
तीपिष्टलेपहोमादिकं चेति नात्र प्रयोजकत्वं । यस्तु प्रयुक्ति शर्करा इति ततः परं त्रपुत्तमुपजीवतीति सोऽत्र प्रयोज
कः । यथा वाजिनयागप्रयोगविधिः । तत्र पयसि दध्यानयतीति हि दध्यानयनेस्पं न तत्र पयः संस्कुर्या

गा

दित्यर्थः । अगार गावोऽस्यं तामिति वत्राद्दृष्टश्चेद्दध्यानयनेन पयसो घनीभावः संस्कारस्तेन सा वै
श्वदेव्यामिक्षेत्युत्तरवाक्ये तच्छब्देन पूर्वप्रकृतं प्रधानपयः परामृश्यते तोतां वैश्वदेवद्रव्यमामि
क्षापदवाच्या चेति ज्ञायते । आमिक्षा स्त्रीत्वाभिप्रायेण च सेति स्त्रीलिंगम् [illegible]नुवादः । तेन पय एव घ
नीभूतमामिक्षा । तदर्थेन दध्यानयनेनानुनिष्पन्नं वाजि भ्यो वाजिनीमिति विधि वाजिदेवस्य यागं

वाजिनं ६

गत्वेनर्थं विनियुक्ते । न तु दध्यानयनं प्रयुक्ते । वाजिनापवित्रेन तस्या विधानात् । तेन वाजिननाशेन पुनर्दध्यान
यनं कार्यमिति स प्रयोजको दध्यानयनस्य । तथा एकहायन्या क्रीणातीति प्रकृत्य श्रूयते । षट् पदान्यनुनिष्क्रामति
सप्तमं पदमध्वर्युरंजलिना गृह्णातीति तेनास्य मुदाज्याहुतिः । तत्र षट्पदान्यनुनिष्क्रम्य सप्तमपदसाध्यम
क्षाभ्यं नं क्रियमाणमेकहायनीनयनस्य प्रयोजकं कयार्थत्वादेकहायनीनयनस्य । तदनुनिष्क्रामी
सप्तमपदपांसूपजीवित्वाद्द्क्षाभ्यं जनस्य । तेन तत्पदस्वरूपांसुलाभे नैकहायनीनयनं पुनः कार्यं । तथा पुरो

डाशकपालेन तुषानुपवपतीति विधिरप्रयोजकः कपालस्य पुरोडाशश्रपणे प्रयुक्तकपालोपजीवि-
त्वात्। पुरोडाशसंयुक्तस्यैव तुषोपवापे विनियोगात्। तेन चरौ न कपालेन तुषोपवापः कार्यः। तथा
गाराद्यस्विष्टकृते समवद्यतीत्युत्तरार्धस्य स्विष्टकृदप्रयोजकः। आग्नेयादिप्रयुक्तपुरोडाशैकदेशो-
पजीवित्वात्। तेनाचत्तोत्तरार्धं नाज्याज्ये न स्विष्टकृत्कार्यः। यच्च सर्वाणि हवींषि नश्येयुर्दुष्येयुरप-
रेषु वाज्ये नैता देवताः परिसंख्यायन्ते इति वचनात्। तथा पश्वालंभस्य शालामुखीयनिरसनमप्रयोजकं। प्राग्-
वंशदपाद्यर्थालंभानुनिष्पादित्वात्तस्य। प्रणीताभिर्हवींषि संयौतीति विधायां तर्वेदि प्रणीता निनयती-
ति श्रुतं निनयनमप्रयोजकं प्रणीतानां। तृतीयया श्रुत्या हविःसंयवनार्थत्वात्प्रणीतानां। द्वितीययानुप्र-
तिपत्त्यर्थं निनयनं तदुत्तरमप्रयोजकं। धारणस्य तु प्रयोजकमेव। एवं हविःशेषभक्षणादि सर्वप्रति-
पत्तीनां धारणाप्रयोजकता। अन्यथैकेन सह सोमपानसंभवादनेकपानेवाधः स्यादिति मिश्राः। प्रतिप-
त्तिनामाकीर्णकरतानिवृत्तिः। सा च भक्षणादिनैवेति नियमांशो दृष्टकल्पनाद्धारणाप्रयोजकत्वे प्रयु-
क्तेरप्रयोजिका। तदेतत्तन्त्रादिचातुर्विध्यमुक्तं द्वेष्टः। साधारणं भवेत्तन्त्रं परार्थे त्वप्रयोजकं। एवमेव प्रसङ्ग-
स्याद्विधमानेस्य चके विधाविति। साधारणमनुष्ठीयमानाविशेषं। विशेषग्रहणोत्साहित्वादित्यर्थाद्युक्तं। परार्थ-
मिति विषयसप्तमी। विधौ प्रयुक्तिसामर्थ्ये एवमीयतः पदार्थानां तन्त्रादिप्रकारेणानुष्ठापयन्प्रयोगविधिः श्रू

पाणादि३

ज्ञोहित

मानियमे प्रयोगविक्षेपापत्तेः श्रुत्यर्थपाठस्थानमुख्यप्रवृत्तिरूपषट्प्रमाणोपस्थापितक्रमविशिष्टानुष्ठा
नुष्ठापयति। यद्यपि पौर्वापर्यमानंतर्यं चेति क्रमो द्वेधा लोके प्रसिद्धस्तथापि प्रयोगविधिः प्रयोगप्राशु
भावापानंतर्यरूपमेवापेक्षते। तदपेक्षितमेव श्रुत्यादीनि बोधयंतीति। तत्र क्रमपरं वचनं श्रुतिः। यथा वेदं
कृत्वा वेदिं करोतीति वेदकरणवेदिकरणयोः प्राप्तेः क्रमपरमेवेदं वषट्कर्तुः प्रथमभक्ष इति क्रमविशि
ष्टपदार्थविधिः होतृभक्षणप्राप्तावपि तदनुवादेन प्राथम्यरूपक्रमविधानम्। एकस्मिन्पदे एकप्रस
रताभंगापत्तेः। एकस्य हि पदस्यैकरूपेणोद्देश्यत्वेन विधेयत्वेन वार्थेन भाव्यं। यो भक्षः स प्रथम इति उ
द्देश्योपादेययोरुत्तद्धर्यान्वयोनिर्देशो योरेकपदप्रतिपाद्यत्वासंभवात्। क्रमविशिष्टो भक्षो वषट्
कारनिमित्तः समाख्यादिभिर्निमित्तभक्षादिनो विधीयत इति क्रमपरत्वस्यापि भावाद्भवतीयमपि श्रु
तिः। एवमाश्विनो दशमो गृह्यते तृतीयं जुहोतीति श्रुतिः क्रमपरा। अर्थः प्रयोजनं। तद्दर्शनेन क्रमः। अ
ग्निहोत्रं जुहोति यवागूं पचतीति यवाग्वा होमार्थत्वात्तदर्थः पाकः पाठक्रमबाधेन पूर्वं क्रियते सोऽयमार्थः क्रमः। एवमु
पहूत उप× जुहोमि। यवागू ×हूपस्वेत्यनुज्ञादानयाचनार्थौ मंत्रौ याचनपूर्वकत्वाद्दानस्य मंत्रपाठक्र
मबाधेन वैपरीत्यं संप्रतिपद्यते। पाठक्रमस्तु मंत्रपाठेन ब्राह्मणपाठेन वा परिकल्प्यते। यथा प्रयानां ना
समिधः समिधोऽग्न आज्यस्य व्यंत्वित्यादिमंत्रपाठक्रमेणानुष्ठानक्रमः। मंत्राणां स्मारकत्वात्तत्क्रमेण

स्मृतो तथानुष्ठानात्। यत्र मंत्रैकपदार्थेषु ब्राह्मणानामेव स्मारकत्वं तत्क्रमेणानुष्ठानक्रमः। विरोधे च मंत्रपाठो ब्रा
ह्मणपाठाद् बलीयान्। यथाग्नेयाग्नीषोमीययोर्मंत्रपाठे नैवानुष्ठानं न तु ब्राह्मणपाठेनाग्नीषोमीयस्य पूर्वं मंत्रा
णामेव स्मारकत्वात् क्रमस्यांतरंगत्वात्। ब्राह्मणानां तु विधायकत्वेन तद्व्यापाराणां प्रयोगसंबंधाभावे
न तत्क्रमस्य बहिरंगत्वात्। स्थानं तूपस्थानं तद्देशेन क्रमो यथा साद्यस्के सोमयागे श्रुतं सह पशूनालभ
त इति। ज्योतिष्टोमादौ तद्देशेन स्वस्वकालेग्नीषोमीयसवनीयानूबंध्याः पशवः प्राप्तास्ते सहालब्ध
व्या इत्यर्थः। तत्र सवनीयस्थानेन्ययोरालंभः प्रधानसोमयागप्रत्यासत्तेरुभयोरेकस्थानातिक्रमसा
म्यात्। अग्नीषोमीयस्थाने द्वयोरालंभे त्वानूबंध्यस्य सवनीयस्थानद्वयातिक्रमः स्यादेवमानूबंध्यस्था
नेप्यग्नीषोमीयस्याहुः। तत्रादौ सवनीयस्यालंभः पश्चादितरयोरागंतुकयोस्ताभ्यामाश्विनग्रहणेनोपस्था
पनाद् अनुष्ठेयत्वावगतेः। तयोर्मध्ये पूर्वमग्नीषोमीयस्य प्रकृतौ तथा दृष्टत्वात्। यद्यपि भिन्नकालत्वात् प्राकृ
तिकं पौर्वापर्यं तयोः अप्रसक्तं न चार्थिकं चोदकः अतिदिशति तथापि संदेहे दृष्टानुरोधि विशेषोऽव्य
वसायको भवतीति न्यायेन पूर्वं दृष्टत्वमेवात्र निर्णायकमिति मिश्राः। अनियत एवानयोः क्रम
इति राणकः। प्रधानक्रमेणांगानां क्रमो मुख्यक्रमः। यथाग्नेयादिक्रमेण निर्वापादिक्रमः। एकांगक्रमेणान्यां
गानां क्रमः प्रवृत्तिक्रमः। यथा वाजपेये सप्तदश प्राजापत्यान्पशूनालभत इति सप्तदश यागाः प्राजाप

पतिदेवस्या विहिताः स्तोसं प्रतिपन्नदेवस्य तास्तु ह कार्यतयानुष्ठाप्यं ते प्रयोगविधिना। तदङ्गान्यारादुपका
रकाणि तन्त्रेण। सामवाय्यिकानि तूपकारणादीनि विशेषग्रहणात् प्रतिपत्न्यावृत्त्या। तत्रोपकरणं सर्व
पत्नीनायेन क्रमेण प्रवर्त्तते तेनैव नियोजनादीन्यपि कार्याणि। स्वयं प्रवृत्तिक्रमः। दर्शपूर्णमानापूर्वं यथा
संस्तवं बलवत्। प्रवृत्तेर्मुख्यक्रमो बलवान्। यथा दर्शे दधियागानामातं च न पूर्वं घृतः प्रवृत्तं पश्चादा
ग्नेयं यागप्रवृत्तिः। प्रयाजशेषाभिघारणादुदितु प्रधानक्रमेण पूर्वमाग्नेयहविषः पश्चाद् ध्रुवः। नतु प्र
वृत्तिक्रमेण पूर्वं द्ध्रुवः प्रवृत्तिक्रमे ह्यंगानां परस्परं प्रत्यासत्तिर्भवति। मुख्यक्रमे त्वंगानां प्रधानैः प्रत्या
सत्तिरनुगृहीतेति तस्य बलवत्त्वं। मुख्यक्रमाच्च पाठक्रमो बलवान्। यथा पांशुपाशाभ्यामिवर्षपः पाठे
न पुरोडाशप्रथनकाले न्यनुष्ठेयो न तु मुख्यक्रमेणाग्नेययाग व्रीहिनिर्वापानन्तरं। पाठस्त्वार्थेनाथो
उकार्थे दोहरणे। यथाहि भ्यः श्रुतिः। यथाश्विनस्य पात्रस्य तृतीयस्थाने ग्रहणे प्राप्ते त्वाश्विनो दशमो
गृह्यते इति श्रुत्या दशमस्थाने ग्रहणं। यदर्थितमेतत्प्रमाणजातं मीमांसाप्रकाशेतात वरपोरि स त्यक्तं।
एतैः सप्तभिः प्रमाणैः पर्यपदार्थविशेषणतया प्रयोगविधिरनुष्ठापयति। अनुक्रमेण प
दार्थानुपादित्सिं भिन्नप्रयोगविधिपरिगृहीतानानुपदार्थानां नानाक्रमोगं। अपाक्तधियाँ
पर्यायमात्रं बोध्यते। यथा दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति। एवं वा व प्रथमो पदेशो

मा॰ ३

न५२

45

यज्ञानां यज्ञोऽग्निष्टोमः य एतेनानिष्ट्वाथान्येन यजते गर्तपत्यमेव तद्भवतीति च। अत्र दर्शपूर्णमासोत्तरकालत्वं
सोमयागानां श्रुत्या विधीयते। उत्तरकालत्वं च तद्विकृतीनामेतेन विधीयते। तेनाग्निष्टोमसंस्थो ज्योतिष्टोमस्ततो
क्थ्यषोडश्यतिरात्रसंस्था विश्वजिदादयश्च कामाः। यद्यप्येतेनेत्यत्र ज्योतिष्टोमसंस्थो ज्योतिष्टोमः परामृश्य
ते। तस्य नित्यत्वात्। अथान्येनेत्यत्र विकृतिमात्रमुक्थ्यादिसंस्थाश्च काम्यत्वात्। अत्र पशुकाम उक्थ्यं गृह्
णीयात्। षोडशिना वीर्यकामः स्तुवीतातिरात्रेण प्रजाकामं याजयेदिति वाक्यैः सोमयागाश्रिताः रा
पाकमतेवरमसोमयागान्यासरूपाणि अमतेसमाहितसंबन्धिस्तोत्ररूपा उक्थ्यादिपदवाच्याः संस्थाः
फलाय विधीयन्ते फलार्था गुणेषु वाक्यप्रयोगमीति देश्याः। न चैवमन्यशब्देन संस्थानामेव ग्रहणं सन्नि
धानात् नतु विश्वजिदादीनामिति वाच्यं। यो वै त्रिवृदन्यं यज्ञक्रतुमापद्यत इत्यादिवाक्यशेषे तेषामप्युपस्थि
तेः। क्वचित्तु भिन्नप्रयोगविधिपरिगृहीतानामानन्तर्यरूपोऽपि क्रमोऽगं। यथा यः सोमेन यक्ष्यमाणोऽग्नि
मादधीत सन्नर्तुपृच्छेन्न नक्षत्रमिति। अत्राधानकर्तुः सोमेन यक्ष्यमाण इति विशेषणमुच्यते। तच्चेन
स्यान्नयोगव्यावृत्त्या सोमेन यक्ष्यमाण एव नायक्ष्यमाण इति। निसतां सोमस्यायक्ष्यमाणत्वाप्रसिद्धेः।
नान्ययोगव्यावृत्त्या सोमेनैव यक्ष्यमाणो नान्येनेति होमादेरप्यवश्यकर्तव्यत्वेन सोममात्रकर्तृत्वाप
प्रसिद्धेः। अतः सोमेनानन्तरं यक्ष्यमाण इति विशेषणात्। यः। तेनाधानानन्तरमेव सोमं कुर्वन् सोमांगत्व

ऽनक्षत्रादिनाविचारयेदितिवचनार्थः। नत्वाधानकालप्रतिषेधोयं। यदहरेवैनंश्रद्धोपनमेदथा
दधीतसैवास्यर्द्धिरितिवचनेनतस्यक्लृप्तत्वात्। तेनाधानानंतरंदर्शपूर्णमासौकृत्वासोमकरणाद्
इष्टिपूर्वाधानमित्युच्यते। सोमस्यैवकरणेसोमपूर्वाधानमितिपक्षद्वयंत्रैवर्णिकानां। ननुब्राह्म
णस्यसोमएवत्वमेव। तंप्रतिसोमादूर्ध्वमिष्टेरुत्कर्षविधानात्। आग्नेयोवैब्राह्मणोदेवतयास
सोमेनेष्ट्वाग्नीषोमीयोभवतियदेवादःपौर्णमासंहविस्तत्तर्ह्यनुनिर्वपेत्तर्हिसउभयदेवत्योभव
तीति। अत्रहिपौर्णमास्याउत्कर्षोविधीयते। नचतावन्मात्रेणदर्शःफलायकल्प्यते। तस्मात्कृत्स्नोत्क
र्षइति। अत्रकैश्चित्। वचनात्पूर्णमास्याएवोत्कर्षोदर्शस्तुप्रागेवेत्येवंविहितादेवफलायेति। अ
न्येतुनपूर्णमास्याअप्युत्कर्षःकिंतर्हिपूर्णमासीधर्मकंकर्मांतरंसोमादूर्ध्वंविधीयतइति। सकृ
त्स्नपूर्णमास्यंतर्गताग्नीषोमीयपुरोडाशमात्रस्योत्कर्षः। एवोत्तरवाक्यसंदर्भात्। नचैता
वताकृत्स्नोत्कर्षोनिष्प्रमाणकःशक्यःकल्पयितुं। वचनात्स्वरूपंचप्रागनुष्ठानं एवंसोमोत्तरत्वपक्ष
मितिब्राह्मणस्याहिताग्नेःपक्षद्वयमितिसंक्षेपः। तस्मादेकप्रयोगपरिगृहीतानामेवश्रुत्यादिप्रमाण   शि॰ २
प्रक्रमनियमः। अन्येषांतुवाचनिकंपौर्वापर्यमानंतर्यंवेति। एवंनियतक्रमाणामेकस्योत्कर्षेत
दादेरुत्कर्षोपकर्षेतद्वत्तस्यापकर्षः। दंडाप्रदवत्। यथासवनीयपशावाग्निमारुतादूर्ध्वमनुयाजै

श्चरंतीत्यनुयाजानामिष्टोदक्षिणादानोत्तरकालानामपि मारुतशाखोत्तरमुत्कर्षे विहिते तदादीनां सूक्तवा
कादीनामुत्कर्षः। अनूयाजानन्तर्यं हि सूक्तवाकाङ्गं तद्बाधेन पूर्वोक्तप्रमाणात् सूक्तवाकादिगुणस्यादे
व मध्येऽपि पाठान्निबद्धक्रममुत्कर्षयोग्यता। अत एव पुरोडाशाङ्गानां दाक्षिणाग्निकानामपि ष्टलेपहो
मानामेतैरनुयाजैः पुरोडाशप्रसङ्गादुपकृतैर्हविर्भिरपि पुरोडाशाभिध्यपरिगृहीतैर्नोत्कर्षः। भिन्नप्रयोग
विधिपरिग्रहेणानिबद्धक्रमत्वाभावात्। एवं तिष्ठत पशुं प्रजंतीति प्रयाजानां प्रश्नतो हविरासादनो
त्तरकालानां स्वीवति पश्चादपकर्षे विहिते प्रयाजांतानां सामिधेन्यनुवचनादीनामपकर्षः। आघारा
नंतर्यं हि प्रयाजाङ्गं। तद्बाधेन त्रिप्रमाणाः प्रयाजाः विगुणाः स्युः। तेनाघारेऽपकृष्टे ततः प्रागप्यपक
२ र्षे इति पाठान्निबद्धक्रममपकर्षयोग्यता। अत एव सोमाङ्गाग्नीषोमप्रणयनोत्तरमाम्नातस्य पाशुक
त्या रूपच्छेदनस्य दीक्षासु यूपदाहिनस्त्रीये दीक्षाह्न्यपकर्षे विहिते नाग्नीषोमप्रणयनापकर्षः। भिन्नप्रयोग
विधिपरिग्रहेणानिबद्धक्रमत्वाभावात्। एवं दर्शपूर्णमासयोर्हविरभिघारणोत्तरमाम्नातावेदिःकृ
वेद पुरमावास्यायां वेदिं करोतीति दर्शे पूर्वेद्युरपकृष्टानलं तामपकर्षति। सामान्यतः पाठेन कल्प्ये क्र
मबोध्यायागेव विशेषतो वचनापकर्षविधानादेकप्रयोगविधिपरिग्रहेऽपि क्रमक्लृप्त्यभावात्। अन
पेक्षितान्यत्रोत्कर्षापकर्षौ ह्यावित्तिसंक्षेपः। यत्र तु तत्प्रमाणाभावस्तत्र क्रमानियमं बोधयति। यथा ४६

क्रम

प्रयाजानुमंत्रणानां वसंतमृतूनां प्रीणामीत्यादीनां मेकोमभैकेत्यादीनां च शाखान्तरे देनाम्नातानां। एषां हि सर्वशाखोपसं खा॰
हारन्यायेनाद्यृष्टार्थत्वेन च समुच्चयेसति न किंचि क्रमनियामकमस्तीत्यनियतः क्रमः। आद्यपोर्वेति क्रमेणाप्र
वृत्तिस्तेनैयान्येषामुपाकारणादिवर्दिति चेत। न। तथा साहित्यबोधकैकप्रयोगविधिपरिग्रहाभावात्।
तत्तछारवीयप्रयोगविध्यनुछापितानां हि पश्चात्सोपसंह्रियत इति। अपच क्रमः पदार्थानामेवोक्तः। ए
कविधिविहितश्चात्रैकः पदार्थः। न त्वेककपालेसाध्यः। तेन चतुरश्चतुरो मुष्टीन्निर्वपतीत्येतद्विधिविहितश्चतुर्मु
ष्टिनिर्वापि एकः पदार्थः। तेनाग्नेयाग्नीषोमयोस्तावतानुसमयो न त्वेकमुष्टिनिर्वापेण। एवमष्टाकपालानु
पदधातीत्येतद्विधिविहितमष्टसंख्याककपालोपधानमेकः पदार्थस्तेनाग्नेयादौ तत्संख्यककपालोपधानेना
नुसमयः। एवं प्राजापत्यपशूपाकरणादीनां पदार्थानुसमयः। एवं चतुरवत्तं जुहोतीत्येतद्विधिविहितोवदा
नादिहोमांतएकः पदार्थः। अत एवा कश्चहोमांगत्वेन चतुरवत्तं विधीयत इति भाष्यकाराः। सकृदुपस्तृणातिद्विर्ह
विषोवद्यति सकृदभिघारयतीति याक्यांतरश्च प्राप्तचतुरवत्तानुवादेन तस्याति पस्यर्थतया होमावयवभूतः प्र
क्षेपोविधीयत इति वार्तिककाराः। वक्ष्यते चैतत्। मतद्वयेपि द्विर्हविषोवद्यतीति न स्यात् तेष्येण द्व्यवदानविवर्य
न तावानेकः पदार्थः स्यान्न। किंतु चतुरवत्तविध्यपेक्षितमेव द्व्यवदानं समर्पयिष्येष भूतमेवैत्येकविधिविहित

त्याहवदानादिप्रदानां तदेकपदार्थस्तेनानुसमयस्त्वाग्नेयादौ। एवं यत्र विधिभेदस्तत्राप्येकविध्यवयपवसे
नविधानादेकपदार्थत्वं यथा व्रीहीनवहन्तीति तण्डुलनिष्पत्तिकामप्रमदघातभावनायां विहितायाः कृष्णाजिने
मध्यस्तादवस्तृणातीत्यारभ्यात्रिःफलीकरोतीत्यन्तैर्विधिभिस्तण्डुलभावनावयवत्वेनैव गतादर्थविधाना
कृष्णाजिनास्तरणादिफलीकरणान्त एकः पदार्थस्तेन नानाव्रीहिष्वेतावता प्रतिव्रीहि मनुसमयः।
यत्र तु पदार्थानुसमये किंचिद्बाधकं तत्र काण्डानुसमयः। यथाश्वप्रतिग्रहेष्टौ पौण्डरीकादिसंबन्ध्यश्वदान
निमित्तायां सहस्राद्विसंख्यपुरोडाशानामेकदेवत्यत्वात्सह प्रयोगे यदि निर्वापादीनां पदार्थानुसमयः
क्रियेत ततः सर्वेषां मध्ये श्रपणं कृत्वा घस्योद्धारणेत्सस्य भस्मीभाव एव स्यादतस्तत्रैकस्य निर्वापादिकां
डमपवर्ज्यान्यस्य कार्यं। एवं पश्वैकादशिन्यां यूपेषु यूपैकदेशे यूपधर्माणामञ्जनादिपरिव्ययणान्तानां
काण्डानुसमयः। अञ्जनादिपरिव्ययणान्तं यजमानो यूपं नायमत्यजेदिति विहितस्य यजमानकर्तृक
स्यानवसर्गस्य पदार्थानुसमये संभवादित्युक्तं। सर्वेषु च वायं क्रमः स्यान्नोपचारप्राप्तपदार्थानुष्ठाप
नोत्तरमनुष्ठाप्यमानस्तदावरोधेनैव बोध्यते। यथा वेदवेदिकरणयोरेवं तावच्छ्रुतप्रयाजादौ दर्शितस्मा
र्तस्मृतानि भिन्नानां चमनप्राशनोत्तरद्व्यवधानेन क्रमः नोचेद्यथाश्रुत एवं स्यादेवं सर्वत्र। न चाचमनादिव्य
वधाने श्रुतिविरोधः। प्रधानभूतप्रयाजे पदार्थबोधकत्वेन स्मृतेरप्यन्यप्राबल्यात् गुणभूतद

बलक्रमबोधकत्वेन श्रुतेर्दौर्बल्यात्। न प्रमाणबलाबलाद्धि प्रमेयबलाबलं बलीयः प्रमेयविरोधश्चात
त्र प्रमाणविरोधस्य। विरोधालोचनपूर्वत्वाद्बलाबलालोचनस्य। वस्तुतस्त्वाचमनादेः श्रुत्यादि
निमित्ताशुद्धिपरिहारार्थत्वेनागतत्वान्न व्यवधायकत्वमिति नास्ति श्रुतिविरोधः। तदुक्तं। वेदिरेव यद्यना
चम्य कुर्वीताविगुणा भवेत्। तामेव सगुणां कर्तुं श्रुत्या न व्यवधास्यतीति। इत्थं सक्रमकसांगप्रधान
प्रयोगमनुष्ठाप्य कस्मिन्देशकाले कैः कर्तृभिः स्वरूपं प्रयोगोऽनुष्ठेय इत्यपेक्षायां प्रयोगवाक्यान्तरबोधितत्वात्तदं
गत्वेन बोधयति। तत्रानुपादेयो देशः प्राच्यार्यावर्तादिः स्मृतिप्राप्त एव। समे दर्शपूर्णमासाभ्यां यजेत प्राचीन
प्रवणे वैश्वदेवेन यजेत इत्यादिवाक्यप्राप्तः प्रयोगांगं। अनयोर्भेदाच्च प्रयोगभेदः। यथा वरुणप्रघासप
र्वणि दक्षिणोत्तरविहाररूपदेशभेदात्। दर्शपूर्णमासयोस्तु कालभेदात्। एवं काम्यफलकामदृष्टवक
र्तुः फलभूतिनियमात् तथापि वरुणादक्षिणादानाम्नानात् स्वर्गस्य तयोरसंभवादन्येऽसमानयाः।
तत्र दर्शपूर्णमासयोर्यजमानकर्तृत्वाच्चत्वार ऋत्विजः। पशुबंधस्य यजमानकर्तृतः षड् ऋत्विज इत्यादिवाक्यैः
निपतादयोऽगं। तत्प्रयोजकत्वेन च फलकामस्य कर्तृत्वं। दक्षिणाभेदाच्च कर्तृत्वभेदस्तद्भेदाच्च प्रयोग
भेदः। यथा पूर्वोक्तावेष्टौ। आग्नेयमष्टाकपालं निर्वपेदित्यादिनोदक्षिणोत्पादिभिर्दक्षिणाभेदाम्नानात्।

तेनादिशामवेद्ययोभवतीतिवक्तव्यमुपपद्यते। एवमन्यत्राप्यूह्यं। इष्टमनुष्ठापितस्य प्रयोगस्य शास्त्रभावं बो
धयति। विलंबे मानाभावात्। न चात्रापि मानाभावः। भवतं भावयेदिति नैष्ठिकसंशब्दत्रयपुरुषभावना
याः युगपदनुष्ठापनादेकक्षणवर्त्तित्वं प्रतीयते। तस्यासंभवाच्छास्त्रभावकल्पनो पदार्थपरिमाणमप्य
विशेषात् समस्तपदार्थानुष्ठानायत्तेयमितिबोध्य इति केचित्। अभ्यासादेवतत्सिद्धेः स्मार्त्तपदार्थानिय
मार्थमेतन्न्यायेनेतिदिक्। इष्टमनुष्ठापितप्रयोगं नित्यनैमित्तिके षु निमित्तश्रुतस्य गतावश्यकत्वानुरोधेनप
याशक्तौ मुख्यवर्धनातितेनमुख्याभावे प्रतिनिधिग्रहणमंगाभ्यत्रैव प्रायश्चित्तमनुष्ठापयति। तत्र मुख्य
द्रव्याभावे तत्सदृशएव प्रतिनिधिरूपादेयोयथा व्रीहिलाभावेनीवाराः व्रीहिभिर्यजेतेतिव्रीहित्व
जातिसत्त्वव्यक्तिताव्यक्तिस्तद्दृश्यपार्श्वावयवाः पुरोडाशद्वारायागांगत्वेन विधीयंते। व्रीह्यसंभवे
चजातिव्यक्त्योरंगत्वबाधेपिनत्रवयवसादृश्येन नीवारोपादानेतदवयवानामंगत्वानुग्रहाद्यथा
शक्तीस्यवंधादिसदृशोपादानेवयवानुग्रहानुपपत्तेः। ननुवैकल्पिकरूपबोपादानभवतुनन्यायप्र
लभ्यप्रतिनिध्युपादानमितिचेत्। न। वैकल्पिकेध्वेकस्मिन्संकल्पितेन्यस्यतथानंगत्वात्। व्रीहिभिर्य
क्ष्य इति संकल्प्ययवोपादानेनानृतवदोदितिकश्चंगभूतानि षधातिकर्मः स्यात्। सुसदृशमपिनिषिद्धं
नप्रतिनिधेयं। पयाऽन्ययदिषा पावेमाषावरकाः कोद्रवाश्चेति। यद्यपिप्रतिनिधेनस्वरूपेणागतौर्कि

नुतद्गतानां मुख्यसदृशावयवानां। तथापि नांतरीयकस्तस्यापि यज्ञसंबंधोस्त्येव सत्व माषादीनां निषिद्ध
इति न तेषां प्रतिनिधित्वं। यदा प्रतिनिधिमुपादाय प्रयोगे प्रक्रांते मुख्यलब्धं तदा तदेवोपादेयं। तद
संभवनिमित्तत्वात्प्रतिनिधेः। निमित्तापाये च नैमित्तिकाभावात्। प्रतिनिधिना प्रधाने नुष्ठिते तु मुख्यला
भेपि न प्रधानावृत्तिः। गुणानुरोधेन प्रधानावृत्तेरन्याय्यत्वात्। यदा प्रधानमात्रक्षमा व्रीहयः नीवाराः
शेषकार्यपर्याप्ताः। अपि तदापि व्रीहय एवोपादेयास्तेषां स्वाश्रयप्रधानांगत्वात्। ननु नीवाराः शेषकार्य
प्ताः तत्संस्कारकृतयागांगत्वादंगांगाच्च प्रधानांगस्य बलवत्त्वात्। एवं यदा पशुर्बंधनमात्रक्षमः रश
दिरः कृदरस्कृ तन्न पाणू संस्कारक्षमो लभ्यते तदा स्वधिरोपादानेनैव। धर्मिणस्तु वा वाचनिक एव प्रतिनिधिः। प
दि सोमं न विंदेत्पूतीकानभिषुणुयादिति। यत्र हि न सोमाभावे पूतीकानां विधिः। सोमसादृश्ये न तेषां
प्रतिनिधित्वेन प्राप्तेः। यद्यपि तेभ्यः सुसदृशानामन्येषामस्त्वान्नमदसदृशानां तथापि सर्व
सदृशद्रव्योपादानिपाते या च न्यायेन सुसदृशं नियम्यते तावद्वचनेन मदसदृशाः पूतीकाः नियम्यंत
इति प्रतिनिधिनियम एवापाद्यः अपूर्वविधित्वे तो नियमविधिर्वा यथाऽऽज्ये। यदा न्यायलभ्येन वाचनिके
न वा प्रतिनिधिना प्रक्रमे तस्यापचारस्तदा न तत्सदृशमुपादेयं। किंतु मुख्यसदृशं। प्रतिनिधेः स्वरूपेणा
नंगत्वात्। तद्गतानां मुख्यावयवानामंगत्वात्। केषांचित्तु प्रतिनिधिः यथा रेवतीपाः यज्ञियायागयेन

यथा ७

नो

शब्देन यावद्विहितास्येव ते नैव शब्देन दृष्टा तत्र देवतेति देवताविधिगम्यत्वेनादृष्टद्वारा यागांगत्वात्तदुप
चारे प्रतिनिहिता यागः तददृष्टं सिध्यतीति प्रमाणाभावात् । तथाग्नेराहवनीयादेराधानजन्यादृष्टसं
स्कारत्वेन तदुपचारेन्येन तत्कार्यसिद्धौ मानाभावान्न प्रतिनिधिः । तथा दृष्टार्थप्रयाजादिक्रिया
प्रचारे क्रियान्तरेण तत्कार्यसिध्यसंभवान्न सः । तथा मन्त्राणां दृष्टार्थत्वेपि तदुपचारे न सः । तत्कार्यस्य
र्थस्मरणं । अपचरितमन्त्रार्थास्मरणे कमर्थं स्मरेत्तु प्रतिनिरूपादेयः । स्मरणेन्तु सिद्धे कार्ये किं प्रतिनि
धिना । तथा यजमानस्य अपि तस्यान्यत्र व्यापृतस्य मृतस्य न प्रतिनिधिः । प्रतिनिध्युपात्तस्य तत्
स्य स्वामित्वापरपर्यायो यजमानत्वासंभवात् । फलिसंस्कारावपनादयः अपि तद्व्यापृतताभ्यासस्व
येकार्याः । अप्यावेक्षणादयस्तु यजमानानीतिविशेषसमाख्यावाध्या ध्वर्युर्वामितिसामान्यसमा
ख्यया अध्वर्युणा कार्या इति किं प्रतिनिधिना । ऋत्विक्तु पुरुषान्तरोपादानेध्वर्य्वादिप्रवर्तने वक्तुरभा
वात्प्रत्यासत्त्ये स्वतंत्रोपादानेनैव तदकर्तृत्वान्न प्रतिनिधिः । सत्रादौ तु सप्तदशासु यजमानेषु
कस्मिन्मृते संख्यापूर्णाय तस्यैव प्रतिनिधिः । यद्यपि प्रतिनिहितो न स्वामी मध्ये प्रविष्टत्वात् संख्या
पूरणाय सामर्थ्यादिभिरानयनात् तथापि क्रत्वर्थपदार्थेषु फलिसंस्कारेषु वपनपरिच्छेदकसंख्या
संपादनायानेयः । यथाश्रुतिसूपवर्धातेः सत्राणां काम्यत्वेप्यारब्धानां नित्यत्वात् । एवमग्न
ध्वर्य्वादिकर्तृणां दृष्टोपायघातादिक्रियायाग्रणस्य चाक्षितप्रतितानौरसत् । अप्यपापेक्षिता

प्रि प
वा ६

५५

नि। यस्य सर्वाणि हवींषि नश्येयुः इत्यादिवाक्यात् प्रधानार्थवित्तनाशादावन्ये न यागः कार्यो न शेषास्तु
नरववदानं। प्रविकलपुरोडाशीयमध्यपूर्वार्धोपादानं कार्यं वदानस्य प्राप्ताष्टकारमते यागहविष्टुत्वात् त
स्य पुनरसंभवात्। वार्तिकमते पि सकलपुरोडाशस्य पात्रद्वयस्थस्य व्यासक्तहविष्ट्वात् तस्य च नाशात्।
एवं प्रायश्चित्तमित्यवर्ष्यवित्तनाशे पि न पुनरेवावदानं किं त्वाज्यमहत्वार्थस्विष्टकृदादौ। ननु प्रकिरणादेस्त
त्रोपदेवा। यस्य पुरोडाशः क्षायति तं यज्ञं निर्ऋतिर्गृह्णाति यदा तदुद्वासं तिष्ठते। एतदेवानवपियः प्रायश्चित्तमस्य
प्रायश्चित्तिरिति। न च क्षस्तदाहे पुनःप्रयोगात्मकं प्रायश्चित्तमेकदेशदाहस्यावर्जनीयत्वात्। भिन्नेन्तु हो
तिरचान्नेतु होतीत्यत्र न लौकिकभेदनादिनिमित्तं नैमित्तिकहोमस्य फलवत्त्वं नापातात् किं तु प्र[illegible]णात्
कपालभेदनं हविः स्कंदनं चात्राधिशोपश्रुतः सत्त्वेनैकदेशभेदनयोर्निमित्तत्वमेवं स्कंदनस्यापि न
च होमस्य भिन्ने संस्कारत्वात् तस्य भिन्नस्यानुपयोगित्वात् नासंस्कार्यत्वादेकदेशभेदे ए च होम इति वा
च्यं। भिन्नस्य संस्कार्यत्वे निमित्ताश्रुतेर्निःसंयतत्व[illegible] सङ्गता होमस्य स्यात्। संस्कार्यत्वे निमित्तत्वे निमित्तनित्या
नित्यसंयोगविरोधः स्यात्। प्रति प्रयोगं भेदनं कार्यमिति वापद्येत। तस्मात् सहस्रमी श्रुत्यादिनिमित्तं भेदनं। न च
संघर्षणस्यकपालानां कपालानामेकदेशभेदस्यावर्जनीयत्वेन न नैमित्तिकतेति वाच्यं। संघर्षणभेदनयोर्लौ
कप्रसिद्धभिन्नत्वेनैकदेशाभेदत्वेस्य कादाचित्कत्वात्। तेन प्रतिभेदनमावर्तते प्रतिनिमित्तं नैमित्ति
काप्तिरित्यापातात्। एवं स्कंदनेपि। यस्योभयं हविरार्तिमार्च्छेदित्युभयार्तौ पंचशरावयागः प्रायश्चित्तं द

कपाल

ति।

५८

र्शकर्मांगत्वेनाविधीयते। तथा च दीह प्रतिनिधित्वेन दर्शेऽपि चशरावद्द्रव्यविधानं। प्रायश्चित्तयागे द्रव्य
विधौ महेंद्रविकल्पितेंद्रदेवतानियमो विधौ वाक्यभेदात्। अन्यथेंद्राग्नी इति पाक्षिकानुवादेन च एकः
स्यात्। न च द्रव्यनाशे न दर्शकर्मणो निवृत्तौ तस्याङ्गस्य साधुनाकांक्षायामिदं कर्म तत्कर्मस्थानापन्नं
विधीयतां न तदंगत्वेनेति वाच्यं। इष्यांतरस्यादिसंभवेन कर्मनिवृत्त्यभावात्। प्रकरणात्तु द्रव्यनाश
निमित्तवैगुण्यपरिहारार्थत्वेन तदंगत्वेन विधानं। यस्य हविर्निरुप्तं पुरस्ताच्चंद्रमा अभ्युदियात्स
त्रेधा तंडुलान्विभजेत् ये मध्यमास्तानग्नये दात्रे पुरोडाशमष्टाकपालं निर्वपेत् ये स्थविष्ठास्तानि
न्द्राय प्रदात्रे दधंश्चरुं ये क्षोदिष्ठास्तान्विष्णवे शिपिविष्टाय शृते चरुमिति वाक्येऽलकालोपक्रमे
निमित्ते दर्शस्यैव पूर्वदेवतापनयेन देवतांतरसंबंधो विधीयते। न त्वेकर्मांतरं प्रकृतहविर्विभाग
श्रुतिज्ञानात्। सत्यागतो विशिष्टविध्यादिगौरवायोगाच्च। तथाहि। त्रेधा तंडुलान्विभजेदित्यत्र
त्रेधाविभागस्य मध्यमादिवाक्येष्वेव सिद्धेरविधानाच्चंडुलपदस्य प्रकृतहविस्त्वरोपलक्षकत्वे
मामिस्य हवींषि विभजेदित्यर्थः। विभागस्य संयोगापेक्षत्वात्सर्वहविषां च देवतासंयोगश्रवणा
देवताभ्यो विभागो विधीयते। तत अपरिसंख्यायागान्वयाना हविषां देवतांतरसंयोगापेक्षिता मध्य
मादिवाक्यैर्विधीयते। मध्यमानुद्दिश्याग्निदातारौ विधीयेते तत्रान्यान्न धीर्वाद्दिश्य इंद्रः प्रदाता क्षोदिष्ठा
न्वोद्दिश्य विष्णुः शिपिविष्टः। दात्रादिशब्दानां योगकल्पासंदेहप्रतिपादितेक देवताकारकविधाना

गे ५८

न्नवाक्यभेदः। स्तहश्रपयतीति वाक्येन संप्रतिपन्नदेवतयोर्दधिपयसोर्विधेयोः भूतत्वादितरेणाध्यसह श्रप
णाद्दधिश्रुतपोरधिकरणत्वस्य चरुत्वस्य च प्राप्तेः। उत्पत्त्यदृष्टनिमित्तो वाक्यभेदस्तु वाक्यद्वयेन गत्यभा
वादंगीक्रियते। पदाधात्वर्थाभेदेपि सर्वकारकविशिष्टभावनांतरविधानाद्वाक्यभेदः। तदुक्तं। भिद्य
ते भावनामात्रं धात्वर्थो न व्यभिचरतीति। एवं वदध्युपांशुयाजपक्षे तद्धविर्धिपूर्वं देवतापनयोस्त्वे
व। देवतांतरासंबंधात्तु तस्य लोपः। यद्यपि निमित्तवाक्येन निर्वापः शूर्पे तत्पात्रविपर्ययोपि क्रमोपलक्षितमभ्यु
दाभ्युदयो निमित्तं। पयसः हविरभ्युदितपात्रं इति समवेतस्य हविषोभ्युदयसंबंधासंभवात्तद्वत्तं हविरिति
बोधात्। तद्विशेषणस्य निर्वापस्याविवक्षितत्वात्। अतश्च तु दर्शपूर्णमासाक्रमोपि क्रमेव दाभ्युदयो
भावीति ज्ञाते नैमित्तिको देवतांतरसंयोगः कापोनित्यतंडुलावस्थे हविषि। तत्र ग्रहणस्याविवक्षितत्वा
त्। यथा ते वैद्धि मुष्टिनिर्वापानंतरं चेदभ्युदयस्तान तदा वशिष्टनिर्वापस्य पूर्वदेवतापनयेपि देवतां
तरसंयोगस्यापदार्थैः संभवाच्चतुर्भीकरणात्। विभागोपि हि संयोगमात्रापेक्षः पदार्थविपर्ययेपि संभवति।
संयोगस्तु प्राक्कृतीनां पदार्थैनैव क्रमद्ध इति तत्स्थानापन्नत्वे कृतीनामपि पदार्थैर्नैव संयोगात्। अत्र संक्लृ
प्तोपीदं नैमित्तिकं शायपश्चित्तं भवति। तस्य दधिश्रुताभावेप्युद्देश्यत्वाद्धि तस्याविवक्षितत्वात्। तदुक्तानामे
व देवतांतरसंयोगसंभवादिति। संक्षिप्ताभ्युदयेष्टिस्तु पथामहूलजितप्यतां। विस्तरो स्याभ्यात्। तस्मात्तेभ्यादाल

कारत्वाप्यतां। एवमन्यानि प्रायश्चित्तान्यूह्यानि वक्ष्यंते यथावसरमिति दिक्॥ सोयं प्रयोगविधिरंगवाक्यैरे
कवाक्यतापन्नः प्रधानविधिरिति कल्प्यत्वादूहादिवद्वेदितराणके। लिंगादिकल्प्यश्रुतिवद्भेद
एवेति मिश्राः॥ अपूर्वविधिरात्यंतविषयगतसंशयं। परस्परं तु वकृद्दरस्पंतु जीव भोमिक दर्शितं। पक्षप्रा

प्तधर्मनियमबोधको नियमविधिः। नियमश्चाप्राप्तांशपूरणं। यथा व्रीहीनवहंतीति। पुरोडाशाधारा
यागार्थत्वेनावगतानां व्रीहीणां वैतुष्याकांक्षायां कदाचिदवघातः कदाचिन्नखदलनादिनापि प्रा
प्यते। तत्र विदलनादिपक्षेऽवघाताप्राप्तांशस्तदंशावघातकर्तव्यतानेन विधीयते। यद्यपि चाक्षेपात्त्वा
गेव शास्त्रप्रवृत्तेरपूर्वविधिरेवायमिति प्रतीयते। तथापि यदि शास्त्रं तस्मात्तदाक्षेपः प्रवर्ततेत्या
लोच्य फलतो नियमविधिरिष्यते। अप्राप्तांशपूरणं चावघातस्य नखविदलनादिनिवृत्तिगर्भत्वं स
प्यादिकीनां विधिफलं। यथ मोपक्षितौ नियम एव तु भावरूपस्तात्पर्यमिति भवति नियमविधिः। एवं
हविष्कृदेहीति त्रिरवघ्नन्नाह्वयतीति। अत्र मंत्रत्रिरभ्यासविशिष्टोक्तानस्य नियमविधानादितराण
के। अपर्युदासप्राप्तानामनुवादेन त्रिरभ्यासमात्रविधिरिति मिश्राः॥ एवं द्वादशाहे पत्नीसंयाजांतान्यहानि
संतिष्ठंते इत्याग्नेयमाधुरिः पत्नीसंयाजांततानियम्यते। द्वादशानामह्नां सांगानां साहित्येन फलोद्दे

शानासत्त्वोर्यदा दृष्टार्थौ गसह प्रयोगावगमात् सर्वेषां दीक्षोपसदादीनामिव ... सहप्रसह
ने मनुष्ठानां सिद्धि सहप्रयोगावगतेः कियतांसह प्रयोग इत्यपेक्षायामनियमे प्राप्ते पत्नीसंयाजांतान्वे

कादशाक्षरां स्येष्टिः शेषाणां सह प्रयोग इति नियम्यते। सर्वैर्बृहस्पतीसंयाज्यां तां त्वा विधोकमशिष
प्रतिषेधे सस्सपूर्वविधिः स्यान्नियमविधौ तु लाघवं। एवञ्च हि सिर्पर्जने तेस्याद् इत्यस्य नियमः प्रकृतौ
विकृतौ लाघवन्याय पत्नीः संयाज्यं पंती इति दर्शपूर्णमासयोः पत्नीसंयाज्ये षु आद्यन्याज्यपयोर्विकल्पितयोः
पशौ प्राप्तयोर्याघनीन्नियमः। गुणास्पारूणयांकी याती इति प्रसक्तो नियमः। विस्तृतोऽस्तु क्वानात्रीहीणां
चरुर्भिन्नतां देशकालकर्तॄणां नियमविधयः प्रागुक्ताः एव। एवं क्रियादीनां दृष्टार्थो योविः स नियमवि
धिः। तेन सम्भिधोपन्नतीति दर्शोऽदेपकामस्य तुरूयायदिकामये दृषुकः पर्जन्यः स्यादितिनी वेः सदो
भिनुयात्सर्वमेध्यकाकाममुपनयेदित्सादीनां व्यावृत्तिः। भ्रान्त्या पक्षप्राप्तावपि नियमो भवतीति
केचित्। यथा मां आतव्य इतिवैश्योद्विकादेरप्याप्तस्या नार्थतया श्वां स्यात् प्राप्तौ वेदान्तश्रवणानिय
म्यत इति तीर्थातिर इति दिक्। इतरनिवृत्तिफलको विधिः परिसंख्याविधिः। परिवर्जने संख्या। बु
द्धिः। वर्जनबुद्धिहेतुरित्यर्थः। सर्वो भयोर्विध्येपानवस्य योर्निसप्राप्तौ भवति। परिसंख्या च शा
स्त्री फलवती इति द्विधा। त्रीणि हवै यज्ञस्योदराणि गायत्री बृहत्यनुष्टुप् चात्र ह्येवावपन्ति अत एवोह
पंतीति। ज्योतिष्टोमे बहिष्पवमानादिषु त्रिषु पवमानस्तोत्रेषु गायत्र्यादिछन्दस्काः कृचोभिभिपुक्ता
स्तानि छन्दांस्यु रवदभ्याहितानीति स्तुतिः। विकृत सोमेषु कविशेषेणातिरात्रेण प्रजाकामे याज

१ इष्टकाहरणार्थमग्निगर्दभरशनानामुहणवोर्मन्त्रस्यातिगान्निप्राप्तो संभावितावामन्त्रवाक्यदेगर्दभरशनादानामंत्रस्य निवृ
१ त्तिर्वोध्यते पप्रथिमाश्रोऽक्रात् इत्यतरश्याभिधान्यामयं मन्त्रविधिस्तथापि यद्यपनस्यालदातिगादरशानिधान्यां मंत्रः प्राप्नुयाद्

५२ येदित्यादिषुयस्तोमप्रहर्षधर्मग तरावाषोपश्वन्यूनस्तोमेषु त्रिवृदादिनष्टदर्शनष्टोम इत्यादिषुस्तोम

मुहः क्रमस्य चापिस्तोमभोगाय इत्यादिष्वेवकार्यो नान्यत्रेति वचनार्थः। अत्र सर्वस्तोत्रेषावापोद्वापयो
निःसृप्राप्तोपवमानातिरिक्तस्तोत्रेषु तयोः परिसंख्या शाब्दी। अत्रघेवे सेव कारेणान्ययोगव्यच्छेद
र्थेनुतेतरनिवृत्तिप्रतीतेः इयंश्रौती। लाक्षणिकीतु पंचपूर्वनरवाभक्ष्या इति। अत्र पंचानांपंचनरवा
नांशशादीनां तद्भिन्नानां च नांच भक्षणस्य रागतो नित्यप्राप्तौ तद्भिन्नभक्षणपरिसंख्यालक्षणयाश्रीय
ते। वाचकपदाभावात्। अत एवास्यां त्रयो दोषाः श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति। श्रुतपंच
पंचनरवभक्षणस्य रागप्राप्तत्वेन विधेयताहानं मश्रुतेतरनिवृत्तेर्विधेयताकल्पनं रागप्राप्तार्थबाध
इति शब्दनिष्ठा दावं त्रयोपनिषः वपनेद्रामगन्नानररसनाम तस्यैत्यभिधानी माददरति श्रुतेवा
क्येपफलतः परिसंख्यामिच्चसर्वत्राप्राप्तांशाप्रावान्तनियमः फलमितरनिवृत्तिरेव तु फलमिति दिक्।
एवमेषां त्रिविधो विधिर्भावनाविधानेनधर्मे प्रमाणं। उक्तञ्च। विधिरत्यंतमप्राप्तौ नियमः पाक्षिके सति।
तत्र चान्यत्र च प्राप्ते परिसंख्येति गीयते। इति। निषेधानां निवर्त्तनाबोधकत्वेनाधर्मे प्रामाण्यं। निषेधो नमक्ष ५२
तरवुत्कामित्रवाक्यानि नब्राह्मणोहन्याद् इत्यादीनि निषेधाश्च पुंसो निवर्त्तनार्थोनिवर्स नुकूलो व्यापा
उा१ रः स्याचनभोध्यते। ब्राह्मणहन्यादिति लिंगाराग तो ब्राह्मणकर्मकहनना नुवाद प्रवर्त्तनाप्रतीतो तत्स्वेव
१ वर्गालोच्य गर्दभाभिधानीत्यादानीन ... परिसंख्याविधिः। उक्तं च प्रकोचनेविधेः किंस्याद स्येति
१ दुनिरूपणे गर्दभाभिधानीतः पतमन्याः निवर्त्तनादिलिंदं पदवोदाहृतेगृहमेधीयातमान्यभागोपलतीलिवामुगानाराणांफलतः

ढेन नञायं भावं निवर्त्तयतीति लभ्यते। केचित्तु निपातानां द्योतकत्वात्तत्समभिव्याहृतविधेरेव निवर्त्तना
पाशक्तिमाङ्कस्यादिति धावनेकशक्तिकल्पनापत्तेर्नातीव युक्तं। निपातानां तु न द्योतकत्वं किंतु स्वार्थस्यैवा
र्थबोधकत्वं। इहापि विधिसमभिव्याहृतेन नञा निवर्त्तना बोध्यते। अन्यथा तु नञ् विध्योः केव
लयोरभावप्रवर्त्तनाशक्त्योर्मिलितयोर्निवर्त्तनायां शक्तिमाङ्कस्यादिति कृच्छ्रं। तस्माद्विधिनाप्रव
र्त्तनाद्वेषाद्यर्थ ब्राह्मणमन्नं घ्नतीति हन्ति निवर्त्तना नञा बोध्यते। पञ्चालणाह न्याप्तन्तेति। ननु नञो विधि
संबंधे स्यादेवं स्यात्तु ब्राह्मणपदेन संबध्यतामब्राह्मणं हन्यादिति हननेनवासंबध्यतां हननाभावकृपा
दिसंभावस्य वा कार्यत्वात् संबंधो लभ्यतां प्रधानविध्यबाधाय विधिनिषेधैकरूप्याय च लक्षणा
गीकारेण न दोष इति चेत् न। सर्वपदार्थानां प्रधानभूतविध्यन्वयदर्शनेन नञर्थस्यापि तथा प्रतीतेः।
ब्राह्मणपदान्वये च नञः सुबन्तसंबन्धेन समासः स्यात् इति कात्यायनोक्तेः समासापत्तेन लोपो नञ इ
ति नलोपापत्तिः। हननान्वये नञ हंसीलक्षणा स्यात्। परं भुत्त्वाभावनोपसर्जनत्वात् धात्वर्थस्य नवा
प्राधान्येनान्वयः। अत एव नाख्याताभिहितपदार्थभावनयान्वयस्तस्याः समानाभिधानश्रुत्यासप्रव
र्त्तनोपसर्जनत्वात्। अतः पारिशेष्याद्विध्यन्वयेन निवर्त्तनाभिधेया। सा च निषेधस्यानिष्ट हेतुत्वं वि
नानर्थ इति तदाक्षिप्यते। तथाहि अनिष्टपुरुषार्थनिषेधेषु पुरुषप्रसवाय क्रत्वर्थनिषेधेषु नानर्थत्वं

वदेन्नास्त्र्यमुपेयादित्यादिषु क्रतुवैगुण्यं। नन्वेषां पुरुषार्थनिषेधानुवादत्वमस्तु। पर्वाणि ब्रह्मचर्यस्य पुरुषा
र्थतया विधानात्। क्रतोर्नांच श्रावणपर्वणि विधानात्। अन्यतोक्तिवर्जनस्य सदा पुरुषार्थतया विधाना
५३ त्। पुनःश्रवणार्थलाघवात्क्रतुपुत्र पुरुषधर्मतपाविधिरस्तु। नलभुक्तक्रत्वर्थतया। यथा जन्नाभ्यमानोनु
ब्रूयान्मायदक्षक्रतदिति। क्रतुपुत्रं न्नंजाभ्यमानपुरुषार्थतया मंत्रलिंगेऽविधीयते। मैवं। पुत्रं तत्र पुरुषस
यो - गेनश्रवणात्। इहत्वाख्याते नक्रत्वर्थविधानात् पुरुषाश्रुते श्रवणात्। अतःपतिवादतेनानु
53 वादपक्षःश्रुयते। तेषां न चैषां प्राप्तिपूर्वा चैवास्य न्यथानित्यानुवादता। यथा न पृथिव्यामग्निश्चेतव्यो ना
तरिक्षे न दिवि हिरण्यं निधाय चेतव्यमित्यत्र यो निषेधः प्राप्तिपूर्वत्वाद्धि नित्यानुवादो। एवमाज्यभागोम
वत्सनाज्यभागाप्राप्तेः। प्राप्तिश्च रागात्। शास्त्रतो वा। तत्राद्या प्राप्तपुरुषेषु। द्वितीया तिरात्रे षोडशिनं गृह्णा
ति नातिरात्रे षोडशिनं गृह्णातीत्यादौ। शास्त्रप्राप्तस्य सर्वथा निषेधायोगाद्विकल्पः। निषेधस्य च नानि
त्यानित्येदेशशास्त्रस्य। पक्षीव्यत्वेन कल्पनाद्विरोधासंभवात्। कल्पितस्य च रागादिवत् न्यस्त बाधा
योगात्। ततश्च यत्र पदपप्राप्तिस्तत्र तदर्थनिषेधः। यथा यत्र प्राप्तिनिषेध पोरन्यार्थता तत्रनावकल्पो भिषे ५३
धस्य चोनिषेधहेतुर्न मन्त्रेदेवा यथा दीक्षितो न ददाति न जुहोति न पचतीत्यादौ पुरुषार्थत्वेन प्राप्तस्य होमा

देः। क्रत्वर्थो निषेधस्तत्र होमादेर्नित्यमकरणं कृतस्य च क्रतुवैगुण्यहेतुत्वं। यत्र तु निषेधाश्रयणे किंचि
द्बाधकं तत्र न निषेधवाक्येन नञो निषेधकत्वं। किंतु विधिभिन्नान्वयेन पर्युदासत्वं। यथाहुः। प्रति
षेधः स विज्ञेयः क्रियया सह यत्र नञ्। पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ्। अन्वेतीति शेषः। उ
त्तरपदं क्रियावाचिविधिभिन्नपदं। यथा नानूयाजेषु येयजामहं करोतीति। अत्र यजतिषु येयजामहं करोतीति सामान्यशास्त्रादनूयाजेषु प्राप्तयेयजामह इतिपदं निषिध्यते चेत् षोडशिन्यायेन
विकल्पः प्राप्नोति। तदनूयाजपदेन नञ् संबध्यते। तस्य सामान्यशास्त्रैकवाक्यतयानूयाज
भिन्नेषु यजतिषु येयजामहं करोतीत्यर्थः। तेनात्र विकल्पभयात्पर्युदासः। न चैवं षोडशिग्रहणादौ
पर्युदासः संभवति। ग्राहकस्याप्रविशेषशास्त्रत्वेनैकवाक्यतायाः असंभवात्। यद्यपि नतोषशीकरो
तीत्यत्रातिदेशस्य सामान्यशास्त्रत्वेनान्यभागवर्जनैकवाक्यत्वसंभवस्तथापि दर्शपूर्ण
मासयोरन्यभागविधिसमकालमप्रवृत्तेः पर्युदासस्य तदानीमसत्तया प्राकृतातिदेशेन नैकवाक्य
त्वसंभव इति तत्र विकल्पाश्रयणेनानिषेधत्वं प्रसक्तेषु तु पर्युदास एव। एवं विश्वजिति सर्वस्वं ददाती
तिशास्त्रादश्वादीनां दानप्रसक्तौ न केसरिणो ददातीति केसरिभिन्नं सर्वस्वमिति पर्युदासो वि
कल्पभयादिति भिन्नाः। राजकेतु नोभयतोदतः प्रतिगृह्णातीति संभवात्। ऊत्त पर्युदासे ति न ह

या६

ते

निषेधस्तादृशं पर्युदासादिप्राप्तस्य दानस्यापि च निषेधोपपत्तेर्विध्यधीनात्मलाभत्वाभावाद्विकल्पाभावेन
सामान्यविधेः संकोचोऽयं निषेध इत्युक्तं वार्त्तिककृद्भिः। एवमनारभ्याधीतेन यज्ञप्रवर्ग्यं दृष्ट्वा रतीत्यनेन प्र
वर्ग्यविधाय पुरस्तादुपसदां प्रवर्ग्येणाचरतीत्यनेनोपसत्सर्वकालसंबंधादुपसत्ता च ज्योतिष्टोमे विधानाद
नारभ्याधीतानां प्रकृतौ निवेश इति न्यायेन ज्योतिष्टोमाङ्गभूतं प्रवर्ग्यं संबध्यते। न प्रथमयज्ञे प्रवृंज्यादिति
कौषीतकिब्राह्मणे तु ज्योतिष्टोमप्रकरण एव प्रवर्ग्यविधायके श्रुते। अत्र च प्रथमयज्ञशब्देनाग्निष्टोम
संस्थज्योतिष्टोमस्य प्रथमः प्रयोगो लक्ष्यते। प्रथमशब्दस्यापवृत्तप्रवर्त्तनवाचित्वात्। यद्यप्येवं यायज्ञ प्रथमेयं
ज्योपस्थानानां ज्योतिष्टोमपत्ते वाहिताग्नयदृष्टप्रथमयज्ञत्वागन्न्यूपति संस्कृदशायां दीक्षितानां समीपस्थ्या
नीनां मुख्यः सत्राध्यासनताईसादोतत्सर्वक्रमेणात एवग्रहणं न प्रथमप्रयोगस्य तथापि प्रयोगगत
तत्प्राथम्यगुणयोगेन कर्मणि तत्र प्रवृत्तेरत्र मुख्यत्वसाध्यप्रयोगग्रहणं। तस्मात्प्रथमयज्ञमानोऽतिरा
त्रेण यजेतेति विहितस्यातिरात्रसंस्थज्योतिष्टोमप्रथमप्रयोगस्यापि प्रथमयज्ञशब्देन ग्रहणं। तद
त्रोत्पत्तिवाक्यात्सर्वप्रयोगसाधारण्येन प्राप्तः प्रवर्ग्यः प्रथमप्रयोगद्वये निषिध्यते। तेनोक्ते तिथा
वरादितीयादिप्रयोगविषयः ... निषिद्धस्याग्निष्टोमे प्रथमग्रहणं कीर्तितावाक्येनाग्निष्टोमप्रथमप्रयो
गे प्राप्तिप्रसक्त्यभिप्रायतो तस्य। नन्यापेक्षत्वात् तेन तत्र प्रवर्ग्यस्य विकल्पः। कामं तु योऽनूचानस्यात् तस्य

प्रवृत्त्यादित्यनेनचाविकल्पकारिणः प्रतिप्रसववाक्यस्याभ्योजिय कृत्स्नप्रयोगउपसंहारात्तत्रैवसः। अन्यक
त्वं च प्रथमप्रयोगे तु प्रतिषेधइतिवार्त्तिके अभिप्रायस्त्वनुपसंहारमंगीकृत्यास्माद्वचनाद्व्यवस्थितविकल्पः
अन्यत्रयानप्रयोगेनिसंकुरणमन्यकर्त्तृकेत्वकरणमित्याहुः। अतिरात्रप्रथमप्रयोगेतु प्रतिप्रसवाभावा
न्निषेधवचनेननियमकरणमेवतस्मान्नप्रथमप्रयोगेस्यनिषेधइत्यभिप्रायः। वार्त्तिकव्याख्यातारो राणकेतु
निषेधोविहितप्रतिषिद्धत्वादेवविकल्पसिद्धेः प्रतिप्रसववाक्यानर्थक्यप्रसंगादतिरात्रप्रयोगेपि
विकल्पापत्तेः पर्युदासत्वाय प्रथमप्रयोगवर्जंग्रहणमितीति। पर्युदासस्य चाग्निष्टोमप्रथमाहारेप्र
तिप्रसवादनुष्ठानमतिरात्रे अतिरात्रे प्रथमाहारेत्वपर्युदासादकरणमित्युक्तं। विस्तरस्त्वाकरेस्ते
यः। एवंविकल्पभयादुपपदानन्वयेन नञः पर्युदासत्वमुक्तं कार्यं च तत्र उपक्रमविरोधाज्ञातान्वयेनोच्यते तत
स्यव्रतमित्युपक्रम्यनारभ्येतमादित्यमीक्षेतेत्यादिभूताप्रतमनुच्छेपरस्तात्क्रियतेसोत्यतदित्युपक्रमाचास्या
नेवकर्त्तव्यत्वप्रतीतेर्नञोनिषेधपक्षे चानेकवचनोपप्रतीतेः उपक्रमविरोधापत्तेः पर्यालिन्वयेनानीक्षणपरो
पर्युदासः। अभावस्याप्यननुष्ठेयत्वात्तदव्यभिचारितसंकल्पोनत्रीक्षितभ्यांलक्ष्यते। सर्वत्रप्रवृ
त्तिनिवृत्त्योरव्यभिचरितो मानसः संकल्पः। तेनोद्यन्तमादित्यानीक्षणसंकल्पेनेष्टभावयेदितिवाक्यार्थः।
एतावताहेनसाऽयुक्तो भवतीतिवाक्यशेषात्पापक्षयः। एवमेकादश्यां न भुंजीतपक्षयोरुभयोरपि।

वनस्थवतिधर्मोपिंश्रूयमाणमेवसदाग्रहीतस्यांस्मृतौधर्मशब्देनानुष्ठेयवाचिनोपसंहारात्तद्विरोधाभावपर्युदा
साश्रयणेनाभोज्यान्नसंकल्पोविधीयतइतिहेमाद्रिः। एवंदीक्षितस्यान्नंनाश्नीयादितिनिषेधस्यसोमदीक्षि
तोग्नीषोमीयेदीक्षितस्यान्नमश्नीयादितिश्रूयमाणवचनश्रवणात्। क्रीतराजकोभोज्यान्नइत्यपर्वेदे
दानचैकस्याविधिद्वयापेक्षागौरवलक्षणाभावाद्विनविकल्पइत्यवधिद्वयान्यथानुपपत्त्यापदद्वयंदासत्ता
स्यत्रपीरुष्ट्वोयाधिः। अग्नीषोमीयावधिदीक्षितान्नाभोज्यान्नसंकल्पेनेष्टंभावयेदिति। द्वितीयस्तु
तत्प्रतिषेधस्यपुरावधिःसोमक्रयावधिदीक्षितान्नभोज्यमितियाज्ञिकाः। आपदनापद्विषयत्वेना
वधिद्वयपक्षव्यवस्थितिपक्षान्तरेनाद्रियन्ते। भाष्येतुक्रीतराजकस्यानस्यस्मार्तत्वाच्छ्रुतिविरोधेनाप्रामा
ण्यमुक्तं। दीक्षितोनददातीत्यादिनिषेधस्यदीक्षोपमोचनावधिरवभृथोवधिः। तेनदेवान्मानुषाद्वापराधा
दवभृथोत्कर्षेदीक्षानुवृत्तेर्दानादिनकार्यं। अग्निहोत्रहोमनिषेधस्यत्ववभृथानन्तरोदवसानीयेष्टि
रवधिः। पुनराधेयसंमितयेष्ट्वाग्निहोत्रंजुहोतीतिवचनात्। एवंदीक्षितानांशनादिनिषेधानां
दीक्षानिमित्तत्वाद्दीक्षावधिर्दीक्षणीयानन्तरंप्रवृत्तिः। आग्नावैष्णवमेकादशकपालंनिर्वपेद्दीक्षिष्य
माणइत्यत्रक्रियापायाःपायाःमुख्यपदैर्विहितायाःदीक्षायादीक्षणीयामारभ्यते। इदंच
दीक्षणीयास्थादीक्षितस्यदानाद्यभिधानंप्रथानिषिध्यतइति नदानोत्तरनिषेधप्रवृत्तिः। ए

वि

चमाहिताग्निः क्लिन्नं दावग्नौ वादध्यादिति निषेधस्याधानानन्तरं प्रवृत्तिः। एवमग्निदुष्टीति नधा
वैदिकस्यस्य सोमयागोत्तरप्रवृत्तिः। अग्निविन्नामयष्टयने नाग्निसंस्कृतया नूनं वपने नयागेतः
संस्कारो यावत्सोमप्रयोगस्तमाध्यज्ञे धारिणमेवेति तदुत्तरमग्निविस्यात्। एवं स्मार्त्तानां न
कलंजभक्षपरिहारादीनामुपनयनोत्तरप्रवृत्तिः। प्रागुपनयनात्कामचारवादभक्षाद्युक्तादि
स्मृतिः। महापातकादिनिषेधानां तु सर्वदेति संक्षेपः। विधिनिषेधैकवाक्यतया तदपेक्षित
स्तुतिनिरार्थत्वेनार्थवादानां धर्मे प्रामाण्यं। वायव्यं श्वेतमालभेत भूतिकाम इति विधिवा
युर्देवत्यं श्वेतपशुद्रव्यकयागभावनायां भूतिकर्मिकायां पुरुषप्रवर्त्तयन्द्रव्ययागा
स्तालोचनायां तु सर्वत्र प्रतिबंधकालस्य निवर्त्तिकां प्ररोचनां तदर्थां वस्तुस्तुतिमपेक्षते।
तत्सन्निधौ वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गम
यतीत्यर्थवादः श्रुतः। सच स्वार्थपरत्वे वैयर्थ्याल्लक्षणया क्षिप्रफलदातृत्वात् प्रशंसा इति स्तावकत्वे
अपेक्षितप्ररोचनाजननेन विध्येकवाक्यतया तद्बोधितधर्मे प्रामाण्यं भजते। बर्हिषि रजतं न देय
मिति निषेधोपजीरजतदानात्पुरषाजनितर्ष्पि लोकपापायातनिवर्त्तिप्रतिबंधकोत्साहनिवर्त्तक

क्षिप्रदेवतासाध्यो यागः

५६

56

वेषु तदर्थाववृत्तिं नित्यामवेक्षते। तत्र सन्निधौ यो वा बहिर्हिरण्मतदधात्पुरास्य संवत्सराद्गृहे शोदनं भवतीत्य
र्थवादः सोऽपि प्ररोदनहेतुत्वाद्रजतदानमप्रशस्तमिति निन्दन्निषेधापेक्षितत्वेऽप्यनन्तरं ननु तदकुर्वा
क्यतयापातस्तोऽविधिताध्यमेव प्रमाणम्भज्यते। न च वेदवर्ण्यमेवास्ताकिं लक्षणयास्तु इति निर्दार्थत्वेन
निवाच्यं। स्वाध्यायविध्यध्याहृतस्य वैयर्थ्यानुपपत्तेः। न चादृष्टार्थमेवाध्ययनं मा यध्यय
नवदिति वाच्यं। अध्ययनविधेर्दृष्टार्थत्वात्। तथाहि। स्वाध्यायोऽध्येतव्य इत्यध्ययनविधौ तव्यप्र
त्ययेनाध्ययनकर्तृणिकापांभावना। स्वाध्यायस्य कर्मत्वं गम्यते। तत्र योग्यतया प्राप्यत्वात्। तेनाध्ययने
न स्वाध्यायप्राप्नुयादित्यर्थः। अनर्थकस्य प्राप्यत्वायोगात्। वाक्यान्तरेणार्थवत्त्वाज्ञानादीदृशावचनं व्य
पतेऽध्यधीतेन स्वाध्यायेनानुष्ठानं शक्नुयादित्यादि। ततः शक्यार्थज्ञानेन च प्रवसंभवमर्थज्ञा
नार्थत्वं। तस्य लौकिककर्मविनियोगेनार्थवत्त्वात्। तदसंभवे जैमिनीयसूत्रमासीततन्नियतकालप
रणार्थत्वं। स्वर्गाद्याधीतसत्रादिवाक्यानामपायादपाधत्वमिति सेवक्ष्यते। नत्वदृष्टं। तेनाधीतेन
स्वाध्यायेन यागक्रियां समीहितं तदिष्टविधिसूत्रवत्संभवफलवदर्थज्ञानं कुर्यादिति वाक्यार्थः
तिवान्निवृत्थवादाधिकरणेन तृतीयेऽपि मीमांसा। रलेऽप्यधीतेन स्वाध्यायेन यागक्रियां समीहितं तदृ
वपेदित्युक्तं। मिश्रास्तत्रापरत्नमालायामाहुः। स्वाध्यायसंस्कारेणाध्ययनेन यागक्रियां तदेवाद्वे

५६

तत्कुर्यादितिवदृक्षु स्थलेष्वध्ययनकरणमेव वाक्यार्थः। भवदेवोऽप्येवं। युक्तं चैतत् स्वाध्यायस्य कर्मत्वा
नुपपत्तावपि पदशब्दरूपगताध्ययनकरणत्वाबाधाद् अध्ययनेन गुरुमुखोच्चारणानूच्चारणरूपे
णापेक्षितं द्रव्यं कुर्यादित्युक्ते लोके शब्दोच्चारणगोचरप्रयत्नो व्यवहारे पर्यायकार्थज्ञानस्यैवोद्देश्य
त्वेन कल्पितत्वात् तस्मिन्नाप्येवं कल्प्यते सामर्थ्यात् स्वाध्यायावाप्त्याद्वारे कल्पिते स्वाध्यायस्य फलसाधनत्वे विना
तदवान्तरव्यापारत्वानुपपत्तेस्तस्यापि तत्साधनसमर्थात् सिध्यति। एवं वार्थिकवाक्यार्थे विज्ञानं प्रत्युपादे
यतया स्वाध्यायैकत्वविवक्षा शाखान्तराधिकरणोक्ता संगच्छते। ऋमा[illegible]ध्ययनस्य तु जपाद्युपयोगित्वपक्षे
शाखान्तरे कुत्राप्यर्थे न चैवमर्थज्ञानोपयोग्यतया सर्वभाव्यत्वमस्त्विति वाच्यं। यावत्संभवं पुरुषार्थप्र
त्यासत्तेरेष्टव्यत्वात्। अर्थज्ञानस्य क्रत्वर्थोपयोगित्वेऽप्यव्यभिचरितक्रतुसंबन्धाभावेन क्रत्वपूर्वोपयुक्त
रत्वासंभवात्। तेनाध्ययनेन यावत्संभवमर्थज्ञानं कुर्यादिति वाक्यार्थे कं पद्यमित्याकाङ्क्षायां श्रवणं च गुरुस्थ
शूद्रादिनोपक्षेप्येति संबध्यते। तेषां यथासंभवमधिगमसमाप्त्यपर्यन्ते नाध्ययनस्य स्वरूपोपकारित्वं नियमा
द्वादृष्टमिति निश्चितमिति निश्चयाः। जपपारायणाद्युपयोगपक्षे स्वरूपवेदैः सिध्यदर्थत्वं तत्क्षपादौ नाभिवदूपलब्धि
ध्यर्थत्वमितिराणकेऽप्येवं दृष्टार्थोऽध्ययनविधिः। स चापाठविधीनां पुरुषप्रवर्तनार्थत्वं निषेधानां निवर्तनार्थ
मपलंब्यगमयति। अधीतादिविधयः पुरुषं प्रवर्तयन्त्यपि पुनर्निषेधाश्च निवर्तयन्त्यपि पुरि[illegible]ति। केनेत्याकाङ्क्षायामध्ययनेना नं॰१

57

तानेनानिवर्त्तनात्तानेनचेति संबध्यते। प्रवर्त्तनाच शाब्दीभावनाप्रागुक्ता निवर्त्तनाच। कथमित्याकांक्षा
यां प्ररोचनाद्वेषाभ्यामुपदर्शितेति संबध्यते। फलप्रतिबंधकालस्योत्साहनिवृत्तिश्चोपकारः। इत्थं मंत्रा
त्रयान्वितां प्रवर्त्तनां विधिकार्यत्वेनार्थादध्यवसीयविधिबोधि प्रति निषेधकार्यत्वेन चानिवर्त्तनां। प्र
रोचनाद्वेषजननरूपोऽस्य स्तुतिनिंदयोः साधनमपेक्षमाणोऽर्थवादाभावे विधिनिषेधावेव तत्सा
धनत्वेन कल्पयति। यथोक्तं। विध्युद्देशस्यैव हि शास्त्री कल्प्यधिया मइति। यथा वसंताय कपिंजला
पि॰ नालभेतेत्यादिविधिष्वर्थवादाभावाद्विधिस्तुतिशक्तोः कल्पने। अर्थवादसद्भावे तु तद्वैयर्थ्यपरिहारा
य सन्निहितविधिनिषेधैकवाक्यतानुसारेण स्तुतिनिंदार्थत्वं लक्षणया कल्पयति। ननु इदमप्यनम न॰
दृष्टार्थबोधयति। लक्षणया दृष्टार्थत्वेनादृष्टकल्पनातो लाघवात्। सर्वापि वादपदेष्वेवं केवल
क्षणा। नच प्रतिपदं शक्यत्वान्नयैवं लक्षणेति कुठधर्मः। वाक्यार्थलक्षणं वदेकस्या एव लक्षणायाः क णा ५ पा॰ ५
ल्पनात्। तत्र तावल्लोकप्रसिद्धार्थानुवादिनोऽर्थवादाः यथा वायुर्वै क्षेपिष्ठा देवतेत्यादयस्ते स्वार्थसंबंधेन स्तु
तिं लक्षयंति। येतु मानांतरविरुद्धार्थाः यथा यजमानः प्रस्तरोऽग्निर्हिमस्य ... आदित्यो यूपो गोपप्या स्वा एम॰
र्थसंबंधप्राप्यस्तुतिं लक्षयंति। गौणी नाम स्वार्थनिष्ठगुणसद्भावागुणयोगादर्थातिरेके वृत्तिः। गुण ५॰
भूतसिद्धिर्जातिसारूप्यप्रशंसाभूमलिंगसमवायभेदात्षड्विधः। तत्र यजमानः प्रस्तर इत्यत्र त

ऋत्विग्व्यापृतकार्यकारित्वेन यजमानशब्दः प्रस्तरे दर्शपूर्णमासयोर्गौणः। यजमानकार्यं यजमाननिष्ठं प्रस्त-
रः करोतीति यजमानत्वेन स्तूयते। अग्निर्ब्राह्मण इत्यत्र जात्या ब्रह्ममुखोत्पादनकर्तृत्वेनाग्निश-
ब्दो ब्राह्मणे गौणः। ब्राह्मणोस्य मुखमासीन्मुखादिन्द्रश्चाग्निश्चेति श्रुतेः ब्रह्ममुखोत्पादनक-
र्तृत्वसादृश्यादग्नित्वेन ब्राह्मणः स्तूयते। आदित्यो यूप इत्यत्र यस्त्वग्यां घृतेन तेजस्वित्वादि साद्-
श्येनादित्यशब्दो यूपे गौणः। तक्षणाञ्जनेन हृतं यूपस्य तेजस्वित्वं। अपशवो वा अन्ये गोअश्वेभ्यः
पशवो गोअश्वा इत्यत्र चापशुशब्दः पशुभिन्नमनुष्यादिवाच्यजादिषु गौणः। गवाश्वगतप्रशंसाभा-
वो अजादिषु मनुष्यादिषु चास्तीति सादृश्यघटकाभावप्रतियोगित्वेन प्रशंसाभावनिमित्तं निरूप्यते।
अपशव इत्यत्र पशुशब्देन गवाश्वगतप्राशस्त्यं लक्ष्यते। नञा तदभावो अजादिषु बोध्यते। गवाश्वगत-
प्राशस्त्याभाववत्वादपशव इत्येवं गवाश्वस्तुतिः। यजनप्रकरणे सृष्टीरुपदधातीति श्रुतं तत्र सृष्टि-
लिङ्गकमन्त्रप्रकाश्याः इष्टका उपदधातीत्यर्थः। तत्र सृष्टिलिङ्गकानामपि केषाञ्चित्सत्त्वात् सृष्टिलि-
ङ्गकानां बहुत्वात् सृष्टिलिङ्गकमन्त्रसमूहे सृष्टिशब्दः प्रयुज्यते। छन्द इव छन्दःसमूहे छन्द-
वदुत्से छन्दोयोगवदितीति प्रयोगवत्। एवं प्राणभृत उपदधातीत्यत्रान्येषां बहुत्वात्प्राणभृतां मन्त्रलि-
ङ्गसमूहे लिङ्गसमवायेन प्राणभृच्छब्दः। प्राणभृद्‌प्राणभृत्समूहे हि प्राणभृत्त्वं च समवेतं। एवं

पुरोडाशानलंकुर्विति प्रैषमंत्रे धानाकरंभपरिवाप पुरोडाशा दधिपयस्यारूपपंचहविष्कपुरोडाशश
ब्दोलिंगसमवायेन पुरोडाशाः पुरोडाशाः समूहो हि पुरोडाशस्तं विङ्कुसमवैति। अतः समूहबहुवच
नांत पुरोडाशशब्देनोद्दिष्टपालंकरणमभ्याभिघारणारूपं प्रैष्यते। एवं पङ्किधगुणयोगादर्थांत
रेष्वपि तद्गौणी। अन्येषामपि रूपआपद्भूरभूपस्त्वादीनां गुणानामेषु तत्सिध्यादिषु यथासंभवमंत
र्भावोऽद्रष्टव्यः। यथा स्तेनमनोऽनृतवादिनी वागित्यर्थवादप्रच्छन्नगामित्वेन स्तेनसारूप्यात्स्तेन
शब्दो मनसि प्रयुज्यते। वा वक्ष्ये आपशोऽनृतवादिनीत्वात्तथा प्रयुज्यते। अयं पंचहविरण्यहस्तो भवति
यस्य धिघेरपथाद्यः। वाग्नेः कृतदोषनिवृत्तये हिरण्यधारणं पुरस्तात्प्रस्तुतमिति। धूम एवाग्ने
र्दिवा ददृशे नार्चिः अर्चिरेवाग्नेः रात्रौ ददृशे न धूम इत्यत्र दूरतोऽभूपस्त्वेनादिवा धूमस्य रात्रौ वा
ग्नेर्दर्शनादवधारणानिर्देशः। तस्माद्दिवाग्निरादित्यमनुप्रविशति रात्रावादित्यः स्तोम इत्यर्थवा
दस्योपपत्त्यर्थः। अथ पंचाग्निर्ज्योतिरिति सायं जुहोति सूर्यो ज्योतिरिति प्रातरिति मंत्रविध्योरर्थवा
दः। दिवाधूमस्यवाकुल्येन दर्शनादग्नेरादित्यानुप्रवेशात् सूर्यस्यैव ज्योतिष्ट्वमिति तन्मंत्रेणा
नर्हमिकापदः। एवमितरत्रापीति। नचैतद्दियो ब्राह्मणा स्मो वयमब्राह्मणा वेत्यत्र ब्राह्मणत्वस्य स्व
परापेन दुर्ज्ञेयत्वादेवानिर्देशः। नचायं ब्राह्मणलानसंशयविपर्ययाः शक्यते वक्तुं ब्राह्मणत्वस्या

श

स्वादकजातिस्नानसहकृतवस्तुगम्यत्वेन तदसंभवादिति मध्ये द्वितीये। अथ प्रवरे प्रव्रीयमाणे
देवाः पितर इति ब्रूयादिति प्रवरानुमंत्रणविधेरर्थवादः। नानुग्राह्यत्वप्रवर्षिसंबंधी तेनात्त
मभवोपाभिति ब्रह्मनाद्ब्राह्मणोऽपि प्रवरानुमंत्रणेन ब्राह्मणः स्तोभवतीति स्तुतिः। एवं चेदर्थ
वादेषु मानान्तरविरुद्धार्थेषु गौण्या स्वार्थस्य सत्त्वेन स्तावकत्वे सर्वं चोद्यं। एवं निषेधार्थवादेष्वपि ता

तपथा५ स

दृशेषु गौण्या स्वार्थसत्त्वेनानन्दनत्वापीव हि स्थिरजतं दद्यादिति प्रयोगार्थवादोपपादके सोऽरोदीद्यद
रोदीत्तद्रुद्रस्य रुद्रत्वं यदश्रु व्यशीर्यत तद्रजतमभवदित्यर्थवादे। अत्र हि देवासुराः संयत्ता आसन्निति
प्रथमार्थवादपर्यालोचनया नाग्नेरोदनकृतत्वाविरुद्धशब्दप्रयोगो रोदनकृतत्वं सोपचारेणाश्रु
णश्च शोकजाद्रजतत्वोपचारेण रजतदाने च कुटुंबपीडायां रोदनभवनोपचारेण बर्हिरजतदाने
निंदा क्षिप्ता। एषु चार्थवादेषु स्तुतिनिंदासंदेहे तु विधिनिषेधैकवाक्यतया तन्निर्णयः कार्यः। प्रयाज
द्यासुवतेतद्सुराद्भवत्वापन्यस्तस्माद्यास्तवते तदसुरानां वापन्यदेवं विद्वान्सास्मानास्तवीतेति श्रु ये
पता तत्र प्रगीतं प्रचास्तोतव्यं सामशब्दवाच्यपावाप्रगीतपचेति स्वदेहेतमस्मामविष्येकयावर
तपानिर्णयो भवति। प्रगीतप्रचास्तोतव्यं तस्याः स्तुतिर प्रगीतपानिदेति। अन्यपापुनरप्रगी
तापाः स्तुतिः प्रगीतायानिंदेसपिदसंभाव्येत। अतिकूरानसुरानप्येषान पतिकिमुतदेवानितिस्तुतेः।

59

शीघ्रागमनशीलानसुरानीप्सनानयतीति किंदेवानानेष्यतीति तन्निंदेत्स्यपि स्यात्। यथोक्तं। नवयन्नि
हितानभिहितान्वासुरान्निप्स इति। एवं जातिर्लिंग यथा ग्व्यानुद्रूपाऊवीधुक यथा ग्वान्नुद्रूपानार
ण्यान्यश्रून्हि नस्तिनं स्ताम्यानपोरवल्वाऊरनाऊतिवैजाति तोश्चू गवी धुकाञ्च तस्मा दल्लशी
रेण जुहोतीति श्रूयते। अथ यथो होमा विध्येक वाक्यत याज्ञत्तिं यथा ग्वादेर्निंदे वैतिनिर्ण
यः। एवमभिघारयस्त्विव कानाभिघारयेदिति मीमांसंते यदभिघारयेत्तद्रुद्रायास्येपशूनिद
ध्यायन्नाभिघारयेन्न तद्रुद्रायास्येपशूनिदध्याद यो रवल्वाऊराभिघार्य एवं सपिघारण
विध्येक वाक्यतयास्पर्बक पुरोडाशदेवताभेतरुद्रास्य निधानापादकतयाभिघारणस्तु
तिरेवेति निश्चीयते। एवं होतव्यमग्निहोत्रं न होतव्यमिति मीमांसंते ब्रह्मवादिनः। यदि न जुहुयाद
दूपादयथापूर्वमाहुती जुहूयाद्यन्तजुहूयादग्निः पराभवेत्तस्मीमेव होतव्यमग्निहोत्रमि
स्यत्रापि एवं मुदितेजुहोतीति विध्येकवाक्यतया प्रातः प्रातरनृतं ते वदन्ति पुरोदयाज्जुहूति येऽग्नि
होत्रमिसस्यानुदिते होमनिंदार्थवादस्योदितहोमस्तावकत्वानिश्चयः। यथाऽऽह। नहि निंदानिं
द्यं निंदितुं प्रवर्तते अपि तु विधेयं स्तोतुमिति। एवं फलमुद्दिश्य पाद्यदेवतादिविधिस्तुपा
णामपि विध्येकवाक्यतया स्तावकत्व निश्चयः। यथा औदुंबरो यूपो भवतीति विध्येकवाक्य

तपोरवाप्तुदुंबरऊर्ध्वपशवऊर्जैवास्माऊर्जंपशूनाप्नोत्यूर्जोवरुंध्याइत्यस्योरूपर्यावान्न
प्राप्तिफलेपरत्वप्रतीयमानस्यापिस्तावकत्वमेव। क्रत्वर्थयूपोद्देशेनविधीयमानोदुंब
रतायाःफलाकांक्षाभावात्।कामशब्दाभावेनास्यापिफलपरत्वाप्रतीतेश्च।एवंयस्यपर्णमयी
जुहूर्भवतिनसपापंश्लोकंशृणोतीत्यादीनामपपापश्लोकश्रवणादिफलबोधकानामर्थवा
दत्वं।क्रत्वर्थजुहूद्देशेनपर्णमयीत्वादिविधीनांफलाकांक्षाभावात्।तथाचस्नानादिसं
स्कारकर्मसुपरार्थत्वात्फलश्रुतिरर्थवादःस्यादितिषष्ठेद्रव्यफलश्रुतिःप्रागुक्ता।तीर्थ
स्नातितीर्थमेवसमानानांभवतीत्यादिकासंस्कारेतीर्थस्नानादौ।वर्मवादेतत्फलस्याश्रूयतेयस्य
पादानुध्यायंतेनर्मपिबमानस्यभ्रातृव्यस्याभिभवत्याइत्यादिकाकर्मण्यपारादुपकारक
त्वप्रवादेऽथयत्रापिप्रकरणात्क्रत्वर्थत्वावगमस्तत्रार्थवादत्वं।यत्रतुनक्रत्वर्थत्वावगमस्तत्रा
र्थवादिकंफलंगृह्यतेरात्रिसत्रादावितिप्रागुक्तं।एवंशरूपेणजुहोतीतिनित्यैकवाक्यतापन्न
स्यतेनह्यन्नक्रियतइत्यन्वकरणाकरणेहेतुत्वपाहिशब्दयोगात्प्रतीयमानस्याप्यविधेयत्वनदे
श्यत्वादपेक्षितत्वस्यचैवार्थवादत्वेहेतोर्निष्फलत्वाज्ञानचयदन्वकरणतन्नद्धोमसाधन
भीतिव्याप्तिकल्पनवादत्वविरिज्याहितःफलं।ग सस्यशिष्टरूपविरोधेकाल्पनिकद्रव्यादिप्राप्तस्य

१९

अ

६ वो नात्ताय यहेतुविधेफलवत्त्वात्तत्र स एवाश्रीयते। यथा तथ्यायां चतुर्गृहीतान्याज्यानि भवंतीति न मा०
यत्रानुयाजान्यष्यन् भवतीत्यत्रानुयाजाभावरूपहेतुनिर्देशादनुयाजाभावेपि भवतश्चतु
र्गृहीताभावो विधेयमेवावसीयते। अन्यथात्र सातन चतुर्गृहीतत्वं दृष्टप्रासंगो कुपिलजाय
८ कारणान्याभावेन चतुर्गृहीतत्वानवसीयते विधेः किं चतुर्गृहीतानि बलीमिति न ज्ञायेत। एवं वाद
राइपत्नीसंयाज्यांतान्यहानि संतिष्ठंते न गार्हपत्ये इत्यसंदिग्धतोहि तादृशप्रसङ्गस्य सं
60 स्थारूपहेतुनिर्देशात् याग्यत्नमादृक् पत्नीसंयाजान्तता विधीयते। तन्नैव हेतुसद्भावात्। एवं
प्राविधौ सामान्यनिर्देशात्सर्वत्र साम्यात्। एवमनूद्यते देवलक्षणमेव तत्कुरुत इति विध्येकवा
क्यभूतानां निवीतं मनुष्याणां प्राचीनावीतं पितॄणामुपवीतं देवानामिति वाक्यानां निवी
तादिपदाभिधेयपरिकरबंधादिरूपा विधित्वेन प्रतीयमानानामुपवीतार्थवादत्वं स्यात
पा४ न्यायविधिश्रवणात्। शास्त्रांतरेण मनुष्यादिप्रधानकर्मणां निवीतादि ज्ञाप्यते। अत्र तु नशा
स्त्रांतरेण प्राप्तिरत्र स्यात् त्रयाणां विधिफलत्वनायथापरिहृदवोप्यधारयतीत्यस्मिन् लध
नौ लोमधं धारयन्नुइ व्रदितिमतां न होतृगतो विधिविशेषश्च नं लोमदानिहोतृगतं स्यद
६ उपरि समिद्धारणं शास्त्रांतराप्राप्तेर्विधीयते तथा च सत्यां वापि समिद्धारणपूर्वयाति

एवं नयनं दक्षिणदीक्षितः पूर्वमंत्रे सर्वा हि मनुष्याः पूर्वमंजत इत्यस्मिन्दीक्षितसंबंधिदक्षिणनयनपूर्वा
ञ्जनविधिशेषे मनुष्यसंबंधिसव्यनयनपूर्वांजनं श्रुतिमशासत्याहि धीपते इत्यादिवदपि सरूपाणां त्रीणि
लयवाग्वादिश्रवणानामर्थवादत्वं प्रागुक्तं। चयने चरुमुपदधातीति विधिशेषस्य बृहस्पते वा एतद
न्नं यन्नीवारा इत्यस्य देवताविधिस्वरूपस्यार्थवादत्वं चरुप्रधानविधौ देवतानाकांक्षत्वादस्य च तद्वि
तचतुर्थ्यभावेन देवताविधित्वासंभवात्। एवमन्यत्राप्यर्थवादत्वमूह्यं। नैवार्थवादा हि विधाः परकृतिपु
राकल्पभेदात्। एककर्तृकचरित्रान्वाख्यानं परकृतिः। यथा तेन ह स्माह वर्हिषं बर्हिर्माषान्मे पचतेति न वा ए
तेषां हविर्देवा गच्छन्तीति तस्मादारण्यमेवाश्नीयादित्यस्यार्थवादो बर्हिर्गोत्रोत्पन्नबंधुसत्ककर्तृका
रव्याभा न्वाख्यानमिति। उन्मुके ह स्म पूर्वे समाजग्मुस्तानसुरा रक्षांसि निजघ्नुरिति गार्हपत्ये वाग्निषु निमंथ्यमि
वपेरग्निमस्यविधेः शेषानेककर्तृकचरित्रान्वाख्यानात्पुराकल्पः। यस्मात्पूर्वे सत्रिणः सत्रार्थप्रस
क्षानग्नीन्नपंतोऽसुरादिभिर्हतास्तस्मात्समारोप्याग्नीन् तत्र नीत्वा निर्मंथ्य गार्हपत्येऽग्निषु प्रक्षिपेदग्नि
ति विध्येकवाक्यता। तस्मात्सर्वार्थवादानां विधिनिषेधापेक्षितस्तुतिनिंदार्थत्वेन प्रामाण्यं। केषांचि
त्संदिग्धार्थविधिनिर्णायकत्वेन। यथा चयने क्ताः शर्करा उपदधातीति विधौ केनाक्ता इति संदेहे

तेऽन्नो वेद्यन्तामिति वाक्यशेषात्स्रुक्तते नैवेति निर्णयो भवति ॥ एवं वाल्लमस्थ्येषु यव मयानि करंभ
पात्राणि भवंतीति विध्यो लोके यवशब्दस्य दीर्घशूकेषु प्रयोगात्संदेहे यदान्या
ओषधयो म्लायंतेऽथैते मोदमाना इवोत्तिष्ठन्तीति वाक्यशेषाद्दीर्घशूका एव यवा इति निर्ण
यो भवतीत्यलमप्रपंचेन ॥ मंत्राणां प्रयोगसमवेतार्थस्मारकत्वेनार्थवत्त्वं पदार्थावबोधयाव
धर्मे प्रामाण्यं। स्मृताः पदार्थाः स्युः स्मरणं वा वाक्यार्थप्रमाकरणमिति तु न। पदार्थास्तावत्स्मृति
वा स्युरादितात्तेन देवस्य त्वेति निर्वपतीत्यादि मंत्रविनियोजकवाक्येषु मंत्रोपादीतिकरणात्तत्प
दार्थत्वाद्भवति वा वाक्यार्थप्रमाकरणमिति प्रमाणं भवति च प्रयोगसमवेतानि चापि स्मारणेना
र्थवान्तरानेव दधि व्रीह्यादयः पदार्थास्तांन प्रामाण्यापादिताः तेषामवबोधकत्वेन लिंगोपरूपप्रामा
ण्यासंभवात् मंत्राणां तु वाक्यत्वेन बोधकत्वात्तदुपपद्यते। तथाके नु वाक्यविधये नप्रामाण्यमु
क्तं। न पूर्वसाधनत्वेन मादोस्त्वपूर्वस्य रूपविधिमि युंजानमंत्रः प्रामाण्यमश्नुतां यथा कोऽयं पूर्वसा
धनत्वानुपपत्त्योपहिते×नादोऽस्मीहितोऽप्यालंबनोऽगतत्वबोधेन मंत्रः प्रामाण्यमश्नुतेऽदृष्टं। न चार्थ
स्मरणस्य व्याख्यानादुपायांतरेणापि संभवान्न मंत्रप्रयोजनतायुक्तेति वाच्यं दृष्टोपायप्रनियमवि
धानान्मंत्रैरेव स्मर्तव्यमिति नियमाश्रोनादृष्टकल्पनात्प्रयाह लौकिकवाक्यासंभवितोऽर्थ

61

६२

र्थेनादृष्टाय। विधीनामेवाध्ययनविधिना नियमात्। यथार्थवादैरेव स्तुतो धर्मः फलाय। तथा मंत्रै
रेव स्मृतो धर्मः फलायेति कल्प्यते। न च नियमांशे दृष्टकल्पनावसरः। प्रभाविनी चेन्मंत्रोच्चारणादे
वसास्त्विति वाच्यं। अध्ययनविधेर्यावत्संभवं दृष्टफलकत्वात्। अतश्च ये करणमंत्राः करिष्यमाण
क्रियातत्संबंधिप्रकाशकाः देवस्य त्वेत्यादयः क्रियमाणानुवादिनो वा क्रियमाणक्रियातत्संबंधिप्र
काशकाः अग्निर्मूर्द्धेत्यादयस्ते दृष्टार्था एव। ये त्वनुपादेयमंत्राः प्रयोगोपयिकार्थप्रकाशकास्तदुच्चा
रणमदृष्टार्थमेव। दृष्टार्थत्वेपि प्रयोगानौपयिकार्थाभिदेवस्य त्वादिपदानि तान्यपि कथंचिद्वि
वपादिविशेषणीभूतस्यार्थप्रतिपादनेन दृष्टार्थान्येव। साममंत्रेष्वपि यानि ॐ फडादिपदानि
तानि गानापेक्षितानि — प कालपूरणार्थतया दृष्टार्थान्येव। नियमांशेन त्वदृष्टं सर्वत्र कल्प्यते।
न च मंत्राणां दृष्टार्थत्वे लिंगादेव स्वार्थविनियोगसिद्धेस्तद्विनियोजकशास्त्रवैयर्थ्यं तत्रशा
स्त्रस्य गुणार्थवादपरिसंख्यार्थत्वात्। तथा हि। अग्निरसीत्यादयश्चत्वारो मंत्राः लिंगादेवाग्न्या
धानेपात्तास्तद्विनियोजकं शास्त्रं तावल्लभ्यते यद्यत्र इति तेषां तु मंत्राणां समुच्चयरूपगुणवि
धानेनार्थवत्। अन्यथा दृष्टार्थत्वाच्च लिंगानां विकल्पः स्यात्। उरुवस्योरलेयत्तपतिः अथातामि
तिमंत्रः प्रथने लिंगादेव प्राप्तस्तद्विनियोजकं शास्त्रमुरु प्रथ स्वेति पुरोडाशं प्रथयतीति तावत्

पतिमेव प्रजया पशुभिश्च प्रथयतीत्यर्थवादोपपत्त्यर्थं। यज्ञपतिपदयुक्तेन मंत्रेण पुरोडाशप्र
थने कृते यज्ञपतेरेव प्रथनं कृतं भवतीति तदुपपत्तिः। कथं पुरोडाशप्रथनाभिधायिनो
मंत्रस्य यज्ञपतिप्रथनेन स्तुतिर्निरालंबना स्यात्। इत्यश्वाभिधानीमादत्त इत्यस्य परिसं
ख्यार्थत्वं प्रत्युक्तं। एतत्प्रयोजनाभावेऽपि नित्यानुवादत्वं। यथाध्रिगुप्रैषेन्वेनं माता मन्यतामि
त्यादिमंत्रगत मात्रादिशब्दानां पशुगणपरार्थत्वेनेऽनिगदगत यज्ञपतिपदवदूहाप्रसक्ते
न माता वर्द्धते न पितेत्यादिशास्त्रमूहनिषेधकं नित्यानुवादः। तस्य गुणार्थत्वासंभवात्। नन्वो
षधी राज्ञामादये त्यादिप्रैषमंत्राणां दृष्टार्थत्वे वैयर्थ्यं परस्परविरुद्धत्वेन तद्बोधनवैयर्थ्यादि
ति वाच्यं। तेषां प्राप्तकालताबोधकत्वात्परस्परबोधनार्थत्वेऽपि यानियमादृष्टकल्पनादिति सं
क्षेपः। ननु किं मंत्रत्वं प्रयोगोपयिक्तार्थस्मारकत्वं येन ते मंत्रकेषु पदार्थेषु ब्राह्मणवाक्यानामप्य
स्ति। अथ स्वतंत्रत्वात् तत्वादिकं न सर्वमंत्रानुयायि ब्राह्मणव्यावर्तकं वा किंचिदस्ति। ऊहप्रवरनामधे
यग्रहणेषु चान्यथाभावात्। कल्पवेदावयवत्वं मंत्राणां। नहि विध्यर्थवादयोः क्वचिदन्यथाभावो
दृष्टः। उच्यते। अध्यापकादिगतमंत्रत्वप्रसिद्धिविषयत्वमेव मंत्रत्वं। न च तदूहादावप्यस्तीति
तेषाममंत्रत्वे पठितानाममविहितमंत्रत्वात् यथा च सम्मनानामातेषु मंत्रत्वमाम्नातेषु हि विभागः

६२

स्यादिति। इह च विध्यर्थवादयोरप्यन्यथाभावः स्वर्गकामादिपदप्रक्षेपे [मि]ति न तावता वेदावपवच
धर्मिताः। ननु तथापि कथं विधित्वमेतत्। विधित्वमेवास्तु इत्याश्रयपाणि पञ्जते ददातीत्येवमादिषु वि
धिदर्शनादन्यत्रापि तदुन्नेयनात्ययार्थवादत्वं वास्तु इति स्यात्... तादिपदानां स्वावकल्पदर्शनादु
पत्तौ पदशब्देन पूर्वप्राप्तानुवादिनां सता प्राप्तप्रापकविधिशक्तिप्रतिबंधान्नदेवाश्रयत्वं यागादि
विधानात्। किंतु विधिप्राप्ततत्स्मृतिरेवकार्यं एवं दामिनगणं जोमीत्या दावु तोमपुर... प्रादिप्रयोगाद्विधि
शक्तिप्रतिबंधः। न हि विधिरस्मदर्थमात्रविषयः। तस्य साधारण्यात्। उक्तो वा सिध्यत्वघोतनादि का
भिमुख्यासंभवाद्विधेः। आत्मनि प्रेरणायोगान्निमित्तस्याभिधानतः। विधिशक्तिविहत्त्वस्या च
दाविवत्विष्टं यं। यद्या लेपेऽपि तदुङ्गात्किंचित्स्यादविहत्त्वेतीतिकर्तव्यताधिविशेषणत्वात् यत्प्रस्तावकत्वा
न्नार्थवादत्वं। स्वतन्त्रस्तोत्रार्थवादत्वं न च सर्वमन्त्रेषु स्तुतिरपि प्रतीयते। तस्माद्विधान्तरमन्त्रत्वं।
तदृचः त्रैगर्ग्यजुः सामरूपाः प्रागुक्ताः एवं निगदश्चोक्तः पठ्यमानो यजुर्भाग एव नितरां गद्यत इति तु
त्पत्त्योच्यते। ननु विधानतरो ऽह्यो निगदेत्नीति वा कथं लक्षणा भूपयोः ... शं सार्थानित्यानुवादः। परसंबो
धनकार्यवशाद्देवो ... प्रातः। अत एव सामान्यविहितो पांशुत्वबाधः। यदा रूपार्थिषु मन्त्रेषु
कर्त्तव्यदीक्षावाक्यशेषानुषंग ... तत्वं। यथा। यातेऽग्ने पाशा

से ३

हिरण्यपरु.पा

वेदस्यानंतरंतनूर्वर्षिष्ठेत्यादिशेषः पठितोनंतर पठि तयोरपियाते अग्नेरुग्राशयायातेऽग्ने
हरोशयेत्यनयोरप्यनुषज्यते। आकांक्षायोग्यतासन्निधानास्त्वानोथालावाकांक्षाभावेपियो
ग्याकांक्षयाध्वचिदनुषंगः। यथाविसृतिस्त्वापुनातुवाक्यतिस्त्वापुनातुदेवस्त्वासविता
पुनात्विति मंत्राणांशेषोच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिरित्ययं सकृत्पठितोपित्रिष्वनु
षज्यते। एवमन्यत्रापाकरणाद्याकांक्षाकोह्ययं। एवमग्नियाचत्रिष्टुबेकाश्येकेवोतितच्छेषस्त्रिभिरस
बध्यते। प्रधानंनीपमानंहितत्रांगान्यपकर्षंतीतिन्यायात्। असंबद्ध एवव्यवायेचनानुषंगो
भवति। यथासंतेवायुर्वातेनगच्छतांसंयजत्रैरंगानिसंयज्ञपतिराशिषेत्यत्रातेगच्छतामित्य
स्यानानुषंगः। मध्येगच्छतामितिबहुवचनाध्याहारेणव्यवायात्। आसन्निरपियन्वयहेतुःसा
कांक्षायेनास्तीत्यध्याहारेणैवात्रमंत्रपूरणं। अध्याहृतस्यवापावद्यमेवलं। तेनतद्देषेनमंत्रलो
पश्चापप्रश्नितंकार्यं। किंत्वगर्भेषप्राप्तश्रितं। एवमिषेत्वेत्यादिष्वपिविनियोगानुसारेणच्छिन्नप्र
पादिदश्याध्याहार्यः। एवमिति अर्जानामधेयानांविधेयार्थपरिच्छेदकत्वेनधर्मेप्रामाण्यं। परि
च्छेदश्चेतरव्यावृत्तिबोधोव्यवहारसौकर्याय। एवंनाम्नेवभेदस्तत्राप्युपपद्येतस्याऽपीरितिसाहोप
गमान्तरेणभेदस्तत्रापीतीपापघ्यासंगतिप्रामादिष्वप्रसंगरायपेवेदसमुक्तमेवपरत्रैभयसभ

६३

पत्रस्याद्ये

६३

भ

अधिकोर्थो नास्ति॰ मंत्रादि॰ विशिष्टं भवति॰

न
क

पात्। ननु कथं नाम्नः परमात्रस्य प्रामाण्यं। पदमध्याधिको भावात् स्मार्तकाल्न विशिष्यते इति न्यायात्। अ
पतौ लौकिकं पदं गृहीतसंगतिकत्वात् स्मारकमिदं तल्लौकिकत्वादनुभावकमित्युच्यते तथापि सति स्वार्थे
प्रामाण्यं भवतु नाम ननु श्रेयः साधनतारूपे वाक्यार्थे धर्मे तस्य स्वातन्त्र्येण नास्य धर्मे प्रामाण्यं किं
तु विध्येकवाक्यतया। प्रकारभेदे पुनरर्थत्वमेष कीर्तिनां नामधेयानां विधेयार्थपरिच्छेदकत्वरूपं च। तत्र किंचि
न्मत्वर्थलक्षणाभयात् नाम किंचिद्वाक्यभेदभयात् किंचित्तत्प्रख्यन्यायेन किंचित्तद्व्यपदेशेनात
त्र यागमुद्दिश्य लेतपशुकाम इत्यत्रोद्भिच्छब्दो योगिको गुणविधौ मत्वर्थलक्षणाभयाद्यागनामधे
यं भवति। उद्भिद्वस्य निर्दिष्टविदारणार्थत्वादूर्ध्वविदारणसाधनत्वं खनित्रादि उद्भिच्छब्दाभिधेयं यदि
यागसाधनत्वेन विधीयेत तर्हि ततो यागस्याप्राप्तत्वेन फलं करणतया विधाना तत्करणतया गु
णस्य विधानाद्वाक्यभेदापत्तिः। यागेन फलं कुर्यादुद्भिदा च यागं कुर्यादिति। न चैवं यागकरण
तया गुणविधानं किन्तु फलभावनाकरणतयैतिवाच्यं। तस्याः समानपदोपात्तया यागावरोधेन क
रणान्तरानन्वयापातात्। करणयोः परस्परानन्वयेन वाक्यभेदापत्तेश्च। ननु यागस्य न भावनायां क
रणत्वेनान्वयः किन्तु यागसंबद्धायां भावनायां उद्भिदस्य वगतायां गुणफलयोः करणत्वेन क
र्मत्वेन चान्वयेसति यागस्य फलं प्रति करणत्वेन गुणं प्रति कर्मत्वेन तन्त्रेण संबंध इति न वा

क्यभेदः। उच्यते। नकारकृत्यकल्पनं विनायागभावनयोः संबन्धः संभवति। कारकमेव क्रियया न्वेती
ति नियमात्। न चविरुद्धयोः कर्मकरणत्वयोः युगपत्कल्पनेन संभवति। कर्मत्वं हि प्रसिद्धधर्मः
करणत्वं तु सिद्धधर्म इति न युगपद्बोधसंभवः। क्रमेणापि तु कल्पनेन वाक्यभेदः। तेन गुणविधा
नेऽवश्यमुद्भिच्छब्देन तद्धितं यागलक्षणापत्तौ द्वितीयापागेन फलं भावयेदित्येवमन्वयो वाच्यः। त
त्र मत्वर्थलक्षणा स्यात्। तद्रूपा उद्भिच्छब्दो यागनामेति ज्ञायते। फलोद्देशेन कार्यत्वेन च कथं
चिद्यागे विधीयोगसंभवात्। अतश्च पौर्णिकानामेवमत्वर्थलक्षणाभयान्नामधेयत्वं रूढ
नां स्तोमेन यजेते त्यादौ मत्वर्थलक्षणापाप एवा गी कारात्। तदुक्तं। पदमन्त्रतासंदिग्धं प्र
सिद्धेरपृथक्श्रुति। निर्णीयते तेन रूढं तु न स्वार्थादिपुनीयते। चित्रया यजेत पशुका
म इत्यत्र वाक्यभेदभयाद्विचार्यपदस्य कर्मनामत्वं। गुणविधित्वे ह्यग्नीषोमीयपशुयागानुवा
देन चित्रत्वस्त्रीत्वरूपगुणद्वयविधानं स्यात्। पशुः पशुसाधनत्वेन काममुपमानो यागं कुर्यात् सवि
नेपर्णेन स्त्रीलिंगेन च पशुना यागं कुर्यादित्यर्थः। तत्र वाक्यत्रिकमणिना नानेकविधानं शा
क्यत इति न्यायेन वाक्यभेदप्रसंगः। गुणद्वयविशिष्टैककरणकारकविधानाद्विधावैस्वभा
वैषिवाधिताः सर्वविभेदकल्पनात्। शेषमधुघृतपयोधानाउदधकं तडुलास्तांसस्नेहप्राज्यां पत्यामिति स

विहितवाक्योत्पन्नस्य यागस्य दध्यादिद्रव्यकत्वादिविहितेन स्त्रीलिंगत्वाद्विवाशब्देनाभिहित
स्य पशुफलस्य विधायकमेतद्वाक्यमिति द्वितीयमानेकवाक्यताबाधेन पूर्ववाक्यविश्वजि
न्न्यायावगतस्वर्गफलकयागविधानविधावाक्ये वहूरस्याग्नीषोमीयानुवादेन गुणविधानमि
तिवाक्यभेदापत्तेश्च्यते नु वाक्यभेदभयादग्निहोत्रपदस्य कर्मनामत्वं । अग्निहोत्रं जुहोती त्यग्नि
होत्रपदस्य तत्प्रख्यन्यायेन कर्मनामत्वात् तथाहि । अग्नये होत्रं हूयमानं द्रव्यं यस्मिन्निति व्युत्पत्त्या
ग्निदेवत्यस्य कर्माभिधायिनाग्निहोत्रपदस्य न तावद्देवताविधित्वं दध्नाजुहोतीत्यादि यावद्देवस्य
प्राप्तेः । नाग्निदेवताविधित्वं प्रजापतये वह्नये प्रजापतये च सायं जुहोतीति शास्त्रेण सायंहोमे समु
च्चितदेवताद्वयविधायके नाग्निदेवताप्राप्तेरिति राणकः । भाष्यवार्त्तिकयोस्तु वाग्निर्भास्वत्सा
यंकालविशिष्टहोमानुवादे देवताद्वयविधौ च वाक्यभेदापत्तेर्नैतद्वाक्यमग्निदेवताप्रापकं ।
किंत्वग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोतीति मंत्रविध्यर्थापत्तिकल्पितवचनेन तत्प्राप्तिः ।
मंत्रोऽपि हि क्रियातत्संबंधिवा प्रकाशयन्नंगं भवतीत्युक्तं । तेन होमसंबंधिदेवताप्रकाशयन्मंत्रोंऽग
त्वं भजते तेति प्रत्यक्षश्रुत्याग्निदेवताप्राप्तिः होमांगत्वबाधापत्त्या वचनं कल्प्यते । प्रजापतये वेति वाक्ये
न तु प्राप्ताग्निसमुच्चितं प्रजापतिमात्रं विधीयते प्रकरणप्राप्तेर्होमे सायंकालानुवादेन स्यवा

यामे इडस्याऽऽ। न्यायप्राप्तौ न होत्राधिकरणवार्त्तिकेऽप्येवं। सर्वेषां तत्प्रख्यशास्त्रांतरसद्भावान्ना
ग्निहोत्रशब्दो देवताविधिः। तस्य विधित्सितगुणस्य प्रख्यापकं ज्ञापकं शास्त्रं यत्रास्ति त
त्प्रख्यन्यायः। अतो होमनामधेयमग्निहोत्रेण होमेनेष्टं भावयेदिति वाक्यार्थः। द्वितीयाबा
साधितस्य करणत्वानुपपत्तेरर्थाद्विलक्षणसाध्यत्वानुवादः। एवं वाजपेयेन स्वाराज्यकामो य
जेतेत्यत्र वाजपेयपदं गुणप्रख्यन्यायेन यागनामधेयं। सुराग्रहाणामगत्वेन विधानाद्वाज
पेयं सुराद्यं यस्मिन्निति व्युत्पत्तेः। ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यत्र ज्योतिष्टोमशब्दोऽपि तथा
ज्योतींषि स्तोमा यस्मिन्निति व्युत्पत्तेः। त्रीणि वा एतानि ज्योतींषि य एतस्य स्तोमा इत्यर्थवादेन ज्योतीरूप
स्तोत्रीयपरिच्छेदकत्रिवृदादिसंख्यारूपस्तोमसंबंधप्राप्तेः। दर्शपूर्णमासाभ्यां स्वर्गकामो
यजेतेत्यत्र दर्शपूर्णमासशब्दोऽपि तथा यदाग्नेय इत्याद्युत्पत्तिवाक्येषु येषामाग्नेयोपांशुयाजा
ग्नीषोमीयानां पौर्णमासीकालसंबंधोऽवगतस्तेषां पदं विदधान्पूर्णमासीयजेतेति वाक्ये
पूर्णमासीपदेन समुदायोऽनूद्यते। ये चाग्नेयैन्द्रदधिपयोयागानां दर्शकालसंबंधोऽवगतस्तेषां
य एवं विद्वानमावास्यायां यजते इत्यत्रामावास्यापदेन समुदायोऽनूद्यते इति कालयोगप्राप्तेः समुदायोहि
लयोगप्राप्तेश्च दर्शपूर्णमासशब्दः पञ्चनामधेयं [illegible] लाघवेन स्वर्गकामो यजेत साकंप्र

६५

स्वाष्ट्येन यजेत पशुकाम इति वाक्ययोस्तु दर्शपूर्णमासाश्रितयोरवगुणयोः फलेविधानेन लक्ष
णीतरनामत्वं। दाक्षायणसाकंप्रस्थाय्ययोरप्येवं पौर्णमास्यां ह्येषामावास्यं इति वाक्यशेषपा
ठादावृत्तिरूपगुणो दाक्षायणशब्दाभिधेयः। इदमस्य समर्थस्य यजमानस्येमेऽध्यासिनो
दाक्षायणस्त्विकर्तृकमयनं मावृत्तिरिति व्याख्यातः। सह कुम्भीभ्यामभिक्रामेदिति वाक्यशेषाद्दधि
पयः कुम्भीसाहित्यविशिष्टाततस्त्रव्यन्यायाभावात्। न च सन्निहिताग्नेयपाज्यानुवाक्यायु
गलादेवताप्राप्तिः। तस्य क्रमपाठाभावादिति शुक्लं पाक्षे। पर्यग्निश्रुतेस्तोत्रेऽल्पनार्थं देवताविधेरसा
वृत्यपकाशे। नवानेकगुणविधानेवाक्यभेदः। अग्राह्येति विधीयंते वह्वोऽप्येकपदत्त इति न्या

पि॰ १

येनानेकगुणविशिष्टयागविधिकल्पनात्। अन्यथान्योन्यापेक्षे। नान्यत्र च न श्रुतागुणगणाः स्यु
रिति वः संश्रितास्ते त्वाख्यातमपि ध्रुवं विधिपदात्कृतं विदध्युः स्फुटं। आग्नेयादिविशिष्टसमर्पकत्वेन
आवृत्त्यनेकेनाधिकृत्य प्रख्यातं गुणिनामहत्त्वमतस्तौ यथा पदं वाप्यतेऽतीति। तस्मात् आग्नेयादिशब्दो नाम
धेयं। किं तु दर्शपूर्णमासशब्द एव। एवं चातुर्मास्येषु वैश्वदेवपर्वण्याग्नेयमष्टाकपालं निर्वपती
त्यादिना क्रमरश्रौत्यागाभिहितास्तादृतो वैश्वदेवेन यजेतेति श्रुते वाक्ये वैश्वदेवशब्दस्तेषां यागानां ना
नामधेयं न तु यागान्तरदेवताविधिः। यद्विश्वेदेवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वमित्यर्थ

६६ वाहावगतौविश्वदेवकर्तृकलवशेनतत्सख्यन्यायात्। विश्वेदेवदेवत्यमभिप्रेतद्देवत्यामिक्षाया वे२
गप्रवृत्तिसमुदायेलिंगसमवायेनप्राप्यतदैतनयागांतरकल्पनागौरवमाश्रयणीयं। अ
त्रोहवींषिषीयन्ननन्यगतिकलिंगविरोधश्च। नचप्रकृतयागेषुविश्वेदेवदेवताविधिरस्त्विति मे
वाच्यं। तेषामुत्पत्तिशिष्टाग्न्यादिदेवतावरुद्धत्वात्। अतएवोत्पत्तिशिष्टगुणबलीयस्त्वंवात्र
नामधेयत्वस्यापकृष्टिनिरासके। पूर्वोक्ततत्सख्यन्यायेनेतिमिश्राः। वार्तिककृत्पक्षे। विस्तरस्त्व
स्मत्पितृचरणकृततन्यायप्रकाशेबोध्यः। श्येनेनाभिचरन्यजेतेत्यत्रश्येनशब्दस्यतद्व्यपदेश
न्यायेनयागनामधेयत्वं। यद्यपियागानुवादेनश्येनद्रव्यविधिपक्षेततोविहितस्यैवस्तुतिरि
तिश्येनद्रव्यस्यैवस्तुतिःस्यात्। यथावैश्येनोनिपत्याददतएवमयंद्विषन्तंभ्रातृव्यं नि
पत्याददतइति। नचश्येनस्यैवश्येनोपमानेनस्तुतिःसंभवतिभेदमुपमानोपमेयभावानुपप
त्तेः। विशिष्टविधौतुमत्वर्थलक्षणादिगौरवापत्तिः। अतस्तेनगुणेनव्यपदेशादुपमाना
ख्येनशब्दोयागनामधेयं। इदमेवार्थवादप्रयोजनंयच्छ्येनसादृश्यज्ञापनमुखेननामत्व
ज्ञापनं। एवमिषुणाभिचरन्यजेतेत्यत्रेषुशब्दस्ययागनामत्वमिषूपमानात्पूर्ववदूह्यमितिसं
क्षेपः। अथपदद्व्यनामानिविविच्यंते। बर्हिराज्यपुरोडाशशब्दाःसंस्कृतेषुबर्हिरादिषुपाडि ६६

वैः प्रयुज्यमाना गव्यपि जातिमात्रवचनाः। बर्हिरादयगावो गता इत्यादौ जातिमात्रे प्रयोगात्। याज्ञिकप्र
योगेपि जातेरव्यभिचारात्। एवमाज्यपुरोडाशयोरप्युक्तं। प्रोक्षणीशब्दस्यापि याज्ञिकैः संस्कृता
प्सु प्रयुज्यमानस्य प्रोक्षणीभिरूहितेताः स्म इति जातिमात्रप्रयोगादव्यभिचाराज्जातिमात्रं नाम
त्वं। यौगिकश्चायं प्रोक्षणीशब्दः प्रकृष्टोक्षणकरणत्वादपां। रूढेश्च योगे रूढेरकल्पनात्। निर्म
थ्यशब्दस्याप्यग्नित्वजातिमात्रवाचित्वं निर्मथ्यमानाय पयस्या महद्भ्य इति प्रयोगान्निर्मन्थनसंस्कृता
ग्निनामत्वं। यौगिकत्वं च साक्षात्परंपरया वा मंथनोत्पन्नत्वयोगसद्भावात्। क्वचिल्लोकप्रसिद्धेर्बै
लवत्त्वाद्वेदप्रसिद्ध्या नामत्वनिर्णयः। यथा चित्रशब्दो लोके चैत्रगुण्ये प्रसिद्धोपि वेदप्रसिद्ध्या स्तोत्रिया
नवकं ब्रूते। चरुशब्दः स्थाल्यां लोके प्रसिद्धोपि वेदप्रसिद्ध्योदनवाची भवति। आश्ववालशब्दोप्य
श्वकेशेषु प्रसिद्धः काशवाची भवति। एवं वीशब्दोपीक्षुदण्डे प्रसिद्धः काशमूलवाची भवति। कें
वांछिष्टाप्रसिद्धार्थानां शब्दानां म्लेच्छप्रसिद्ध्यार्थनिर्णयः। यथा पिकशब्दः कोकिलनाम। नेम
शब्दोर्धनाम। सतशब्दः शतछिद्रपात्रनाम। तामरसशब्दः कमलनाम। न चैषां निगमादिवशेनार्थ
कल्पनं संभवति। रूढार्थसंभवे कल्पनायोगान्म्लेच्छप्रसिद्धेरपि शब्दाविप्लववदर्थाविप्लवनिश्च

येन प्रामाण्यनिश्चयपातात् । अतश्चोदनादिशब्दवाच्यं वाक्ये छेर्पदवधारितं । अविरोधात्प्रमाणेन तद्धि धा
ह्यर्थचोदितमिति । कुत्र सार्थप्रसिद्धिविरोधेन सा बाध्यते यथा पीलुशब्दस्य वृक्षवाचित्वमार्यप्रसि
द्धं न तु म्लेच्छप्रसिद्ध्या गजवाचित्वमिति संक्षेपः । एवं स्वतस्त्वं वेदस्य प्रामाण्यं निरूपितमधुना मन्वा
दिस्मृतीनां प्रामाण्यमुच्यते । वेदमूलकत्वेनासां प्रामाण्यं । नापौरुषेयत्वेन दृष्टकर्तृस्मरणात् ।
न प्रत्यक्षादिमूलत्वेन तेषां धर्माधर्मयोरप्रामाण्यात् । न च भ्रान्त्यादिमूलकत्वेनाप्रामाण्यं ।
किंचित्प्रत्यक्षवेदविहितार्थनिबंधनेनावधारितात्मत्वानां वेद एव धर्मे प्रमाणं नान्यदित्यभि
दधानानां मन्वादीनां भ्रान्त्यादिकल्पनानुपपत्तेः । यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः । स
सर्वोभिहितो वेदे इत्यादिना वेदमूलत्वाभिधानाच्च । नापि स्मृतिपरंपरामूलत्वेनान्धपरंपरा
प्रसंगात् । अत एव न नित्यानुमेयवेदमूलत्वं नाप्युच्छिन्नवेदमूलत्वं । असंतानाविहिताध्येतॄणां
वेदानामुत्सादासंभवात् । शाक्यादिवाक्येष्वप्यनपेक्षः पक्षपोः स्ववचत्वात् । अतः प्रत्यक्षवेदमू
लत्वेनैव स्मृतीनां प्रामाण्यं । न चैवं स्मृतिप्रणयनवैयर्थ्यं । नानाशाखागतप्रकरणांतरगता
र्थवादमंत्रकल्प्यश्रुत्यर्थोपसंहारकत्वेनार्थवत्वात् । नहि द्यपः प्रणयंती सत्याहवनीयादध्व
पुरीतप्रसंगाता शाखिति शाखांतरवाक्यैकवाक्यता सर्वैरेवागंतुं शक्या । दर्शपूर्णमासप्रकर

णाधीतानां यजुस्सूचलाभतानांतत्रासंबंधेन रजस्वलाधर्मेषु स्मर्यते। तथैवाद्यो मनुष्यराजन्या
गतेष्वस्मिन्नुवाहस्तु क्षाणं वेहतं वादीक्षंतं इत्यर्थवादमूला। महोक्षं वा महाजं वा श्रोत्रियायो
पकल्पयेदिति स्मृतिः। केवलाघो भवति केवलादीति मंत्रमूला। न पवेदन्नमात्मनेऽति स्मृ ६
तिः। नह्यर्थवादमंत्राभ्यां श्रुतिकल्पनं द्वागेवेदानीं तु नानां संभवति। तेनार्थवत्स्मृतिप्रणय
नं। एवं कल्प्यस्मृतेतिहासपुराणानां प्रामाण्यमुक्तं। वेदविरुद्धानां वैषामप्रामाण्यं। यथोदु
बरीस्पृष्ट्वोद्गायेदिति श्रुतिविरुद्धा सर्वासा वेष्टयितव्येति रप्रमाणं। श्रुतिविरोधेन मूलश्रुत्य
नुमानासंभवादिति भाष्ये। वार्तिके तु विरुद्धानामननुष्ठानलक्षणमप्रामाण्यं न तु सर्वथा। स
र्वशाखागतमूलश्रुत्यभावानिश्चयादित्युक्तं। कांसांचिदविरुद्धानामपि प्रामाण्यं यथाक
लंगाचमनादिस्मृतीनां। प्रयोगमध्येक्षुताहिनिमित्ताचमनादिकरणेऽहि वेदहूतत्वावेदक
पाठिस्वादिश्रुतिविहितक्रमबाधः करात्विस्रसस्यात एव बह्निकादि कालबाधश्च श्रौतपदा
र्थपिर्मापावाधश्च। तदेवं विरोधे सति क्रमादिबाधेनाचमनाद्यनुष्ठेयं। पदार्थानां क्रमा
ना द्युपेक्ष्यप्राधान्यात्। प्रधानानुरोधेन च गुणबाधस्योचितत्वात्। वस्तुतस्तु विरोध एव नास्ति सा
र्वपदार्थस्य महोत्तरप्रयोगविधिगवद्[illegible]नादिति प्रपंचितं प्राक्। बोद्धादि

नांवा प्रामाण्यं। वेदविरुद्धाधिकरणपरिग्रहाभ्यां वेदमूलत्वासंभ
स्मृतीनां तु वेदविरुद्धानां तदविरुद्धानां च प्रत्यक्षादिमूलत्वासंभवात्। परिशेषाद्भ्रान्त्यादिमूलत्वात्।
वात्। प्रतीन्द्रियार्थगोचरत्वेन च प्रत्यक्षादिमूलत्वाभिसरोपः। सदाचाराणां श्रुतिस्मृतिमूलत्वेन प्रामाण्यं। तद्
दृष्टकर्तृस्मरणाद्भ्रान्त्यादिमूलत्वस्य च परिकल्पनमिति। न च स्मृतिवत्साक्षाच्छ्रुतिमूलत्वं मास्ता
कं। आचारात्तु स्मृतिस्तस्याश्च श्रुतेः परिकल्पनमिति। शिष्टानामनेकशाखाविप्रकीर्णश्रुत्युपसंहारासं
भितिवाच्यं। मन्वादिवदाचारकर्तॄणामप्यस्मृत्यालोचनेनाचारप्रवृत्तेरभ्युपगमात्। यदाचारकर्तॄणामेवाचारमूलस्मरणक
मप्यस्मृत्या लोचनेनाचारप्रवृत्तेरसंभवात्। तन्मूलं च श्रुतिरिति द्वितीयं तत्प्रामाण्यं। यत्तु ए
च्यते स्मृतिं विनाऽननुष्ठानासंभवात्। यथा मातुलकन्यापरिणयनादिषु। मातुलस्य सुतामू
वस्मृतिविरोधे सदाचारस्य बाधः। समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेदिति स्मृतिविरुद्धो मातुलदुहि
ढां मातृगोत्रां तथैव च। समानप्रवरां चैव राणकेन तृतीयेऽध्याये तन्त्रे मातुलस्य योषेत्यादिवैदिकलिं
ङ्गोद्वाहाचारो बाध्यते राणकेन तृतीयेऽध्याये। अन्ये त्वाहुः स्मृतिविरुद्धानामप्याचाराणां प्रामाण्यमेव। श्रुति
मूलत्वाददृष्टाचाराः प्रमाणमेवेत्युक्तं। अन्येषां तु स्मृतिविरुद्धानामप्रामाण्यमेव। श्रुतिविरु
विरुद्धानामप्येवं। यथा वर्षवस्त्रपरिधानाद्याचाराणाम् श्रीरामतन्त्रे भवतीत्यादिश्रुतिविरु
द्धो। धार्मिकमतेऽननुष्ठानलक्षणमप्रामाण्यं स्मृतिवदेषां द्रष्टव्यं। उभयाविरुद्धानां धर्मबुध्या

९८

६८

९८

शिष्टैरनुष्ठीयमानानां धर्मे प्रामाण्यं। यथा वसन्तोत्सवादीनां। एतच्च व्यक्तिक्रमसाहसादाचा
राणां प्रामाण्ये न स्यादिति। तेषां लोभादिमूलत्वात्। शिष्टाचारवद्भिष्टाललैरपि संदिग्धधर्म
निर्णये प्रामाण्यमुक्तं वार्त्तिके। एतेन वैदिकानां तु धर्मबुद्धीसंस्कृतान्तःकरणानां यथात्मतुष्टेः प्रमाणत्वं
प्रसिद्धं धर्मशुद्ध्य इति। सामर्थ्यस्यापि संदिग्धार्थनिर्णये प्रामाण्यं। यथा स्रुवेणावद्यति स्व
विधि
धितिनावद्यति हस्तेनावद्यतीति विहितास्रुवादीनां द्रव्यावदानेषु सामर्थ्याद्विनियोगः। तत्सिद्ध
ये विल्विषुद्वादिवदकल्पनाद्रव मांसकठिनमिति। शाब्दशाब्देनान्वेतीति न्यायात्। तस्य चाहार्दि
वद वेदत्वे दिवैदिकदेशलादस्य प्रामाण्यमिति दिक्। इति श्रीमदापदेवात्मजजीवदेवसू
नोर्भाट्टभास्करे धर्मप्रमाणपरिच्छेदः। अथ वेदादिप्रमेयधर्मस्वरूपं निरूप्यते। तत्र यागहोमदान
स्नानध्यानजपादिरनेकरूपो धर्मो लोकप्रसिद्धोऽपि यागहोमदानस्वरूपं विविच्यते। देवतोद्देशेन द्रव्यत्यागो
यागः। देवतानामविधिगतशब्देन द्रव्यत्यागं प्रत्युद्दिश्यमानोच्यते। यथाग्नेयोऽष्टाकपाल इत्यत्राग्निश
ब्देनोद्दिश्यमानाष्टाकपालं स्वर्जेत्यसर्थे सति वत्याद्देशश्चतोद्दि ... ष्टानदेवता भवन्ति। तस्याश्च त्रीणि प्रमा
णानि। तद्धितचतुर्थी मंत्ररूपाणि। तत्राद्यमुक्तमेव। सास्य देवतेति देवतायामेव तद्धितविधानात्। अग्नी
षोमाभ्यामाज्यभागौ यजतीति चतुर्थ्या देवतोच्यते। त्यज्यमानद्रव्योद्देश्यत्वे सति अतिगन्हीतत्वरूप

पा

सम्प्रदानत्वविधिनी हि चतुर्थी। देवतायाश्च न प्रतिग्रहीतृत्वं विग्रहाभावात्तत्प्रतिपादकार्थवादानां
स्वार्थे प्रामाण्याभावात्। तेन चतुर्थ्या सम्प्रदानत्वैकदेशभूतं देवतात्वं लक्षणयोच्यते। अत एव
तद्धिताद्दौर्बल्यमस्याः। मन्त्रेण तु न देवतात्वमुच्यते। किं तु तद्ध्यानमात्रमादि। वाचनिकमन्त्रवि-
नियोगानुपपत्त्या तु देवतात्वकल्पनमित्युपपादितं प्राक्। ततश्च चतुर्थीतोऽप्यस्य दौर्बल्यं। यथाहुः।
तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः। देवतायाविधिस्तत्र दुर्बलं तु परं परमिति। एवं देवतोद्देशेन
द्रव्यस्य स्वरूपुरोडाशादेस्त्यागो मानसः संकल्पः याग इत्युच्यते। स एवाग्न्याद्यधिकरणकप्रक्षे-
पाधिको होमः। स्वत्वत्यागपूर्वकं परस्वत्वापादनं दानं। एवं भेदे प्रमाणानि षट्। शब्दान्तराभ्या-
ससंख्यासंज्ञागुणप्रकरणान्तररूपाणि। तत्राद्यं यथा। धातुनिष्पन्नान्येकप्रकरणगतान्येत्वा-
तानि शब्दान्तरं। यथा सोमेन यजेत हिरण्यमात्रेयाय ददाति दाक्षिणानि जुहोतीति ज्यो-
तिष्टोमप्रकरणपठितानि त्रीण्याख्यातपदानि धात्वर्थभेदभिन्नास्तिस्रो भावनाः प्रति-
पादयन्ति। एकधात्वर्थानुरक्तायां धात्वर्थान्तरानुरागासंभवात् भावनाभेदादपूर्वभेदः।
अनन्यपरविधिः पुनःश्रवणमभ्यासः। यथा दर्शपूर्णमासप्रकरणे समिधो यजतीत्यादिपञ्चसु
सोपयजतिरभ्यस्तः स तावन्ति धात्वर्थभावनापूर्वाणि बोधयति ग्रन्थपाठे यथा वैष्णव्यर्थापि चतोः।

समिदादिदेवतानां क्रमपठितमंत्रैरेव प्राप्तेः समिदादिपदानां नामधेयत्वात्तस्य चाभिधेयत्वात्।
सांग्रहणीष्टिप्रकरणे श्रुतमामनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोतीति तत्र चाग्नि सभ्नु
तेहमित्रे पधि चीयत इति भाष्यकारः संख्याग्रहणमाह वार्तिककारस्तु सप्तदश प्राजापत्यान्
पशूनालभते सुदाजेहार· अत्र हि द्रव्यगतसंख्यया यद्यपि न कर्मभेदः स्पष्टो यतीपतोत तथापि द्रव्य
देवतासंबंधबहुत्वाद्वीतियागभेदः। प्राजापत्यानि सत्र हि प्रथमं प्रजापतिदेवतापशूनान्वितानां
पशूनां पश्वाद्बहुत्वान्वयः। प्रजापतिदेवता यस्यासौ प्राजापत्यः। प्राजापत्यश्च प्राजापत्यश्च प्राजापत्य
त्याः इति तेन प्रतिपशुभिन्ने देवतासंबंधे सप्तदश तावंतो यागाः कल्प्यंते। यदि तु बहुत्वान्वयः पूर्वं कृ पशूना
मेकैव देवतासंबंधः कल्प्येत। पशुश्च पशुश्च पशुश्च पशवस्ते प्राजापत्या इति· तथा सत्येको या
गः सर्वपशुद्रव्यको भवेत्। सावा ग्नीषोमीयादिवत् त्वादेकपशुनिष्पन्नो
तत्रैकादशानां चावैष्णव्यं स्यात्। यदि तत्पदेशः सप्तदश पशुद्रव्यकैकस्य नवदानमपास्य वा
छेपः। तत्रैतरपशूनामानर्थक्यं स्यात्। यदि प्रतिपशुहृदयाद्येकैकमवदानं गृह्येत तदैकपशुनिष्पन्न
लमवदानगणस्य बाध्येत। एकादशाधिकानां चावैष्णव्यं स्यात्। यदि तत्पदेशः सप्तदशपशुद्रव्य
कैकयागविधानार्थ इति निर्णीयेत तदा तद्दशेन चोदको बाध्येत सत्तु पशुगतदेवतान्वय एव बद्धो

७०.

न्वयपौर्वापर्यसंदेहासंदिग्धः। एवं च वाक्यशेषरूपेण चोदकेन बहुयागविधायित्वं निर्णीयते। त
थाच यश्च नादेवतान्वयपूर्वकं एवं। एवं बहुत्वान्वयः। तेद्रुत प्राजापत्येषु यागानामेकानेकत्वसं
शये सतः प्रकृते तु वक्ष्यमाणवाक्यशेषेण निर्णय इति। ज्योतिष्टोमानन्तरमथैष ज्योतिरथैष विश्व
ज्योतिरथैष सर्वज्योतिरेतेन सहस्रदक्षिणेन यजेतेति श्रुतिवाक्ये ज्योतिरादिसंज्ञाभिर्ज्योतिष्टो
माद्भिन्नानि कर्माणि विधीयन्ते। न तु वसन्ते वसन्ते ज्योतिषा यजेतेति वन्नामैकदेशेन ज्योतिःशब्दे
न ज्योतिष्टोमग्रहणं। अथशब्देन प्रकरणविच्छेदात्। वसन्तवाक्यं तु प्रकरणपाठाज्ज्योतिष्टोम
विषयं। एवं च ज्योतिरादिसंज्ञाभेदाद्दक्षिणाधर्मविधानेनैव यागाः सहस्रदक्षिणाविशिष्टान्
विधिविधित्वाद् इति संज्ञया कर्मभेदः। चातुर्मास्येषु वैश्वदेवपर्वणि वैश्वदेव्यामिक्षा वाजिभ्यो वा
जिनमिति श्रुतं। तत्राद्यवचसा विश्वेदेवदेवतामिक्षाद्रव्यविशिष्टो यागो विधीयते। उत्तरे तु वा
जिदेवतावाजिनद्रव्यविशिष्टं यागान्तरं। न चाद्यवाक्यविहितयागानुवादेन वाजिनद्रव्यविधी
यतां। वाजिपदस्य वाजसंज्ञकान्नरूपामिक्षायोगाद्वाजिनं यते येषामिति व्युत्पत्त्या विश्वदे
वानुवादकमस्त्विति वाच्यं। उत्पत्तिशिष्टामिक्षाद्रव्यनिराकांक्षस्य पूर्वयागस्योत्पन्नशिष्ट ७०.

70

५

नवाग्निनेमासं वध्नातः वाजिपदस्य मंत्रादिगतप्रसिद्ध्यादेवताविशेषेरूढस्य योगेनाविश्वेदेवपर
त्वासंभवात्· तेनोत्सन्नशिष्टगुणावरुद्धकर्मण्यनेविशामानोगुणात्कर्मभेदकः। वाक्यभेद
पादकोपि गुणः कर्मभेदको यथा· सान्नाय्यप्रकृतस्यपयस्याभयहविरातिमाछेदः पंचशरावमो
दनंनिर्वपेदितिश्रुतः अत्र सान्नाय्याभिदधिपयोरूपहविर्नाशनिमित्तपूर्वयागेन हविषेन
दध्नस्यवाधिधोवाक्यभेदापत्तेः। तेनैन्द्रं दध्यपंचशरावद्रव्यकेयागान्तरेहविर्नाशोनिमित्ते
विधीयते एवं यच्चविधेयानेकगुणश्चवर्णपधाग्नेयोष्टाकपालद्रव्यसादीतत्रवा
क्यभेदापादकेगुणात्कर्मभेदोद्रष्टव्यः। कुण्डपायिनामयनेसत्रेमासमग्निहोत्रं जुहोतीतिश्रु
तंतत्रप्रकरणान्तरान्नित्याग्निहोत्रतः कर्मान्तरंमासकालविशिष्टंविधीयते· प्रकरणान्तरेनाम
पूर्वकर्माविपरिक्ततस्मात्सहकारीत्वानुकूलत्वाप्यलोपादेपूर्णकान्यतरसंबंधः। नामनश्चाख्या
तपारतंत्र्यं· अग्निहोत्रमस्तुतेद्रूरस्थानत्याग्निहोत्रानुपस्थितेः· अग्निहोत्रमितिनाम्नास्त्या
ख्यातसमानाधिकरणत्वेनतद्विहितापपरामर्शित्वात्स्वातंत्र्येणकर्मानुवादकत्वासंभवा
त्। पत्रन्तुनामस्वतंत्रंतत्रद्रूरस्थकर्मानुस्थापकत्वंभवतियथादर्शपूर्णमासाभ्यामिष्ट्वासो

पन्नुपस्थितिः

मेनयजेतेत्यत्र दर्शपूर्णमासपदेन द्रव्यकर्मानुवादेन तद्गुणकालता सोमयागे विधीयते । अ
त्र तु नाम्नः पारतंत्र्याद् आख्यातेनाप्रवर्तितप्रवर्तनस्वभावेनापूर्वकर्म विधीयते । तस्यैवेदं नाम
गोप्याद्वत्साभवीति । अनेकशक्तिकल्पनस्यान्याय्यत्वात् । नित्याग्निहोत्रसादृश्यं वास्य गौण
वृत्तिनिमित्तं न मानान्तरावगतमित्यनेनैव पदेन वत्सार्थलक्षणया नित्याग्निहोत्रधर्माति
देशोऽस्मिन्कर्मणि रैरूपतेऽग्निहोत्रं वत्कुहोतीति सोऽयं नामातिदेशः । एवमुक्तः । भवति च मा
नान्तरानवगतसादृश्यानां सादृश्यविधावपि गौणाः प्रयोगाः । सौमिदिष्ठ्यपि डासि हा । किंच
तामित्यादि ॥ तथाऽयमपि भविष्यति । न चात्र होमानुवादेन विधेयो गुणो दृश्यते येन गुण
संक्रान्तशक्तिना विधिना द्रव्यमपि कर्मान्तरं प्रतिपद्येत पदाहवनीये जुहोतीतिवत् । मासकाल
स्यानुपादेयस्योपादानरूपविधिशक्यगोचरत्वासिद्धेः कालेन कर्मोपादीयते न तु कालः । एवं
देशनिमित्तफलसंस्कार्याणामनुपादेयानां संबंधे सति प्रकरणान्तरेण भेदो द्रष्टव्यः
तद्यथा सरस्वत्या दक्षिणे तीरे आग्नेयोऽष्टाकपाल इत्यत्र दार्शपौर्णमासिकाग्नेयात् कर्मान्त
रं देशसंबंधसहकृतेन प्रकरणान्तरेण । सत्र्यायागस्य परिक्रीतायजेतेत्यत्र सत्रस्यो गोर

हि

योसकल्पेक्षते तस्यांशत्रयो निमित्तो विश्वजित्यां[...]मांतरमेवाह कांडपाठिताद्विश्वजितो विधीयते·
ग्न्याग्नेयमष्टाकपालं निर्वपेदुश्चाम इत्यत्र रूपपदाभिधेय कांतिफलसंबंधेन कर्मांतर सं
योगेन यो विधीयते· तत्रैधातवीयादीक्षणीयाभवतीत्यत्र दीक्षणीयाकार्यादीक्षासं[...]स्का
रोद्देशेन त्रैधातव्यारभ्य कर्मांतरस्य तत्र फलार्थत्वे त्रैधातव्यातो विधीयते· एवमन्यत्रानुपा
देयसंबंधस्य ह्यक्षतो सन्निधिः प्रकरणांतरकर्मभेदकमध्या। सान्निध्योत्यनुपादेयसंब
धेसत्यपि न कर्मभेदः। यथा स्त्रायं जुहोतीत्यादेः सन्निधौ हि ताग्निहोत्रस्य वैकालसंबंधवि
धिरिति देव· एवं शब्दांतरादिप्रमाणसमूहक्षतेनाविधिना भिन्नत्वेन बोधितानि यागादी
निरूपेणाभिधीयंते· तत्राग्निहोत्रदर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमस्त्वादिसत
यश्चेति· वैदिककर्ममाश्रित्याग्निहोत्रं विविच्यते। अग्निहोत्रं जुहोतीत्युत्पत्तिविधिः। अ
ग्निहोत्रेण होमेनेष्टं भावयेदिति वाक्यार्थः। इष्टविशेषाकांक्षायामग्निहोत्रं जुहुयात्स्व
र्गकामो या[...]वज्जीवमग्निहोत्रं जुहुयादित्यधिकारविधिभ्यां स्वर्गसाधनत्वेन जीवन
निमित्तो पापक्षयसाधनत्वेन चास्य एव होमो विधीयते· तेन काम्यनैमित्तिकोभयोगोभिन्नो

७२

सायंप्रातर्जुहोतीत्याभ्यां प्रयोगविधिभ्यां द्वयोः कालयोः प्रयोग
प्रतिप्रयोगं चापूर्वभेदः। पुनः सायं जुहोति प्रातर्जुहोतीत्याभ्यां प्रयोगविधिभ्यां द्वयोः कालयोः प्रयोग...
द्वयाभ्यासो विधीयते तत्प्रत्यभ्यासं चापूर्वभेदः। पुनश्च तस्मिन् गार्हपत्ये वा तस्यान्वाहार्यपचने दक्षिणाह
वनीयेषु एवं विहारविराट् संपन्नमग्निहोत्रं जुहोतीति वाक्यात् आहवनीयाद्याधारभेदेन दशाभ्यासाः।
दक्षिणाहवनीये द्वे गार्हपत्ये द्वे अन्वाहार्यपचन इति पञ्चसु षडभ्यासाः। प्रत्यभ्यासं चापूर्वभेदः। द
दध्ना जुहोतीत्यादि दशभिर्वाक्यैर्होमानुवादेन द्रव्याणि विधीयन्ते पयो दधि यवागूः घृतं सर्पिः तण्डु
तण्डुलाः सोमो मांसं तथा तैलमापश्चैतानि वेदशः ते यावत्संन्यासिशिष्टत्वादिकल्पः। दध्योदय
...काम्यत्वनुरूपादिसत्रहोमाश्रितद्रव्यफलोद्देशेन विधीयते न तु होमान्तरमिति भाष्यानुपपादितः। भा
...अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति मन्त्राभ्यां
वनापूर्वेत्तुभिधीयते अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति मन्त्राभ्यां
...प्रकाशितावग्निसूर्यावाहवनीयाधारयोर्होमाभ्यां
सायंप्रातःकालहोमयोर्विनियुक्ताभ्यां प्रकाशितावग्निसूर्यौ वाहवनीयाधारयोर्होमाभ्यां
...प्रजापतये च सायं जुहोति यत्सूर्याय च प्रजापतये च प्रातरिति
सूर्याय च भवतः। यदग्नये च प्रजापतये च सायं जुहोति प्रजापतिर्देवता सायंप्रातःकालयोर्विधीयते तत्र
देवताभ्यां मन्त्रप्राप्तमाग्निसूर्यसमुच्चितीप्रजापतिर्देवता सायं प्रातःकालयोर्विधीयते तत्र
न मन्त्रबलात् ज्योतिष्टुगुणविशिष्टयोरग्निसूर्ययोर्देवतात्वं नापि वलदृष्टा बोधितप्रजापतिर्देवत
यातयोर्बाधः। ... ततः पूर्वा उक्तिः प्रजापतेरुत्तरा उक्तिरित्यादि क्रमबोधकवचनाभ्यां देव

यमेव गम्यते । अत एवाग्निर्ज्योतिर्ज्योतिः सूर्यः स्वाहेति सायं जुहोति सूर्यो ज्योतिर्ज्योतिरग्निः स्वाहेति प्रा
तरिति वाचनिकयोर्भिन्नलिंगकमंत्रयोर्न देवताद्वयकल्पकत्वं किं त्वेकदेवताप्रकाशनेनैव योग
त्वात् । तेनानयोः शुद्धलिंगकमंत्रयोरप्येकार्थत्वाद्विकल्पः । होमार्थमुद्धृतेऽग्नौ होमात्प्रागेवानुगते प्रा
यश्चित्तं श्रूयते । अग्नये ज्योतिष्मते पुरोडाशमष्टाकपालं निर्वपेद्यस्याग्निरुद्धृतोऽहुतेऽग्निहो
त्र उद्वायेदिति । तत्र यदा दर्शार्थमुद्धृतेऽग्नौ वह्निहोत्रमनुष्ठीयते तन्नाशे नेदं प्रायश्चित्तं कार्यं त
स्य होमार्थोद्धृतत्वेनाग्निसंपादनद्वारा होमांगत्वात् । दर्शार्थोद्धृतस्य च होमार्थोद्धरणाभावात् । अत ए
व होमकालाभावेऽपि होमांगोद्धरणमंत्राभावेऽपि न तस्य वैगुण्यप्रसंगे न तु सोऽग्निर्होमस्योपकरो
ति । यथा । निशीष्टे । अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यो रक्षोभ्यो बिभीयादिति वि
हितायां रक्षोभयापादपर्तितायां सद्वाग्निः प्रसंगेनोपकरोतीति तद्वत् । तस्माद्धोमार्थमुद्धृतेऽग्नौ न
ष्टे ज्योतिष्मतीष्टिः कार्या । एवं यजमानदेशान्तरगमने तत्संस्कारपर्यंतं पुत्रादिनाऽक्रियमाणमग्निहो
त्रं मृतेऽग्निहोत्रं तत्र श्रूयते अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयतीति । जीवतो य
जमानस्याग्निहोत्रे देयं तत्र समिधमग्निहोत्रहवण्यामुपरि धृत्वा सोऽग्निमाहवनीयं प्रति गच्छेत न मृता

ग्निहोत्रेतधस्ताद्धारयन्नेगच्छेद्दिसर्पिः। तथा प्राचीनावीती दोहये यज्ञोपवीती हि देवेभ्यो दोहप
तीति। अत्र प्राचीनावीत होमाय दोहनांगत्वेनाविधीयते यज्ञोपवीतस्य तु सामान्यवचनेन सर्वक
र्मर्थितया प्राप्तस्यानुवादः। इत्यग्निहोत्रे वाक्यानि व्याख्यातानि। अथ दर्शपूर्णमासौ व्याख्या
येते। तत्राग्नेय उपांशुयाजोऽग्नीषोमीय इति पूर्णमासस्य त्रयो यागाः। आग्नेय ऐन्द्रदधियागःप
योयागश्चेति दर्शस्य। तेषामुत्पत्तिविधयः। यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्यां
चाच्युतो भवतीत्युत्पत्याग्नेयविधिः। अथैकस्याग्नेययागस्याभ्यासेन कालद्वयान्वय इति भ्रमः
एकस्यानिर्विशमानात्कालद्वयपरत्वायोगाद्यागभेद इति तात्पर्यं। अत्राग्निदेवताष्टाकपालपुरो
डाशरूपद्रव्यतासंबन्धकल्पितो यागः सकलगुणविशिष्टो विधीयते। उपांशुयाजमन्तरा
यजतीत्यनेनाग्नेयाग्नीषोमीययागयोरन्तराले उपांशुयाजो विधीयते। यद्यप्यकृतसोमयाग
योऽभवत्वेदस्यः पौर्णमासहविष्यानन्तर्यं न निर्वपेत्तद्युभयदेवताभवतीत्यग्नीषोमीयपुरो
डाशयागस्य सोमयागोत्तरभुक्त्वविधानात् तथाप्याग्नेयोत्तरं तदुपलक्षितो तरालो स्त्येव।
उपलक्षणापायेऽप्युपलक्ष्यानपायदर्शनाच्छंखवेलायामागन्तव्यमिति नियमे कदाचिच्छंखध्वन

भावेपि तदुपलक्षितागमनकालबोधवत्। दर्शोऽप्यक्षतसोमयागस्याग्नेयैंद्राग्नपुरोडाशद्वयांतरा
लेऽसद्भावेऽपि तावद्भूतामग्नीषोमावाज्यस्यैव नाद्युपांशुपौर्णमास्यां यजन्निति पुराकल्पार्थवा
दकल्पितेन विधिना पूर्णमासकाले संबंधविधानोन्नोपांशुयाजइति मीमांसकाः याज्ञिकास्तु
दर्शेऽप्युपांशुयाजमिच्छंति। स्वीकृतं चैतन्मतं श्रीमन्मीमांसकैरुत्तरत्र वक्ष्यामः। इत्थमुत्पन्नस्यो
पांशुयाजस्य सर्वत्रैवैतद्यज्ञायगम्यते यथुवा पामाज्यामित्यविहितद्रव्यकयागेष्वन्यविधिना
द्रव्यविधीयते। विष्णुप्रजापत्यग्नीषोमरूपा वैकल्पिक्यो देवता मंत्रेभ्यः कल्प्यंते। एतत्सन्निधौ विष्ण्वा
दिदेवतानां त्रयाणां याज्यानुवाक्यायुगलानां शाखाभेदेनाम्नानादेतच्चजामिवा एतद्यज्ञस्यक्रि
यते यद्न्वंचौ पुरोडाशावुपांशुयाजमंतरा यजतीति यागं विधाय विष्णुरुपांशु यष्टव्यो
जामित्वाय प्रजापतिरुपांशुयष्टव्योऽजामित्वायाग्नीषोमावुपांशु यष्टव्यावजामित्वायेति श्रु
तानां वाक्यानामर्थवादत्वमेव नतु देवताविशिष्टयागविधित्वमुपांशुयाजमंतरालसंपृक्तया कयाचनैवयाग
प्राप्तेः एषां च देवतात्रयविशिष्टयागत्रयविधायकत्वे वाक्यभेदः स्यात्। अजामिदोषोपन्यासोप
क्रमादजामित्वोपसंहाराच्चैकवाक्यत्वप्रतीतेः तेनार्थवादत्वमेव युक्तं। ताभ्यामेतमग्नीषोमीयमे
कादशकपालं पूर्णमासे प्रायच्छदिति परस्परार्थवादकल्पितविधिनाद्रव्यदेवतासंबंधः कल्प्यते। पा

गोविधीयते। अयं च सन्नतसोमयागस्यैव पूर्णमास्यामित्युक्तं। असन्नतसोमस्य तु तेनादिनैव पूर्णमा
स्याकालसिद्धिवचनात्। अस्याग्नेयस्य वैधिधि पाठे पि मंत्रपाठक्रमेण पश्चादनुष्ठानमित्यु
क्तं प्राक्। दर्शे त्वाग्नेयः सर्वत्वैन्द्रं दध्यैन्द्रं पयश्चेत्याभ्यां दधिपयोयागौ विधीयेते। तयोश्चैक
देवतत्वात्सह प्रयोगोपि कर्मभेदस्त्वेव। एतौ च सन्नतसोमयागस्यासन्नतस्य त्विन्द्राग्नी अमावा
स्यायामसन्नयतस्त्वैन्द्राग्नयागो विहितः। ताभ्यामेव च यागाभ्यां कालसिद्धिवचनात्। ए
वमुत्सन्नमये नां षण्णां यागानां दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत सर्वेभ्यः कामेभ्यो दर्शपूर्णमा
सावित्याभ्यां स्वर्गफलार्थतास्वर्गातिरिक्तपश्वादिफलार्थता च गोबलीवर्दन्यायेन विधीयते।
सर्वकामवाक्येन स्वर्गसंबंधे संभवत्यपि पृथग्वाक्याम्नानसामर्थ्यात्तद्वाक्यावबुद्ध ए
व स्वर्गोभिमतो नान्यथेति कल्प्यते। यावज्जीवं दर्शपूर्णमासाभ्यां यजेतेत्यनेन पूर्णमास्य
मावास्यायोर्यावज्जीवनं निमित्ते पापक्षयार्थता च बोध्यते। तेन नित्यकाम्यप्रयोगाभेदात्त
उत्पत्त्यपूर्वभेदः काम्यप्रयोगभेदात्तेनोत्पत्त्यपूर्वभेदः काम्यप्रयोगेन नित्यस्य प्रसंगासिद्धिः
दर्शपूर्णमासाभ्यामिति द्विवचनं च समुदायद्वयाभिप्रायेण। उत्पत्तिवाक्यावगतपूर्णमा

काला

सकालयोगानांत्रयाणां समुदायो य एवंविद्वान्पौर्णमासीं यजत इत्यत्र वाक्ये पूर्णमासीपदेनानू
द्यते य एवंविद्वानमावास्यां यजत इत्यत्रामावास्यापदेनानूक्तकालयोगानां त्रयाणां समुदायो
नूद्यत एवंविद्वान्य इत्यंशः समुदायद्वयाभिप्रायेण दर्शपूर्णमासाभ्यामिति द्विवचनं नचैतौ
वता दर्शपूर्णमासशब्दः समुदायनाम उक्तवाक्येषु समुदायिनां यागानामेव कालसंब
धाद्यगमात्तेषामेव नामधेये ते चांगसहितानां फलसंबंधोपि प्रत्येकं कालसंबंधाद्भिन्नत्र
योगत्रयाद्व्यो पूर्णमास्यां पूर्णमास्या यजेतामावास्यायाममावास्यया यजेतेति वाक्याभ्यां
द्वयोः कालयोः त्रिकस्य त्रिकस्य प्रयोगद्वयं विधीयते पौर्णमास्यां सांगैस्त्रिभिर्यागैरप
र्वं कुर्यादिति एवममावास्यायामपि एवं च फलवाक्येषु षण्णां फलसाधनत्वानुपपत्ता
पूर्वैकफलापूर्वं कल्पितं तस्यैव कर्तव्यताकांक्षायां अंगान्वये जाते सांगैस्त्रिभिरुत्पत्स्य
तेरवधारणाद्धा शुतरविनाशिनां यागानां तत्पर्यंतमवस्थानासंभवः षड्भिरुत्पद्य पूर्वोत्पत्तिक
ल्पितान्यितानि समाधिनास्मिन्कालद्वयाकारद्वये भाव्यतां प्रतिपद्यते सांगसहितयाग
त्रयजन्यत्वासंभवात् एवं चानयोर्व्याकरयोः सांगसहितयागत्रयकरणकभावना

75

भाव्यते न समुदायापूर्वं द्वयं कल्प्यते· एवं नवापूर्वाणि प्रधानयागैर्जन्यते अंगानि
तु पघादिफलापूर्वं कथं भावाकांक्षयैव गृह्यते· फलेवाक्येत यापि समुदायापूर्वजनन
द्वाराफलापूर्वोपायानि भवंति· कालवाक्ये द्वयं समुदायापूर्वजनकत्वावगमात्· अतएव
प्रीतिसमुदायभावतेते· तत्रापि सन्निपत्योपकाराणि उत्पत्त्यपूर्वार्थित्वात्तद्द्वेनुप्रियं
ते· आरादुपकारीणि तु फलापूर्वार्थानि तान्यपि समुदायापूर्वजननद्वारा त्वात्तद्द्वारेण
भिधीयंते· सन्निपत्योपकारकेष्वपि कानिचित्प्रधानमात्रार्थानि यथा निर्वापप्रोक्षणावघा
तपेषणसंवपनादीनि व्यापृधद्रव्यकयागोत्पत्त्यपूर्वार्थानि· व्रीहिभिर्यजेत यवैर्यजेते
ति वाक्याभ्यां पुरोडाशाद्द्रव्यकप्रधानयागानुवादेन पुरोडाशप्रकृतिद्रव्यत्वेन व्रीहियवौ
नियम्यते· तयोश्चैकार्थत्वेनानिरपेक्षविधानाद्विकल्पः। तत्र पदार्थानिर्वापादौ अन्व्रीहि
देशेन विधीयंते तत्रापि व्रीहिस्वरूपेतेषामानर्थक्यात्तंडुलनिर्वृत्तिप्रणाड्यापव्रीहीणां
मागेन यागापूर्वसाधनत्वं व्रीहिभिर्यजेतेति वाक्यावगतं तद्व्रीहिपदेन लक्षयित्वा वाक्ये
नाविधीयंते· तेन निर्वापादिवाक्ये यमर्थः। यत्तंडुलनिर्वृत्तिप्रणाड्यागेनयागापूर्वसाध

नेतान्निर्वापादिभिः संस्कुर्यादिति । तादृशाभ्यः यवाग्र्यपीति तेऽपि निर्वापादिभिः संस्कर्तव्याः
इति । तत्र निर्वापावघातादीनि पृथक्करणवैलक्षण्यादिदृष्टसंस्कारार्थानि । यतो यानि त
दङ्गानि चतुःसंख्यामुष्टिपरिमाणनियमादीनि तानि दृष्टस्वरूपे वैयर्थ्यात्तत्साध्यप्र
धानापूर्वार्थान्येव । प्रोक्षणादीनि त्वदृष्टसंस्कारार्थानि । तदङ्गानि तु प्रोक्षणीरुत्पुना
तीत्यादिवाक्यविहितान्युत्पवनादीनि तदपूर्वार्थान्येव । तत्रैवानर्थक्यपरिहारात् । एव
माज्यसंस्कारकाण्युत्पवनावेक्षणादीनि तान्याज्यसाध्योपांशुयाजापूर्वार्थानि । सा
न्नाय्यार्थानि दोहनातञ्चनादीनि तत्साध्ययागापूर्वार्थान्येव । कानिचित्सन्निपात्यङ्गानि
प्रधानापूर्वार्थानि । यथान्वाधानं पूर्वेद्युरग्निं गृहीत्वोत्तरमहर्यजेतेति विहितमग्निषु समित्प्र
क्षेपरूपमग्निसंस्कारत्वादग्नीनां चवदाहवनीये जुहोति गार्हपत्ये हवींषि श्रपयति दक्षिणा
ग्नावन्वाहार्यं पचतीति वाक्यैरङ्गप्रधानार्थहोमहविःश्रपणान्वाहार्यपाकार्थत्वावगते
रङ्गप्रधानार्थं । एवं परिसमूहनपर्युक्षणपरिस्तरणपरिधानादयोऽप्यग्निसंस्काराङ्गत्वात् । एवं
वेद्यां हवींष्यासादयति बर्हिषि हवींष्यासादयतीति वाक्याभ्यां अङ्गप्रधानहविरासाद

७६

76

नार्थत्वेनविहितेवेदिव्रीहिषी त्यंगप्रधानार्थे तद्धर्मश्चिरवनननलवनादयोगप्रधानार्थाः।वेदिकरणंच
पूर्वेद्युरमावास्यायांवेदिंकरोतीति पूर्वेद्युर्विहितं पौर्णमास्यांतु हविःश्रपणोत्तरं क्रियते एवमृ
त्विग्वरणदक्षिणादानेऽस्मिन्नंगानांसर्वार्थत्वात् सर्वार्थे दर्शपूर्णमासयोर्यजकत्वेऽश्चत्वार ऋ
त्विजस्तेषां प्रयोगारंभे वरणं तद्दानमपर्वत्वाद् दृष्टार्थं प्रयोगमध्ये ब्रह्मणो वरणं विहि
तम् प्रजापते इत्यादिमंत्रेण तददृष्टार्थं प्रणीतास्तु प्रणीताभिर्हवींषि संयौतीति प्रधानहविःसं
यमनार्थत्वेन विहिताः प्रधानमात्रार्थाः सर्वार्थाः प्रणीता इति कात्यायनीयाः। अंतर्वेदि प्रणी
तानिनयतीति तासां मंत्रप्रतिपत्तिः प्रोक्षणीधर्मा उत्सवनादयो व्यंगप्रधानार्थाः प्रोक्षणीनां
पात्रवेदीध्मप्रोक्षणार्थत्वात् सर्वार्थत्वात् इध्माधानमग्निसमिंधनार्थत्वादंगेभ्यश्च सर्वार्थत्वाद
गप्रधानार्थं तत्र सामिधेन्योऽपि प्रवोवाजेत्याद्याः पंचदश त्रिः समिधामिन्द्यकाशकाः स्युः सप्तद
शवैश्यस्येति वैश्यकर्तृकप्रयोगे सप्तदश विहिताः। एकविंशतिमनुब्रूयात्प्रतिष्ठाकामस्ये
तिकाम्याः। तत्र पंचदश्यैकादशत्वं पक्षे तु तथापि त्रिः प्रथमामन्वाह त्रिरुत्तमामिति वचनात्पंचद
शसंपद्यते सा सप्तदश्यादिस्तु पृथुपाजवत्योर्धाय्ये उशिक्कवुभोधाय्याइति वचनात् धाय्यासंज्ञिकानां
मध्ये प्रक्षेपाद्भवतीति पक्षे पशुसामिधेन्यामानवतीसमिद्धवत्योरंतराले इयं वै सामिधेन्या मानवतीमा

ख्यातं। दक्षिणाग्न्याधिकरणकाविष्टलेपहोमस्य प्रधानमात्रार्थीपि हविर्लेपप्रतिपत्त्यर्थत्वात्सुधा
नार्थ एवं। स्विष्टकृद्यजुर्होमो ध्रौवाज्यप्रतिपत्त्यर्थत्वादङ्गप्रधानार्थस्त्यागांशेनादृष्टार्थश्च। ए
वमध्वर्युकर्तृकाः प्रायश्चित्तहोमाः साङ्गप्रधानवैगुण्यपरिहारार्थत्वादुभयार्थाः। एवं ब्रह्म
कर्तृकाग्न्युपस्थानं कोयद्यस्मिन्नित्यादिः स्वाहेति गार्हपत्ये जुहुयाद्यदि यजुष्टो भुवः स्वाहेति
दक्षिणाग्नौ यदि सामतः स्वः स्वाहेत्याहवनीये सर्वतो विज्ञाते वा भूर्भुवः स्वः स्वाहेत्याहवनीये इत्यादयः।
इत्थं सान्निपत्योपकारकाणि प्राग्वत्कालान्तराणि प्रायश्चित्तानि होमानि। आरादुपकारकाणि
तु सर्वाणि स्वोपकार्यापूर्वद्वारा परमापूर्वोपसंसर्गाणि। यथा द्वावाघारौ। स्रौवो वाघारः प्रजापतिदे
वत्यः। स्रुच्याघार इन्द्रदेवत्यः। प्रयाजाः पञ्च। पञ्चमप्रयाजो मन्त्रांशेन देवतासंस्कारको
पि सन्ध्याख्यातः पूर्वपरिच्छेदे। अग्नीषोमाभ्यामाज्यभागौ यजतीति वाक्यविहितौ द्वावा
ज्यभागौ। आग्नेयाज्यभागः प्रधानयागीयदेवतायाः संस्कारकोपि स्विष्टकृते न। एकस्मिन्वा
क्ये सौम्यस्यारादुपकारकत्वमाग्नेयस्य सान्निपातिकत्वमित्युभयासंभवात्। सौम्येनापूर्वं
कुर्यादपरेणाग्निसंस्कुर्यादिति वचनव्यक्तिभेदेन वाक्यभेदापत्तेः। तेन सौम्यस्याहवनीय

गा

77

सोऽस्मेद्धवतीयदंतरातज्ञाप्याइतिश्रुतेः। एवंनिर्विमंत्राद्यपिदेवेहोमान्विहइसादयोभिनप्रकाशकाः॥
अयाउरशेषाभिघारणंप्रयाजशेषप्रतिपत्त्यर्थमप्यधिकरणानियमांशेनहविःसंस्कारत्वादंग
प्रधानार्थः एवंहि श्रूयते स्रुवेध्रुवामेवाग्रेभिघारयति ततोऽप्रथममाज्यभागौयक्ष्यन्नवत्ता
लिः एवमादीनिप्रधानयागप्राग्वर्तीनि सन्निपत्योपकारकाणि प्रधानयागोत्पत्त्यपूर्वोत्पत्तौ
व्याप्रियंते उत्तरकालानितदुपकारकाणितान्यार्थिकानिकिंचित्प्रधानमात्रार्थानिकानिचिदुभ
यार्थानि: यथोत्तरार्द्धात्स्विष्टकृते समवद्यतीति स्विष्टकृद्यागस्यांगप्रधानहविरुत्तरार्द्धप्रति
पत्त्यर्थत्वेन मंत्रांशेनचांगप्रधानदेवतास्मारकत्वेनोभयार्थता. एवमिडाप्राशित्रचतुर्धाकर
णांशंपुरोडाशकालभक्षाणामुभयार्थता. एवंच हविःप्रतिपत्त्यर्था एवेति प्रतिपाद्य हविनां
शोलुप्यंते. स्विष्टकृद्यागस्य सांगांशेनादृष्टार्थोपीति प्रतिपाद्योत्तरार्धनाशोप्याज्येन
कार्यः। यस्यसर्वाणिहवींषिनश्येयुर्दुष्येयुरपहरेयुर्वा आज्येनैतादेवताः परिसंख्याय यजेतेति
वाक्यात्. अत्र चहविषांनाशादिदूषणानिमित्तेषुनष्टहविःप्रतिनिधित्वेनाज्यंविधीयते. तत्राद्य
ष्टार्थांगप्रधानयागेषु सर्वत्रोभवतिस्विष्टकृद्यागप्रधानार्थस्ताद्यकंएवंपरिच्छेदेव्या

यमप्याराद्उपकारकः। एवं नारिष्टहोमो प्रधानयागोत्तरकालीनावाराद्उपकारकौ। एवं त्र
यो ऽनुयाजाः शंयुवाकाश्च। एवं पत्नीसंयाजाः। गार्हपत्याधिकरणकाः। आज्येन पत्नीः संया
जयंतीत्याद्यन्यापत्नीः संयाजयंतीति वाक्याभ्यां मोऽज्येन पृषदाज्य घन स्व मांसेन कार्याः। द
र्शपूर्णमासः सर्वांगयुक्तो दर्शपूर्णमासो व्याख्यातः। पौर्णमास्यां तु संस्थाप्य पौर्णमासीं वै
मृधमनु निर्वपतीति वाक्येन वैमृधेष्टिः प्रयोगबहिर्भूतमंगं विधीयते। याज्ञिकास्तु समा
नतंत्रामनुतिष्ठंति। इयं स्वादर्शद्वारा पौर्णमासीसमुदायापूर्वं स्थापयति। एतदभा
वे निष्पन्नमपि समुदायापूर्वं विनश्यतीति कल्प्यते। इति [illegible] दर्श
पूर्णमासविवेकः। अथ चातुर्मास्यानि विविच्यंते। वैश्वदेव वरुणप्रघासाः साकमेधाः शुना
सीरीयमिति चतुर्णां पर्वणां चातुर्मास्यसंज्ञा। चतुर्षु चतुर्षु मासेष्वेकैकपर्वणोऽनुष्ठा
नात्। तत्र वैश्वदेवपर्वण्यष्टौ यागाः। आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुं सावि
त्रं द्वादशकपालं सारस्वतं चरुं पौष्णं चरुं मारुतं सप्तकपालं वैश्वदेवीमामिक्षां द्या
वापृथिव्यमेककपालमिति वाक्यैर्विहिताः

मीमांसा